# संस्कृतभाषा

## कक्षा ६

नेपालसर्वकारः

शिक्षाविज्ञानप्रविधिमन्त्रालयः

पाठ्यक्रमविकासकेन्द्रम्

सानोठिमी-भक्तपुरम्

प्रकाशकः
नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य अंशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०७८

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते। अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य ६ कक्षायाः संस्कृतभाषाविषयकपाठ्यक्रमस्याधारेण पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं सहप्रा. ध्रुवप्रसादः भट्टराई, सहप्रा.डा. मुकुन्दप्रसादः लामिछाने, उपप्रा. रोहिणीराजः तिमिल्सिना, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन लिखितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य लेखने पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने, प्रा.डा. नुरापतिः पोखरेलः, पर्वतराजः घिमिरे, शिवप्रसादः लामिछाने, गणेशः तिमिल्सिना, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य चित्राङ्कनं टङ्कणं रूपसज्जा चेत्यादिकं खडोससुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | शीर्षकम् | | पृष्ठसङ्ख्या |
|---|---|---|---|
| प्रथमः पाठः | प्रकृतिस्तवनम् | वन्दना | १ |
| द्वितीयः पाठः | भगिन्यौ कोल्पुमहेशखोलिके | लोकप्रचलिता कथा | १४ |
| तृतीयः पाठः | सामाजिकी एकता | सामाजिकसद्भावाभिवर्धको निबन्धः | २९ |
| चतुर्थः पाठः | पित्रे पत्रम् | व्यक्तिगतं पत्रम् | ४४ |
| पञ्चमः पाठः | संस्कृतस्य अभियन्ता | संस्कृतसेवाविषयकं जीवनवृत्तम् | ५८ |
| षष्ठः पाठः | विवेकस्य सौन्दर्यम् | नीतिशिक्षादायिनी कथा | ७३ |
| सप्तमः पाठः | नीतिपद्यानि | नीतिपद्यम् | ८३ |
| अष्टमः पाठः | गुरुकुलपरम्परा | प्राचीनशिक्षाप्रणालीविषयकः संवादः | ९३ |
| नवमः पाठः | प्रधानाध्यापकाय निवेदनम् | विद्यालयीयं पत्रम् | १०६ |
| दशमः पाठः | कर्दम-निर्मितं कामग-विमानम् | संस्कृतेऽनुस्यूतविज्ञानविषयकः निबन्धः | ११८ |
| एकादशः पाठः | सूक्तिपद्यानि | सूक्तिप्रधानं काव्यपद्यम् | १३० |
| द्वादशः पाठः | अविचारितं कर्म अनुचितम् | सांस्कृतिकी कथा | १४१ |
| त्रयोदशः पाठः | सामाजिकसञ्जालं साधकं बाधकं वा ? | वादविवादविषयकः | १५१ |

# प्रकृतिस्तवनम्

१. दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥



२. मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय अश्वत्थाय नमो नमः ॥

३. अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ।
सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥

४. नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः सम्पत्प्रदायिके ॥

## शब्दार्थाः

| | | |
|---|---|---|
| द्रुमः | = | वृक्षः, रुख |
| ब्रह्मा | = | धाता, भगवान् ब्रह्माजी |
| विष्णुः | = | श्रीहरिः, भगवान् विष्णु |
| शिवः | = | शम्भुः, भगवान् शिव |
| वरम् | = | उत्कृष्टम्, श्रेष्ठ |
| सुजनः | = | सज्जनः, असल मानिस |
| अर्थिनः | = | प्राप्तेः इच्छुकाः, चाहनेहरू |
| सम्पत् | = | सम्पत्तिः, धन |
| जन्म | = | जनिः, उत्पत्ति |
| ह्रदः | = | सरोवरः, तलाउ |

### प्रथमं पद्यम्

**पदच्छेदः** - दशकूपसमा, वापी, दशवापीसमः, ह्रदः, दशह्रदसमः, पुत्रः, दशपुत्रसमः, द्रुमः ।

**अन्वयः** - वापी दशकूपसमा, ह्रदः दशवापीसमः, पुत्रः दशह्रदसमः, द्रुमः (च) दशपुत्रसमः (भवति) ।

**भावार्थः** - एका वापी दशभिः कूपैः तुल्या भवति । एकः ह्रदः दशभिः वापीभिः तुल्यः भवति । एकः पुत्रः दशभिः ह्रदैः समानः भवति । द्रुमः तु दशभिः पुत्रैः समानः भवति । एवं द्रुमस्य महत्त्वं सर्वाधिकं वर्तते ।

### द्वितीयं पद्यम्

**पदच्छेदः** - मूलतः, ब्रह्मरूपाय, मध्यतः, विष्णुरूपिणे, अग्रतः, शिवरूपाय, अश्वत्थाय, नमः, नमः ।

**अन्वयः** - मूलतः ब्रह्मरूपाय, मध्यतः विष्णुरूपिणे, अग्रतः शिवरूपाय अश्वत्थाय नमः नमः ।

**भावार्थः** - पिप्पलवृक्षे देवानां निवासः भवति । तस्य मूले भगवतः ब्रह्मणः निवासः भवति । तस्य मध्यभागे भगवतः विष्णोः निवासः भवति । तस्य उपरि भगवतः शिवस्य निवासः भवति । अतः मूलभागं ब्रह्मरूपम्, मध्यभागं विष्णुरूपम्, अग्रभागं च शिवरूपं मत्वा पिप्पलवृक्षः नमस्करणीयः ।

## तृतीयं पद्यम्

**पदच्छेदः** - अहो, एषाम्, वरम्, जन्म, सर्वप्राण्युपजीवनम्, सुजनस्य, इव, येषाम्, वै, विमुखाः, यान्ति, न, अर्थिनः ।

**अन्वयः** - अहो ! एषां सर्वप्राण्युपजीवनं जन्म वरम्, वै येषाम् अर्थिनः सुजनस्य इव विमुखाः न यान्ति ।

**भावार्थः** - अहो ! एतेषां वृक्षाणाम् उत्पत्तिः उत्तमा वर्तते । वृक्षाः स्वजन्मना सर्वेषां प्राणिनां जीवने उपकारं कुर्वन्ति । यथा साहाय्यस्य याचनाय सज्जनस्य पार्श्वे गतः कः अपि जनः रिक्तहस्तः न निवर्तते, तथैव पत्रपुष्पफलादिषु कस्यचन अपि वस्तुनः वाञ्छया वृक्षाणां पार्श्वे गतः याचकः विमुखः न भवति, रिक्तहस्तः न प्रतिगच्छति । वृक्षाः सर्वथा प्राणिनः उपकुर्वन्ति ।

## चतुर्थं पद्यम्

**पदच्छेदः** - नमः, तुलसि, कल्याणि, नमः, विष्णुप्रिये, शुभे, नमः, मोक्षप्रदे, देवि, नमः, सम्पत्प्रदायिके ।

**अन्वयः** - कल्याणि तुलसि ! (तुभ्यम्) नमः, शुभे विष्णुप्रिये ! (तुभ्यम्) नमः, मोक्षप्रदे देवि ! (तुभ्यम्) नमः, सम्पत्प्रदायिके ! (तुभ्यम्) नमः ।

**भावार्थः** - हे कल्याणकारिणि तुलसि ! तुभ्यं नमः । त्वं भगवतः विष्णोः प्रिया असि । हे देवि ! त्वं मोक्षस्य सम्पदः च दात्री असि । तुभ्यं नमः ।

## अभ्यासः

### श्रवणं भाषणं च

१. **पाठस्थान् श्लोकान् शिक्षकात् श्रुत्वा अनुवाचयत ।**

२. **कक्षायां पाठस्य प्रथमश्लोकस्य श्रवणानन्तरं स्वमातृभाषायां भावार्थं श्रावयत ।**

३. **मित्रात् पाठस्य प्रथमं पद्यं श्रुत्वा प्रश्नान् उत्तरयत**

(क) एका वापी दशभिः कैः तुल्या भवति ?

(ख) कः दशभिः वापीभिः तुल्यः भवति ?

(ग) एकः पुत्रः दशभिः कैः समानः भवति ?

(घ) कः दशभिः पुत्रैः समानः भवति ?

४. **पाठस्य तृतीयं पद्यं श्रुत्वा तस्य पदच्छेदं कुरुत ।**

५. **एकस्मात् मित्रात् श्रुत्वा अनूच्चारयत**

अहो, एषाम्, वरम्, जन्म, सर्वप्राण्युपजीवनम्, नमः, तुलसि, कल्याणि, विष्णुप्रिये, मोक्षप्रदे, सम्पत्प्रदायिके, सुजनस्य, येषाम्, विमुखाः, अर्थिनः, यान्ति ।

६. **अधस्तनानि वाक्यानि श्रुत्वा अर्थं कथयत**

(क) द्रुमः सर्वान् उपकरोति ।

(ख) ह्रदे तरणं सुखकरं भवति ।

(ग) अश्वत्थः सर्वोत्तमः वृक्षः मन्यते ।

(घ) सुजनाः उपकारिणः भवन्ति ।

(ङ) मम गृहस्य प्राङ्गणे तुलसी अस्ति ।

७. **अधस्तनं पद्यं श्रुत्वा भावार्थं प्रकाशयत**

**पवित्रं कुरुते वायुं सौरभस्य प्रसारणम् ।**
**नित्यं रक्षति व्याधिभ्यः तुलसी स्वास्थ्यवर्धिनी ॥**

## पठनम्

१. **अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

एकस्मिन् ग्रामे एकः नाविकः निवसति स्म । ग्रामस्य निकटे एका नदी आसीत् । स प्रतिदिनं नद्यां नौकां चालयति स्म । स नौकया यात्रिणः नदीं तारयति स्म । यात्रिणः तदर्थं तस्मै शुल्कं यच्छन्ति स्म । स एवं स्वजीविकां चालयति स्म । एकस्मिन् दिने सायं स मदिरां पीत्वा नदीतटं प्राप्नोत् । स नौकायां स्थित्वा गृहं गन्तुं नौकाम् अचालयत् । प्रातःकालं यावत् स नौकां चालयन् एव अभवत् । स 'आरात्रि नौकायाः चालनेन बहु दूरं प्राप्तः स्याम्' इति अचिन्तयत् । तदनन्तरं स इतस्ततः अपश्यत् । ह्यः सायं स यस्मात् स्थानात् नौकायाः चालनम् आरब्धवान् आसीत्, प्रातः अपि तस्मिन् एव स्थाने आसीत् । तत्पश्चात् सः अकथयत् - "धिक् माम्, नौकां बन्धनाद् मोचयितुम् एव व्यस्मरम् ।"

(क) ग्रामस्य निकटे का आसीत् ?

(ख) नाविकः प्रतिदिनं किं करोति स्म ?

(ग) नाविकः कुत्र गन्तुं नौकाम् अचालयत् ?

(घ) प्रातः नाविकः कुत्र आसीत् ?

(ङ) नाविकः किं व्यस्मरत् ?

**२. उदाहरणानुसारेण रूपावलीतालिकां रचयत**

| पठ्-धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पठति | पठतः | पठन्ति |
| मध्यमः पुरुषः | पठसि | पठथः | पठथ |
| उत्तमः पुरुषः | पठामि | पठावः | पठामः |

**धातवः –** लिख् (लिखति) धाव् (धावति) खेल् (खेलति)

**३. अधस्तनं श्लोकम्, तस्य भावार्थं च पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि कथयत**

**परान्नं भुङ्क्ष्व दुर्बुद्धे ! मा प्राणेषु दयां कुरु ।**

**परान्नं दुर्लभं लोके प्राणा जन्मनि जन्मनि ॥**

**भावार्थः -** एकः जनः कञ्चन अत्यधिकं भोजनं कुर्वाणं घस्मरं मूर्खं प्रति वदति - रे मूढ ! अन्येषां द्रव्याणां व्ययेन प्राप्तं भोजनं स्वास्थ्यम् अविचार्य एव खाद । यतो हि स्वास्थ्यहानिद्वारा म्रियसे चेदपि त्वं तु पुनः जायसे परन्तु संसारे परेषाम् अन्नं दुर्लभम् अस्ति ।

(क) कीदृशं भोजनं स्वास्थ्यम् अविचार्य एव खादनीयम् ?

(ख) केषु दया न कर्तव्या ?

(ग) लोके किं दुर्लभम् अस्ति ?

(घ) जन्मनि जन्मनि के लभ्यन्ते ?

(ङ) श्लोकस्य कथनम् उपयुक्तं मन्यसे न वा ?

४. पाठस्य चतुर्थं श्लोकं पठित्वा तस्मिन् श्लोके कस्य प्रार्थना विहिता अस्ति ? इति उत्तरयत ।

५. पाठस्य द्वितीयश्लोकस्य पदच्छेदं पठित्वा अन्वयं कुरुत ।

## लेखनम्

१. अधस्तनस्य पद्यस्य आधारेण समुचितं विकल्पं प्रयुज्य उत्तराणि पूरयत

अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ।

सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥

(क) केषां जन्म वरम् ?

................ जन्म वरम् । (मानवानाम्, पशूनाम्, वृक्षाणाम्)

(ख) वृक्षाणां जन्म केषाम् उपजीवनम् ?

वृक्षाणां जन्म ................ उपजीवनम् । (प्राणिनाम्, ग्रहाणाम्, ताराणाम्)

(ग) के विमुखाः न यान्ति ?

................ विमुखाः न यान्ति । (पाठकाः, अर्थिनः, लेखकाः)

(घ) के उपकारिणः भवन्ति ?

................ उपकारिणः भवन्ति । (दुर्जनाः, याचकाः, सज्जनाः)

२. पाठाधारेण पूर्णवाक्येन प्रश्नान् उत्तरयत

(क) कस्य महत्त्वं सर्वाधिकं वर्तते ?

(ख) अश्वत्थस्य मूले कस्य निवासः भवति ?

(ग) कीदृशः अश्वत्थः नमस्करणीयः ?

(घ) केषां जन्म सर्वप्राणिनाम् उपकारकम् अस्ति ?

(ङ) का मोक्षप्रदा अस्ति ?

३. पाठस्य पद्यानां श्रुतलेखनं कुरुत ।

४. **पाठात् अन्विष्य पर्यायपदानि लिखत**

(क) सरोवरः – ह्रदः  (ख) वृक्षः – ...........

(ग) हरिः – ...........  (घ) शङ्करः – ...........

(ङ) पिप्पलः – ...........  (च) सज्जनः – ...........

(छ) याचकाः – ...........

५. **पाठाधारेण रिक्तस्थानं पूरयत**

अहो .......... वरं ............ सर्वप्राण्युपजीवनम् ।

सुजनस्येव .......... वै .......... यान्ति .......... ॥

.......... कल्याणि .......... विष्णुप्रिये ........... ।

नमो ............. देवि ............ सम्पत्प्रदायिके ॥

६. **प्रदत्तानां पदानां साहाय्येन त्रिभिवाक्यैः चित्रं वर्णयत**



**मञ्जूषा**

**सङ्गणकानि, विज्ञानस्य, आविष्कारः, आधुनिकी शिक्षाप्रणाली, प्रयोगात्मकं शिक्षणम्, रुचिः ।**

**७. अधस्तनं श्लोकं पठित्वा प्रश्नान् उत्तरयत**

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।**

**परोपकाराय दुहन्ति गावः परोपकाराय सतां विभूतयः ॥**

(क) परोपकाराय वृक्षाः किं कुर्वन्ति ?

(ख) नद्यः किमर्थं वहन्ति ?

(ग) परोपकाराय काः दुहन्ति ?

(घ) परोपकाराय केषां विभूतयः सन्ति ?

## व्याकरणानुशीलनम्

**वर्णाः**

भाषायां प्रयुक्तानां स्वल्पानां ध्वनीनां द्योतकचिह्नानि वर्णाः भवन्ति । वर्णानां खण्डनं न भवति । वर्णाः द्विप्रकारकाः सन्ति - स्वरवर्णाः व्यञ्जनवर्णाश्च । अच्-प्रत्याहारस्थाः वर्णाः स्वरवर्णाः कथ्यन्ते चेत् हल्-प्रत्याहारस्थाः वर्णाः व्यञ्जनवर्णाः कथ्यन्ते । येषां वर्णानां स्वयम् उच्चारणं भवति ते स्वराः । यथा- अ, इ इत्यादयः । येषाम् उच्चारणं स्वरेण विना न सम्भवति ते हल्वर्णाः, यथा- क्, ख् इत्यादयः । स्वराः त्रयोदश सन्ति । एतेषु अ इ उ ऋ ऌ - एते पञ्च ह्रस्वस्वराः । आ ई ऊ ॠ ए ऐ ओ औ एते अष्टौ दीर्घस्वरवर्णाः । व्यञ्जनानि त्रयस्त्रिंशत् सन्ति । यथा-

| **वर्गाः** | **वर्णाः** |
|---|---|
| कवर्गः | क ख ग घ ङ |
| चवर्गः | च छ ज झ ञ |
| टवर्गः | ट ठ ड ढ ण |
| तवर्गः | त थ द ध न |
| पवर्गः | प फ ब भ म |
| अन्तःस्थः | य र ल व |
| ऊष्मा | श ष स ह |

द्रष्टव्यम्– अयं (–ं) अनुस्वारः कथ्यते । अयं (–ँ) चन्द्रविन्दुः कथ्यते ।

अयं ( ः ) विसर्गः अस्ति ।

## अभ्यासः

**१. अधस्तनान् प्रश्नान् उत्तरयत**

(क) वर्णाः कतिविधाः सन्ति ?

(ख) के स्वराः कथ्यन्ते ?

(ग) दीर्घस्वराः कति सन्ति ?

(घ) टवर्गस्य वर्णाः के ?

(ङ) ऊष्मसंज्ञकाः वर्णाः के ?

**२. उपयुक्तेन पदेन रिक्तस्थानं पूरयत**

(क) वर्णानां खण्डनं ........................ । (भवति, न भवति)

(ख) .................. वर्णानाम् उच्चारणं स्वरेण विना न सम्भवन्ति । (अच्, हल्)

(ग) ञवर्णः .................. अस्ति । (तवर्गे, चवर्गे)

(घ) ववर्णः ...................... अस्ति । (ऊष्मा, अन्तःस्थः)

(ङ) ':' इति चिह्नं ..................... कथ्यते । (अनुस्वारः, विसर्गः)

**३. परस्परं मेलयत**

| | |
|---|---|
| औ | पवर्गः |
| ग | ऊष्मा |
| म | स्वरः |
| र | कवर्गः |
| ह | अन्तःस्थः |

## ४. चित्राणि दृष्ट्वा पठत


अयं बालकः


इयं बालिका


इदं फलम्


सः छात्रः


सा छात्रा


तत् पुस्तकम्

## ५. रिक्तस्थानं पूरयत

................ पुरुषः । (अयम्, इयम्)

.............. महिला । (इयम्, इदम्)

.............. चित्रम् । (अयम्, इदम्)

............. मानवः । (इदम्, अयम्)

.............. विद्यालयः । (सः, सा)

.............. वाटिका । (तत्, सा)

................ मन्दिरम् । (सः, तत्)

## ६. परस्परं मेलयत

| | |
|---|---|
| सः | उपवनम् |
| तत् | लता |
| सा | खगः |

## कोषानुशीलनम्

### अथ स्वर्गवर्गः

#### स्वर्गस्य नामानि

स्वरव्ययं स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः ॥१॥

सुरलोको द्यो-दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥२॥

#### देवानां नामानि

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ॥१॥

सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥२॥

आदितेया दिविषदो लेखा अदितिनन्दनाः ॥३॥

आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥४॥

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ॥५॥

वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥६॥

#### असुराणां नामानि

असुरा दैत्य-दैतेय-दनुजेन्द्रारि-दानवाः ॥१॥

शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥२॥

#### बुद्धस्य नामानि

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ॥१॥

समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥२॥

षडभिज्ञो दशबलोऽद्वयवादी विनायकः ॥३॥

मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः ॥४॥

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ॥५॥

गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥६॥

## पदानुशीलनी

**लिङ्गव्यवस्था** - अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे च (ङ), इति सङ्केतः प्रदत्तो वर्तते ।

**स्वर्गस्य नव नामानि** - स्वर् (घ), स्वर्गः (क), नाकः (क), त्रिदिवः (क), त्रिदशालयः (क), सुरलोकः (क), द्यौः (ख), दिव् (ख), त्रिविष्टपम् (ग) ।

**देवानां षड्विंशतिः नामानि** - अमरः (क), निर्जरः (क), देवः (क), त्रिदशः (क), विबुधः (क), सुरः (क), सुपर्वा (क), सुमनाः (क), त्रिदिवेशः (क), दिवौकाः (क), आदितेयः (क), दिविषद् (क), लेखः (क), अदितिनन्दनः (क), आदित्यः (क), ऋभुः (क), अस्वप्नः (क), अमर्त्यः (क), अमृतान्धाः (क), बर्हिर्मुखः (क), क्रतुभुक् (क), गीर्वाणः (क), दानवारिः (क), वृन्दारकः (क), दैवतम् (ङ), देवता (ख) ।

**असुराणां दश नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) असुरः, दैत्यः, दैतेयः, दनुजः, इन्द्रारिः, दानवः, शुक्रशिष्यः, दितिसुतः, पूर्वदेवः, सुरद्विट् ।

**बुद्धस्य अष्टादश नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) सर्वज्ञः, सुगतः, बुद्धः, धर्मराजः, तथागतः, समन्तभद्रः, भगवान्, मारजित्, लोकजित्, जिनः, षडभिज्ञः, दशबलः, अद्वयवादी, विनायकः, मुनीन्द्रः, श्रीघनः, शास्ता, मुनिः, शाक्यमुनिः, शाक्यसिंहः, सर्वार्थसिद्धः, शौद्धोदनिः, गौतमः, अर्कबन्धुः, मायादेवीसुतः ।

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धम् उच्चारयत**

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।

समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥

२. **असुराणां दश नामानि पृथक् पृथक् लिखत ।**

३. **'स्वर्' इति कस्य नाम ?**

४. **देवानां नाम्नां पङ्क्तिद्वयं विलिख्य नामानि पृथक् लिखत ।**

५. **मुनि-शब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

आदितेया ............ लेखा .................. ।

.............. ऋभवोऽस्वप्ना ............ अमृतान्धसः ॥

बर्हिर्मुखाः ............. गीर्वाणा ................ ।

............ दैवतानि पुंसि वा ........... स्त्रियाम् ॥

७. **देव-शब्दस्य रूपावलीं पूरयत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | देवः | देवौ | देवाः |
| द्वितीया | देवम् | ........ | देवान् |
| तृतीया | देवेन | देवाभ्याम् | देवैः |
| चतुर्थी | देवाय | ........ | देवेभ्यः |
| पञ्चमी | देवात्/द् | ........ | ........ |
| षष्ठी | देवस्य | देवयोः | देवानाम् |
| सप्तमी | देवे | ........ | देवेषु |
| सम्बोधनम् | हे देव ! | ........ | ........ |

८. **अमर-शब्दस्य रूपावलीं लिखत ।**

९. **प्रदत्तैः पदैः वाक्यानि रचयत**

दानवारिः, त्रिदशालयः, दैतेयः, तथागतः ।

१०. **पर्यायान् परस्परं मेलयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| निर्जरः | नाकः |
| असुरः | श्रीघनः |
| स्वर्गः | अमरः |
| मुनीन्द्रः | दैत्यः |

**प्रतिभाप्रदर्शनाभ्यासः**

**बिल्वस्य महत्त्वम् इति विषये एकम् अनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

द्वितीयः पाठः

# भगिन्यौ कोल्पुमहेशखोलिके

त्रिशूली भगवतः शङ्करस्य त्रिशूलप्रहारेण निःसृता नदी अस्ति । पुराणेषु अपि अस्याः महत्त्वं वर्णितं वर्तते । गोसाइँकुण्डतः वहन्ती त्रिशूली नुवाकोटं धादिङं च प्राप्य दक्षिणं प्रति गच्छति । कोल्पुमहेशखोलिके च त्रिशूल्याः समीपे एव वहतः । कोल्पुखोलिका धादिङनुवाकोटमण्डलयोः मध्ये वहति । महेशखोलिका च नौबिसेगल्छीस्थानं सम्भूय धादिङमण्डले वहति । नुवाकोटधादिङमण्डलयोः जनाः त्रिशूलीं मातरम्, महेशखोलिकां ज्येष्ठपुत्रीम्, कोल्पुखोलिकां च कनिष्ठपुत्रीं कथयन्ति । त्रिशूली विविधसंस्कारान् शिक्षयित्वा पुत्रीभ्यां सदाचारशिक्षां दत्तवती ।

त्रिशूली महेशखोलिकायाः नागार्जुनपर्वतेन सह, कोल्पुखोलिकायाः च शिवपुरीपर्वतेन सह विवाहम् अकारयत् । पतिगृहं गच्छन्त्यौ पुत्र्यौ त्रिशूली उपदिष्टवती, 'भो पुत्र्यौ ! अहं युवयोः समानं स्नेहं करोमि । युवाभ्यां समानम् उपदेशं च यच्छामि । युवां निरन्तरं गतिशीले



भवतम् । यथा अहं पार्श्वे स्थितां भूमिं समीकृत्य वहन्ती अस्मि युवाम् अपि तथैव वहतम् । मां स्मृत्वा समये समये युवां सहैव आगच्छतम् । युवां कदापि लोभं न कुरुतम् । लोभः विनाशस्य कारणं भवति' इति । अनन्तरं ते पतिगृहम् अगच्छताम् ।

किञ्चित्कालानन्तरं ते मातरम्, मातुः उपदेशं च अस्मरताम् । मातरं मिलितुं ते उत्कण्ठिते अभवताम् । मातुः इच्छानुसारं ते सहैव मातरं मिलितुं प्रस्थितवत्यौ । मातुः उपदेशम् अनुसृत्य ते प्रारम्भे पार्श्वस्थां भूमिं समीकुर्वत्यौ मन्दं मन्दम् अवहताम् । मध्ये कोल्पुखोलिकायाः मनसि लोभः उत्पन्नः अभवत् । सा शीघ्रं मातरं मिलित्वा अधिकं स्नेहम्, अधिकम् उपहारं च प्राप्तुम् ऐच्छत् । अतः सा पार्श्वस्थां भूमिम् असमीकृत्य एव शीघ्रम् अवहत् । सा त्वरितं मातुः समीपं प्राप्तवती । त्रिशूली एकाकिनीं तां दृष्ट्वा विस्मिता अभवत् । सा तस्याः मनोभावं ज्ञात्वा ताम् अशपत्, 'कपटे ! तव मनः दूषितम् अस्ति । अतः तव जलमपि दूषितं भवतु । कः अपि तव जलं न पिबतु, तव जले स्नानं च न करोतु । ये मातुः पितुश्च आज्ञाम् उल्लङ्घयन्ति ते समाजात् तिरस्कृताः भवन्ति ।'

महेशखोलिका च मातुः उपदेशम् अनुसृत्य मन्दं मन्दम् आगच्छन्ती आसीत् । सा पार्श्वस्थां भूमिं च समीकुर्वती आसीत् । भगिन्याः वृत्तान्तं ज्ञात्वा सा अपि शीघ्रं वहन्ती गल्छीस्थानं प्राप्तवती । भगिन्याः कपटेन सा तस्याः समीपे न अगच्छत् । त्रिशूली ताम् 'अवशिष्टं भूभागं किमर्थं न समीकृतवती ?' इति अपृच्छत् । सा अकथयत्, 'भवती सहैव मिलितुं कथितवती आसीत् । भगिनी शीघ्रमेव आगच्छत् । भवत्याः कथनम् असत्यं न भवतु इति विचार्य अहमपि शीघ्रम् आगच्छम् ।' महेशखोलिकायाः वचनं श्रुत्वा त्रिशूली प्रसन्ना अभवत् । सा अकथयत्, 'पुत्रि ! त्वं मातुः उपदेशम् अनुसृतवती । अतः त्वं धन्या असि । तव जलं निर्मलं भवतु । जनाः तव जलं पिबन्तु, तव जले स्नानं च कुर्वन्तु । त्वं यशस्विनी भव । ये मातुः पितुश्च आज्ञां पालयन्ति ते सदैव यशस्विनः भवन्ति ।'

अधुना अपि प्रायेण कोल्पुखोलिकायाः जलं सदैव मलिनं दृश्यते । सुदूरं यावत् तस्याः जलं त्रिशूल्याः जलाद् भिन्नं दृश्यते । जनाः अद्यापि तस्याः जलं न पिबन्ति । महेशखोलिकायाः जलं तु प्रायेण स्वच्छं भवति । तस्याः जलं जनाः पिबन्ति । तत्र स्नानं च कुर्वन्ति । तस्याः जलं त्रिशूल्यां शीघ्रमेव एकाकारा भवति ।

## शब्दार्थाः

निःसृता = निर्गता, निस्किइन्
समीकृत्य = समानीकृत्य, सम्म पारेर
पार्श्वस्थाम् = निकटस्थाम्, नजिकमा रहेको
त्वरितम् = क्षिप्रम्, तुरुन्त
उल्लङ्घयन्ति = उल्लङ्घनं कुर्वन्ति, उल्लङ्घन गर्छन्
तिरस्कृताः = अपमताः, अपमान गरिएका
यशस्विनी = कीर्तिमती, कीर्तिले युक्त भएकी
पालयन्ति = पालनं कुर्वन्ति, पालन गर्छन्

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकात् पाठं श्रुत्वा सङ्क्षिप्तमुत्तरं वदत**

(क) त्रिशूलीनदी कथं निःसृता ?

(ख) त्रिशूलीनद्याः पुत्र्यौ के ?

(ग) नागार्जुनपर्वतः कस्य पतिः वर्तते ?

(घ) कोल्पुखोलिका-महेशखोलिके कां मिलितुं प्रस्थितवत्यौ ?

(ङ) त्रिशूली कोल्पुखोलिकां किमर्थम् अशपत् ?

(च) कस्याः वचनेन त्रिशूली प्रसन्ना अभवत् ?

(छ) जनाः कस्याः जलं न पिबन्ति ?

(ज) के सदैव यशस्विनः भवन्ति ?

२. **अधो लिखितानि पदानि उच्चारयत**

त्रिशूलप्रहारे, उल्लङ्घयन्ति, उत्कण्ठिते, अनुसृत्य, समीकृत्य, एकाकिनीम्, पार्श्वस्थाम् ।

३. **शिक्षकात् श्रुत्वा पदानां विभक्तिं कथयत**

धादिङमण्डले, विविधसंस्कारान्, शिवपुरीपर्वतेन, समाजात्, जनाः, भो पुत्र्यौ !, खोलिकायाः, पुत्रीभ्याम् ।

४. **मित्रात् पाठस्य प्रथमानुच्छेदं श्रुत्वा तत्र प्रयुक्तानि अव्ययपदानि श्रावयत ।**

५. **अधोलिखितं संवादं श्रुत्वा उत्तरयत**

सम्पदा - भगिनि ! सम्प्रति त्वं कुतः आगता असि ?

सफलता - सम्प्रति मन्दिरात् आगता अस्मि ।

सम्पदा - अद्य मन्दिरे उत्सवः अस्ति किम् ?

सफलता - आम्, अद्य जन्माष्टम्याः उत्सवः अस्ति । अतः सम्प्रति तत्र मन्दिरस्य सज्जीकरणं प्रचलति ।

सम्पदा - तर्हि अहं तु मन्दिरस्य सज्जीकरणाय गच्छामि ।

सफलता - अहमपि गच्छामि ।

सम्पदा - अहं तु अद्य रात्रौ जागृता भूत्वा द्वादशवादने जन्मोत्सवं पश्यामि, बालकृष्णं पूजयामि कीर्तने च सहभागिनी भवामि ।

सफलता - यदि भवती तत्र गच्छति चेद् अहमपि गच्छामि । अहं तु कीर्तनकाले नृत्यं करोमि । बालकृष्णस्य आशीर्वादेन ममापि अध्ययने रुचिः वर्धेत । तदनन्तरम् अहमपि भवती इव परीक्षायां प्रथमं स्थानं प्राप्स्यामि ।

सम्पदा - उत्तमः विचारः । अस्तु, सम्प्रति मन्दिरस्य सज्जीकरणाय गच्छाव ।

सफलता - अस्तु मिलित्वा सहैव गच्छाव ।

(द्वे एव बालिके मन्दिरं प्रति गच्छतः)

(क) अद्य कस्य उत्सवः अस्ति ?

(ख) भगिन्यौ किमर्थं मन्दिरं गच्छतः ?

(ग) कतिवादने बालकृष्णस्य पूजा भवति ?

(घ) बालकृष्णस्य आशीर्वादेन किम् एधते ?

(ङ) का परीक्षायां प्रथमं स्थानं प्राप्तवती ?

## पठनम्

१. **अधो लिखितां लघुकथां पठित्वा सारांशं वदत**

एकस्मिन् ग्रामे एकः सज्जनः वसति स्म । तस्य द्वौ पुत्रौ आस्ताम् । एकदा वार्धक्यस्य कारणेन सज्जनः अम्रियत । ततः पुत्रौ सर्वासामपि पैतृकसम्पदां विभाजनम् अकुरुताम् । अन्ते विभाजनाय एका महिषी अवशिष्टा अभवत् । तस्याः द्वेधा विभाजनं कठिनम् आसीत् । एकः ग्रामीणः परामृशत्, "महिष्याः मेरुदण्डात् अग्रभागम् एकः, पश्चभागं च अपरः सेवेत । अनेन विभाजनम् अपि उचितं भवति, महिषी अपि जीवति" इति । तत् श्रुत्वा अनुजः अचिन्तयत् - सर्वत्र दृश्यते श्रूयते च यत् अग्रपूजनम्, अग्रगमनम् अग्रासनं च सम्मानजनकं भवति । अतः एव अग्रभागं इच्छामि । एतद् विचिन्त्य सः अग्रजम् अवदत्, "भ्रातः ! अहं महिष्याः अग्रभागं सेवे ।" अग्रजः सहर्षं तत् स्वीकृतवान् । ततः महिषीसेवा प्रारब्धा । कनिष्ठः हरितान् घासान् आनीय महिषीं खादयति स्म । पौष्टिकानि वस्तूनि मिश्रयित्वा जलं पाययति स्म । तेन महिषी पुष्टा अभवत् । सा दुग्धं च बहु दातुम् आरभत । अपरत्र अग्रजः बहु दुग्धं प्राप्नोति स्म, विक्रीय द्रव्यार्जनं च करोति स्म । महिष्याः मलं प्रयोगं स्वस्य क्षेत्रे एव करोति स्म । अतः तस्य क्षेत्रे अधिकानि अन्नानि अफलन् । अनुजस्य समयः महिषीसेवया अगच्छत् । अग्रजस्य समयः तस्याः लाभग्रहणेन अगच्छत् । अनुजः अधिकश्रमेण रुग्णः अभवत् । तस्य परिवारश्च दीनः अभवत् । अपरत्र अग्रजस्य उन्नतिः अभवत् । स श्रमेण विना सुखेन जीवनं यापयति स्म । अनुजस्य पत्नी एकदा सहसा निःश्वसितवती, "मूर्खस्य नास्त्यौषधम् ।"

२. **कोष्ठकाद् उपयुक्तं चिह्नं संयोज्य पठत**

| ? | "..." | ! | : | - |
|---|---|---|---|---|

(क) कक्षायां कः चतुरः अस्ति

(ख) शिक्षकः अवदत्, ईशवन्दनं कुरुत

(ग) अहो विचित्रा इयं लीला

(घ) वेदाः चत्वारः सन्ति ।

(ङ) त्रयः रामाः प्रसिद्धाः सन्ति, यथा परशुरामः, श्रीरामः, बलरामः ।

३. **सस्वरपठनं कुरुत**

विदुषां साधूनां च चरितम् आश्चर्यजनकं भवति । ते ब्रह्माण्डं वर्णयन्ति । प्राणिनां दशां दर्शयन्ति । ग्रहनक्षत्राणां गतिं प्रमाणयन्ति । शास्त्रार्थं कुर्वन्ति । जीवनं व्यर्थं न यापयन्ति । परिश्रमेण जीवन्ति । हितम् उपदिशन्ति । वृक्षवत् सदैव परोपकाराय तत्पराः भवन्ति । अन्ते च सत्यधर्माय प्राणान् परित्यजन्ति ।

४. **वर्तमानकाले परिवर्त्य पठत**

(क) महादेवः सर्वेषां दुःखम् अहरत् ।

(ख) त्रिशूलप्रहारात् त्रिशूली अभवत् ।

(ग) माता पुत्रीम् अशपत् ।

(घ) पुत्री स्वेच्छाम् अकथयत् ।

(ङ) जनाः त्रिशूल्याः जलम् अपिबन् ।

५. **अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

नेपाले कपिलवस्तु इति एकः जनपदः अस्ति । प्राचीनसमये तत्र शुद्धोदनः राज्यम् अकरोत् । तस्य नृपस्य द्वे भार्ये आस्ताम् । ज्येष्ठा भार्या मायादेवी आसीत् । तयोः पुत्रस्य नाम सिद्धार्थः आसीत् । सिद्धार्थस्य विमाता गौतमी आसीत् । सा एव तस्य पालनम् अकरोत् । यतो हि तस्य जन्मनः सप्तदिनानन्तरं माता मायादेवी दिवं गता आसीत् । यशोधरा सिद्धार्थस्य पत्नी, राहुलः च पुत्रः । एकस्मिन् दिने स राज्यं परित्यज्य निरगच्छत् । पश्चात् स ज्ञानं प्राप्य संसारे शान्तिसन्देशम् अयच्छत् । स शान्तेः अग्रदूतः मन्यते । विश्वसमुदायः तम् एसियामहादेशस्य दीपकं कथयति । स नेपालस्य गौरवं वर्तते ।

**प्रश्नाः**

(क) सिद्धार्थस्य विमातुः नाम किम् ?

(ख) यशोधरा कस्य पत्नी ?

(ग) गौतमी किमर्थं सिद्धार्थस्य पालनम् अकरोत् ?

(घ) सिद्धार्थः कुत्र शान्तिसन्देशम् अयच्छत् ?

## लेखनम्

१. **पदानि प्रयुज्य एकैकं वाक्यं लिखत**

भगिन्यौ, मण्डलम्, पुत्री, स्नातुम्, प्रायेण ।

२. **उचितपदेन रिक्तस्थानं पूरयत**

(क) महादेवः ... प्राहरत् । (शङ्खेन/चक्रेण/त्रिशूलेन)

(ख) गोसाइँकुण्डतः त्रिशूली ...... । (प्रवहति/धावति/चलति)

(ग) ...... पुत्र्यौ उपादिशत् । (त्रिशूली/महादेवः/भगिनी)

(घ) धादिङं नुवाकोटं च ...... स्तः । (नगरे/ग्रामौ/मण्डले)

(ङ) नदी ...... कर्तव्या । (मलिना/अवरुद्धा/स्वच्छा)

३. **परस्परं योजयत**

| | |
|---|---|
| अग्रजा | कोल्पुखोलिका |
| अनुजा | त्रिशूली |
| माता | महादेवः |
| त्रिशूलप्रहारकः | अपेयम् |
| कोल्पुखोलिकायाः जलम् | महेशखोलिका |

४. **प्रश्नान् उत्तरयत**

(क) कोल्पुखोलिका कुत्र वहति ?

(ख) त्रिशूली पुत्रीभ्यां कां शिक्षां दत्तवती ?

(ग) कोल्पुमहेशमध्ये का ज्येष्ठा, का च कनिष्ठा ?

(घ) का लोभं कृतवती ?

(ङ) के समाजात् तिरस्कृताः भवन्ति ?

(च) मातुः उपदेशस्य पालनेन का यशस्विनी अभवत् ?

५. **अधस्तनम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

वेदसंहितासु 'पूषन्, पूषा' वा इति पदस्य भूयः भूयः प्रयोगः दृश्यते । कः एष देवः इति जनानां मनसि जिज्ञासा जायते । देवः अयं कुत्रचित् सूर्यस्य, कुत्रचित् पशुरक्षकस्य कुत्रचित्तु धनरक्षकस्य रूपेण वर्णितः अस्ति । केषुचित् स्थानेषु क्षेमस्वरूपेण च अयम् उपतिष्ठते । अयं दण्डहस्तः अस्ति, अजारूढः अस्ति, इन्द्रजालक्रियायाः अधीशश्च अयं मन्यते । द्वादशसु आदित्येषु एष परिगण्यते । एकदा ब्रह्मसभायां दन्तान् प्रदर्श्य विहस्य देवः अयं शिवम् उपाहसत् । प्रतिशोधेन दक्षयज्ञे वीरभद्रः अस्य दन्तान् अपातयत् । यज्ञेषु अस्मै पिष्टान्नं दीयते । पुराणेषु अस्य विविधरूपेण वर्णनं प्राप्यते ।

(क) पूषा कस्य कस्य रूपेण वर्णितः अस्ति ?

(ख) पूषा कीदृशः अस्ति ?

(ग) प्रतिशोधेन वीरभद्रः किम् अकरोत् ?

(घ) पूष्णे यज्ञेषु किं दीयते ?

(ङ) कुत्र पूष्णः वर्णनं प्राप्यते ?

## व्याकरणानुशीलनम्

### उच्चारणस्थानम्

१. **वर्णानाम् उच्चारणस्थानानि पठत**

| | | |
|---|---|---|
| अ आ क ख ग घ ङ ह विसर्गः | - | कण्ठस्थानम् |
| इ ई च छ ज झ ञ य श | - | तालुस्थानम् |
| ऋ ॠ ट ठ ड ढ ण ष | - | मूर्धास्थानम् |
| ऌ त थ द ध न ल स | - | दन्तस्थानम् |
| उ ऊ प फ ब भ म | - | ओष्ठस्थानम् |
| ए ऐ | - | कण्ठतालुस्थानम् |
| ओ औ | - | कण्ठोष्ठस्थानम् |
| व | - | दन्तोष्ठस्थानम् |
| (ं) | - | नासिकास्थानम् |

**द्रष्टव्यम्** – ङ्-ञ्-ण्-न्-म्-वर्णानाम् उच्चारणे नासिकापि प्रयुज्यते ।

२. **वर्णानाम् आभ्यन्तरप्रयत्नान् पठत**

आभ्यन्तरप्रयत्नः पञ्चविधः भवति, यथा -

| स्पृष्टः | ईषत्स्पृष्टः | विवृतः | ईषद्विवृतः | संवृतः |
|---|---|---|---|---|
| क ख ग घ ङ | य र ल व | अ ए इ ओ | श ष स ह | अ (प्रयोगे एव) |
| च छ ज झ ञ | | उ ऐ ऋ ओ | | |
| ट ठ ड ढ ण | | लृ | | |
| त थ द ध न | | | | |
| प फ ब भ म | | | | |

३. **अधस्तनान् प्रश्नान् उत्तरयत**

(क) विसर्गस्य उच्चारणस्थानं किम् ?

(ख) के ओष्ठ्यवर्णाः ?

(ग) केषाम् वर्णानाम् उच्चारणस्थानं नासिका भवति ?

(घ) डकारस्य आभ्यन्तरप्रयत्नः कः ?

(ङ) केषां वर्णानाम् आभ्यन्तरप्रयत्नः ईषत्स्पृष्टः ?

४. **रिक्तस्थानं पूरयत**

(क) आकारस्य उच्चारणस्थानम् ................. अस्ति ।

(ख) .................. वर्णयोः उच्चारणस्थानं कण्ठतालुः अस्ति ।

(ग) अनुस्वारस्य उच्चारणस्थानम् ..................... अस्ति ।

(घ) णकारस्य आभ्यन्तरप्रयत्नः ............... भवति ।

(ङ) संवृतप्रयत्नः ..................... एव भवति ।

## ५. परस्परं मेलयत

**‘अ’**

| | |
|---|---|
| (क) कण्ठ्यः | इ |
| (ख) तालव्यः | ब |
| (ग) दन्त्यः | ह |
| (घ) मूर्धन्यः | स |
| (ङ) ओष्ठ्यः | र |

**‘आ’**

| | |
|---|---|
| (क) स्पृष्टः | ल |
| (ख) ईषत्स्पृष्टः | श |
| (ग) विवृतः | म |
| (घ) ईषद्विवृतः | आ |

## ६. चित्राणि दृष्ट्वा पठत


अयं गजः


इमौ गजौ


इमे गजाः


इयम् पुस्तिका


इमे पुस्तिके


इमाः पुस्तिकाः

| | | |
|---|---|---|
|  |  |  |
| इदम् पुष्पम् | इमे पुष्पे | इमानि पुष्पाणि |
|  |  |  |
| सः व्याघ्रः | तौ व्याघ्रौ | ते व्याघ्राः |
|  |  |  |
| सा शिक्षिका | ते शिक्षिके | ताः शिक्षिकाः |
|  |  |  |
| तत् मन्दिरम् | ते मन्दिरे | तानि मन्दिराणि |

७. रिक्तस्थानं पूरयत

(क) तत्शब्दस्य प्रयोगेण रिक्तस्थानं पूरयत

(अ) ............. पाठशाले ।　　(आ) ............. उपवनानि ।

(इ) ................ चित्रम् ।　　(ई) ............. शिक्षकः ।

(उ) ............. महिलाः ।

(ख) इदम् शब्दस्य प्रयोगेण रिक्तस्थानं पूरयत

(अ) .............. रमेशः ।　　(आ) .............. गायिकाः ।

(इ) ............... मित्राणि ।　　(ई) ............... पुस्तके ।

(उ) ............. फलानि ।

## ब्रह्मणो नामानि

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ॥१॥
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥२॥
धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ॥३॥
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः ॥४॥
नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः ॥५॥
सदानन्दो रजोमूर्त्तिः सत्यको हंसवाहनः ॥६॥

## विष्णोः नामानि

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ॥१॥
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥२॥
दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ॥३॥
पीताम्बरोऽच्युतः शाङ्र्गी विष्वक्सेनो जनार्दनः ॥४॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ॥५॥
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥६॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ॥७॥
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥८॥
विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ॥९॥
पुराणपुरुषो यज्ञपुरुषो नरकान्तकः ॥१०॥
जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः ॥११॥

## कृष्णस्य पितुः नामनी

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥१॥

## बलदेवस्य नामानि

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ॥१॥
रेवतीरमणो रामः कामपालो हलायुधः ॥२॥
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ॥३॥
सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥४॥

## कामदेवस्य (प्रद्युम्नस्य), अनिरुद्धस्य च नामानि

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ॥१॥
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥२॥
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ॥३॥
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥४॥
ब्रह्मसूर्ऋष्यकेतुः स्यादनिरुद्ध उषापतिः ॥५॥

### पदानुशीलनी

**ब्रह्मणो विंशतिः नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) ब्रह्मा, आत्मभूः, सुरज्येष्ठः, परमेष्ठी, पितामहः, हिरण्यगर्भः, लोकेशः, स्वयम्भूः, चतुराननः, धाता, अब्जयोनिः, द्रुहिणः, विरिञ्चिः, कमलासनः, स्रष्टा, प्रजापतिः, वेधाः, विधाता, विश्वसृड्, विधिः, नाभिजन्मा, अण्डजः, पूर्वः, निधनः, कमलोद्भवः, सदानन्दः, रजोमूर्तिः, सत्यकः, हंसवाहनः ।

**विष्णोः ऊनचत्वारिंशत् नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) विष्णुः, नारायणः, कृष्णः, वैकुण्ठः, विष्टरश्रवाः, दामोदरः, हृषीकेशः, केशवः, माधवः, स्वभूः, दैत्यारिः, पुण्डरीकाक्षः, गोविन्दः, गरुडध्वजः, पीताम्बरः, अच्युतः, शार्ङ्गी, विष्वक्सेनः, जनार्दनः, उपेन्द्रः, इन्द्रावरजः, चक्रपाणिः, चतुर्भुजः, पद्मनाभः, मधुरिपुः, वासुदेवः, त्रिविक्रमः, देवकीनन्दनः, शौरिः, श्रीपतिः, पुरुषोत्तमः, वनमाली, बलिध्वंसी, कंसारातिः, अधोक्षजः, विश्वम्भरः, कैटभजित्, विधुः, श्रीवत्सलाञ्छनः, पुराणपुरुषः, यज्ञपुरुषः, नरकान्तकः, जलशायी, विश्वरूपः, मुकुन्दः, मुरमर्दनः ।

**कृष्णस्य पितुः द्वे नाम्नी** - (अत्र द्वे एव नामनी पुंलिङ्गे) वसुदेवः, आनकदुन्दुभिः ।

**बलदेवस्य सप्तदश नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) बलभद्रः, प्रलम्बघ्नः, बलदेवः, अच्युताग्रजः, रेवतीरमणः, रामः, कामपालः, हलायुधः, नीलाम्बरः, रौहिणेयः, तालाङ्कः, मुसली, हली, सङ्कर्षणः, सीरपाणिः, कालिन्दीभेदनः, बलः ।

**कामदेवस्य ऊनविंशतिः नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) मदनः, मन्मथः, मारः, प्रद्युम्नः, मीनकेतनः, कन्दर्पः, दर्पकः, अनङ्गः, कामः, पञ्चशरः, स्मरः, शम्बरारिः, मनसिजः, कुसुमेषुः, अनन्यजः, पुष्पधन्वा, रतिपतिः, मकरध्वजः, आत्मभूः ।

**अनिरूद्धस्य चत्वारिनामानि** - ब्रह्मसूः ऋष्यकेतुः अनिरूद्धः उषापतिः ।

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धम् उच्चरत**

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।

रेवतीरमणो रामः कामपालो हलायुधः ॥

२. **ब्रह्मणः दश नामानि पृथक् पृथक् लिखत ।**

३. **'कन्दर्पः' इति कस्य नाम ?**

४. **विष्णोः नाम्नां पङ्क्तिद्वयं विलिख्य नामानि पृथक् लिखत ।**

५. **'मुसली' इति कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

धाताब्जयोनिर्द्रुहिणो ........... कमलासनः ।

........ प्रजापतिर्वेधा विधाता ...........विधिः ॥

नाभिजन्माण्डजः ....... निधनः .............. ।

............ रजोमूर्त्तिः ............... हंसवाहन ॥

७. **विष्णु-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | विष्णुः | विष्णू | विष्णवः |
| द्वितीया | विष्णुम् | ........ | विष्णून् |
| तृतीया | विष्णुना | विष्णुभ्याम् | विष्णुभिः |
| चतुर्थी | विष्णवे | ........ | विष्णुभ्यः |
| पञ्चमी | विष्णोः | ........ | ........ |
| षष्ठी | ........ | विष्ण्वोः | विष्णूनाम् |
| सप्तमी | विष्णौ | ........ | ........ |
| सम्बोधनम् | हे विष्णो ! | ........ | ........ |

८. विधु-शब्दस्य रूपावलीं लिखत ।

९. प्रदत्तैः पदैः वाक्यानि रचयत

स्रष्टा, पीताम्बरः, सङ्कर्षणः, वसुदेवः, स्मरः ।

१०. पर्यायान् परस्परं मेलयत

| 'अ' खण्डः | 'आ' खण्डः |
| --- | --- |
| वसुदेवः | रतिपतिः |
| मदनः | बलः |
| हृषीकेशः | आनकदुन्दुभिः |
| हलायुधः | विरिञ्चिः |
| रजोमूर्तिः | मुकुन्दः |

**प्रतिभाप्रदर्शनाभ्यासः**

अभिभावकानां साहाय्येन स्वग्रामस्थानयोः प्रचलितां सङ्क्षिप्तां लोककथां श्रावयत ।

# सामाजिकी एकता

मानवानां समूहः समाजः कथ्यते । समाजे जीवनयापनं सरलं भवति । समाजे जीवनं यापयन्तो मनुष्याः सामाजिकाः प्राणिनः कथ्यन्ते । एकस्मिन् समाजे बहूनां जातीयानाम्, धार्मिकाणाम्, साम्प्रदायिकानां च मनुष्याणां निवासः भवति । अनया रीत्या बहुविधानां जनानां निवासेन एकः समाजः अपि नानापुष्पैः निर्मितम् उपवनम् इव प्रतीयते ।

सामाजिकेषु जनेषु परस्परं सद्भावः आवश्यकः भवति । तदर्थं सहिष्णुता अनिवार्या अपरिहार्या च वर्तते । सहिष्णुतायाः अर्थः भवति सहनशीलता । सहनशीलता तादृशः गुणः वर्तते यः सर्वान् मेलयित्वा स्वस्थाने संस्थापयति ।



मानवानां स्वभावः भिन्नः भवति । एकस्य व्यवहारः अपरस्मै कदाचिद् रोचते कदाचित् न रोचते । यदा समाजे एकः अपरं पीडयति, तदा कः अपि सोढुं न शक्नोति । अस्माभिः पूर्वमेव विचारणीयं यत् स्वकर्मणा, स्वव्यवहारेण च कस्यचिदपि हानिः न भवेत् । मम प्रियं वस्तु अन्यस्य कृते अप्रियं

भवितुम् अपि शक्नोति इति अपि चिन्तनीयम् । अतः अस्माभिः विचार्य एव कर्म करणीयम् । समाजे कश्चिद् अनपेक्षितं व्यवहरति चेत् स क्षन्तव्यः, सद्व्यवहारार्थं च उपदेश्यः । तथापि स सामाजिकमर्यादायाः उल्लङ्घनं करोति चेत् समाजेन सामाजिकरूपेण व्यवहारपरिवर्तनार्थं स निर्देशनीयः । तेनापि तस्य व्यवहारे परिवर्तनं न आगच्छति चेत् सम्बद्धः प्रशासनविभागः सूचनीयः । अतः 'स्वस्य व्यवहारेण कस्य अपि हानिः न भवतु' इति सर्वैः विचारः कर्तव्यः ।

सहिष्णुतायाः अभावे सामाजिकः विकासः अवरुद्धः भवति । एकतायाः भावना विखण्डिता भवति । परस्परं वैमनस्यं च उत्पद्यते । एतेन मानवसभ्यतायाः अवमानं भवति । सामाजिकजागरणे अपि ह्रासः आगच्छति । वयं सामाजिकाः प्राणिनः स्मः । वन्यजन्तूनाम् आचरणम् अस्मासु न शोभते । धार्मिकविवादेन, साम्प्रदायिककलहेन, जातीयविभेदेन च असहिष्णुतायाः भावना वर्धते । उदाहरणरूपेण वयं विश्वस्मिन् विविधेषु राष्ट्रेषु आन्तरं द्वन्द्वं द्रष्टुं शक्नुमः । तेषु राष्ट्रेषु अशान्तिः वर्धमाना अस्ति । कुत्र अपि जातीयतायाः, धार्मिकतायाश्च विवादः न समुत्पद्येत, अस्मिन् विषये अस्माभिः सदैव जागरुकैः भवितव्यम् ।

सहिष्णुता एव विकासस्य प्रमुखं कारणम् अस्ति । विनाशस्य प्रमुखं कारणं च कलहः अस्ति । सहिष्णुता राष्ट्रस्य समाजस्य च उन्नतिं कारयति । मानवता च इयम् एव रक्षति । मर्यादायाः पालनं च इयम् एव कारयति । अस्माभिः वाचि व्यवहारे च सहिष्णुतायाः भावना स्थापनीया । एतदर्थं विद्यालयेषु पाठमाध्यमेन विविधस्थलेषु सचेतनाकार्यक्रमैश्च सहिष्णुतायाः भावना विकासयितव्या । अनेन कार्येण सामाजिकी एकता वर्धते ।

प्रकृत्या अपि सामाजिक्याः एकतायाः आवश्यकता सिद्ध्यति । पिपीलिका क्षुद्रजीवः वर्तते, परं यदा ऐक्यबद्धः भवति तदा विपुलजीवस्य इव कार्यं कर्तुं शक्नोति । एकस्य मसृणतृणस्य कापि शक्तिः न भवति । यदा तृणैः रज्जुः निर्मीयते तदा सा बलवन्तमपि प्राणिनं बद्धुं प्रभवति । वृषभः तृणं खादति परं तृणैरेव निर्मितेन दाम्ना बद्धश्च भवति । एतत् सर्वम् एकतायाः उदाहरणं वर्तते । एकतया समाजे सौमनस्यं सदाचारश्च प्रवर्धेते । सन्ततयः सभ्याः सुशीलाश्च जायन्ते । यस्मिन् देशे सामाजिकी एकता वर्तते तत्र विकासश्च सर्वतः भवति । एकताबद्धं राष्ट्रं शत्रुः कदापि पराजेतुं न शक्नोति । इदानीम् एकता कस्यापि राष्ट्रस्य सर्वाधिका विपुलसम्पद् भवति । अतः एव नीतिकारैरपि उक्तम् -

**सङ्घे शक्तिः कलौ युगे ।**

### शब्दार्थाः

नानापुष्पैः - विविधकुसुमैः, धेरै फूलहरूले

क्रुध्यति - कुप्यति, रिसाउँछ

अनपेक्षितम् - अनीप्सितम्, नचाहेको

परामर्शः - विमर्शः, सल्लाह

ह्रासः - न्यूनता, कमी

बद्धुम् - आबद्धुम्, बाँध्न

### अभ्यासः

#### श्रवणं भाषणं च

१. सखिद्वयं पाठस्य प्रथमद्वितीयानुच्छेदौ क्रमेण पठ, अन्ये च सावधानतया शृणुत ।

२. पाठस्य सन्धियुतानि पदानि शुद्धमुच्चारयत ।

३. पाठस्य तृतीयानुच्छेदस्य क्रियापदानि वदत ।

४. पाठस्य प्रथमम् अनुच्छेदं श्रुत्वा प्रश्नान् उत्तरयत

(क) कः समाजः कथ्यते ?

(ख) मनुष्याः किमर्थं सामाजिकाः कथ्यन्ते ?

(ग) कः नानापुष्पैः निर्मितम् उपवनम् इव प्रतीयते ?

(घ) एकस्मिन् समाजे केषां निवासः भवति ?

५. सहिष्णुतायाः सामाजिकसद्भावस्य च विषये परस्परं परिचर्चां कुरुत ।

६. अधस्तनं गद्यभागं पठित्वा त्रीणि मुख्यवाक्यानि कथयत

मानवः परिवर्तनप्रियः प्राणी वर्तते । स परिवर्तनं प्रति सदैव उत्सुकः भवति । षट्चत्वारिंशद् अधिकद्विसहस्रतमस्य विक्रमवर्षस्य जनान्दोलनमपि नेपालिनां राजनीतिकपरिवर्तनस्य आकाङ्क्षायाः परिणामः आसीत् । तात्कालिकराजनीतिकव्यवस्थां प्रति प्रजाः सन्तुष्टाः न आसन् । राजनीतिकमौलिकाधिकाराः नियन्त्रिताः आसन् । दलानि प्रतिबन्धितानि

अवर्तन्त । तस्यां परिस्थितौ बहुशः नेपालिनः ऐक्यबद्धाः अभवन् । आराष्ट्रम् आन्दोलनं सञ्चालितम् अभवत् । बहुदलीयशासनव्यवस्था पुनः स्थापिता । नेतारः दलानि च मुक्तिम् अलभन्त । वर्षावधौ संविधानं निर्मितम् । निर्वाचनं च सम्पादितम् । नेपालः प्राजातान्त्रिकदेशस्य रूपेण विदेशेषु च परिचितः अभवत् । वैदेशिकी सहायता वर्धिता । शिक्षा-सञ्चार-यातायातक्षेत्रेषु महत् परिवर्तनं दृष्टम् । सर्वे अधिकारान् अवसराँश्च प्राप्नुवन् ।

## पठनम्

१. **पाठस्य चतुर्थपञ्चमौ अनुच्छेदौ पठित्वा पूर्णवाक्येन प्रश्नान् उत्तरयत**

(क) अस्मासु किं न शोभते ?

(ख) केन केन असहिष्णुतायाः भावना वर्धते ?

(ग) विकासस्य प्रमुखं कारणं किम् अस्ति ?

(घ) कथं सहिष्णुतायाः भावना विकासयितव्या ?

२. **अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

राष्ट्रं प्रति भक्तिः राष्ट्रभक्तिः अस्ति । राष्ट्रभक्तेः भावनया एव सैनिकाः राष्ट्ररक्षायै प्राणान् त्यक्तुम् अपि उद्यताः भवन्ति । स्वराष्ट्रस्य उन्नत्यै राष्ट्रभक्ताः नागरिकाः प्रयतन्ते । राष्ट्रभक्ताः राष्ट्रस्य संरक्षणाय परस्परम् एकतायाः भावनया युक्ताः भवन्ति । राष्ट्रभक्तिं विना कः अपि तस्य राष्ट्रस्य शोभनः नागरिकः न भवति । राष्ट्रभक्त्या रहितस्य नागरिकस्य जीवनं निष्फलं मन्यते । सर्वैः अपि नागरिकैः केवलं स्वार्थं विहाय राष्ट्रस्य उन्नयने प्रयासः करणीयः । राष्ट्रवासिनां सेवा च विधेया ।

(क) राष्ट्रभक्त्या रहितस्य नागरिकस्य जीवनं कीदृशं भवति ?

(ख) सैनिकाः किमर्थं प्राणान् त्यक्तुम् अपि उद्यताः भवन्ति ?

(ग) नागरिकैः कथं किं च करणीयम् ?

(घ) 'निष्फला' इत्यत्र कः उपसर्गः ?

(ङ) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं किं भवेत् ?

३. **अधोलिखितं गद्यभागं पठित्वा शीर्षकं निर्धारयत**

विश्वस्य केषुचिद् देशेषु धार्मिकशिक्षा प्रदीयमाना वर्तते । स्वधर्म-भाषा-संस्कृति-परम्पराणां ज्ञानेन विना शिक्षा पूर्णतां न प्राप्नोति इति वितर्क्य इयं शिक्षा प्रदत्ता वर्तते । नेपाले अपि धार्मिकशिक्षायाः आवश्यकता अस्ति न वा इति विषये विचारकाः विचारयन्ति । केचन तर्कयन्ति - धार्मिकशिक्षया जनः शैशवकालादेव सभ्यः, आस्थावान् अनुशिष्टश्च भवति । अन्ये इमं तर्कं खण्डयन्तो वदन्ति - धार्मिकशिक्षायाः नाम्नि शैक्षिकजनशक्तिः सङ्कीर्णा न विधातव्या । केषाञ्चन विचारे धर्मः सर्वेषां हितं कामयते । मानवजीवनमपि अयमेव सार्थकं विदधाति । केषाञ्चन विचारे च धार्मिकशिक्षया जनाः परोपकारेषु संलग्नाः भवितुं शक्नुवन्ति ।

४. **गद्यांशाधारेण उत्तरयत**

साम्प्रतिकं युगं वैज्ञानिकम् अस्ति । सम्प्रति वयं प्रतिदिनं सौविध्यसम्पन्नं जीवनं प्रति अग्रेसराः स्मः । शीघ्रगत्या जायमानैः वैज्ञानिकैः आविष्कारैः अस्माकं जीवनस्य यात्रा अपि सरला जायमाना वर्तते । प्राचीनकाले जनाः सुदूरमपि स्थानं पादाभ्यां गच्छन्ति स्म । परन्तु सम्प्रति बसयान-कारयान-वायुयानादिभिः गमनागमन-व्यवहारः सुकरः वर्तते । बस-कार-रेल-विमानादीनि सर्वाण्यपि यानानि विज्ञानस्यैव आविष्कार भूतानि सन्ति । सम्प्रति पृथिव्याः सर्वेषु भागेषु स्थितानां जनानां मध्ये पारस्परिकी वार्ता अपि झटिति सम्भवति । एतदर्थं चलभाषदूरभाषादयः सन्ति । सन्देशाः तु अन्तःसञ्जालादिमाध्यमेनापि प्रेषयितुं शक्यन्ते । विज्ञानस्य लाभेन साम्प्रतिकः जनः सन्तुष्टः अस्ति । जनस्य सुविधायै अत्र भोजननिर्माणाय विद्युच्चुल्लिः, चलदृश्यावलोकनाय समाचारज्ञानाय च आकाशवाणी-दूरदर्शनादयः आविष्काराः सर्वसुलभाः सन्ति । एकयैव विद्युच्छक्त्या अत्र बहूनि कार्याणि सम्पद्यन्ते । विद्युद्दीपकस्य प्रकाशे वयं कार्यं कर्तुं शक्नुमः चेत् विद्युच्छक्त्या शीतम् उष्णम्, उष्णम् शीतञ्च विधातुं पार्यते । गृहव्यवहारे, चिकित्सायाम्, यातायातकर्मणि, कृषिक्षेत्रे, शिक्षणक्षेत्रे च कार्यसौकर्याय विज्ञानस्यैव आविष्काराणामुपयोगः विधीयते । साम्प्रतिकः समाजस्तु विज्ञानस्य उपयोगे अभ्यस्तः एव दृश्यते । कार्याणि शीघ्रं सम्पादयितुमपि विज्ञानेन आविष्कृतानि साधनानि प्रयुज्यन्ते । वैज्ञानिकानाम् आविष्काराणां दुरुपयोगेन महती हानिः भवति चेत् सदुपयोगेन मानवः नैकप्रकारकान् लाभान् प्राप्तुं शक्नोति । अतः विज्ञानस्य उपयोगः सर्वेषां हिताय भवतु, तेनैव पूर्णतया सन्तुष्टिः अवाप्यते, नो चेत् सर्वविनाशः ।

(क) परस्परं मेलयत

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| भोजननिर्माणाय | मुद्रणयन्त्रम् |
| चलदृश्यावलोकनाय | दूरभाषः |
| आकाशे उड्डयनाय | विद्युच्चुल्लिः |
| भारवाहनाय | विमानम् |
| मुद्रणाय | आकाशवाणी |
| वार्ताकरणाय | दूरदर्शनम् |
| सन्देशप्रेषणाय | भारवाहयानम् |
| समाचारादिश्रवणाय | अन्तःसञ्जालम् |
| | भोजनपात्रम् |

**(ख) पाठाधारेण समीचीनकथने (√), असमीचीनकथने च (×) चिह्नं दत्त**

(अ) सर्वे वैज्ञानिकाविष्काराणां दुरुपयोगं कुर्वन्ति । ( )

(आ) विद्युच्छक्त्या बहूनि कार्याणि सम्पद्यन्ते । ( )

(इ) प्राचीनकाले जनाः सुदूरमपि स्थानं रेलयानेन गच्छन्ति स्म । ( )

(ई) साम्प्रतिकः समाजः विज्ञानस्य उपयोगे अभ्यस्तः दृश्यते । ( )

## लेखनम्

१. **शब्दं प्रयुज्य वाक्यानि रचयत**

सहिष्णुता, श्वश्रूणाम्, सामाजिकः, वैमनस्यम्, सहधर्मिणी, समाजः, अपमानम्, भावना, क्षमा, आचरणम् ।

२. **स्वस्य समाजं वर्णयित्वा सप्त वाक्यानि लिखत ।**

३. **तालिकायाः पदानि प्रयुज्य वाक्यानि रचयत**

| कर्ता | कर्म | क्रिया |
|---|---|---|
| त्वम् | वस्त्राणि | गच्छसि |
| यूयम् | पुस्तकम् | याचन्ते |
| छात्रः | दूरदर्शनम् | क्रीणीथ |
| वयम् | गृहम् | करोमि |
| बालाः | कक्षाकार्यम् | खादतः |
| अहम् | धान्यकणान् | गायथः |
| शुकौ | गीतम् | पश्यामः |
| युवाम् | मिष्टान्नम् | पठति |

४. **कोष्ठकाधारेण वाक्यानि परिवर्तयत**

(क) गुरुकुलीनः छात्रः वेदं पठति । (बहुवचने)

(ख) शोभनाः लेखकाः यथासमयं लिखन्ति । (एकवचने)

(ग) हरितः पक्षी सुन्दरं गीतं गायति । (द्विवचने)

(घ) ग्रामवासिनः स्वच्छं जलं पिबन्ति । (एकवचने)

५. **अधोलिखितस्य अनुच्छेदस्य अनुलेखनं कृत्वा शीर्षकं निर्धारयत**

व्यक्तीनां समूहः एव समाजो वर्तते । सर्वेषां मनुष्याणां कृते जीविकायै समाजस्य आवश्यकता भवति । समाजे मनुष्याः परस्परं मिलित्वा वसन्ति, आवश्यकतानुसारेण कार्यं च सम्पादयन्ति । तत्र सज्जना अपि भवन्ति दुर्जनाः अपि । सज्जनैस्ते सन्मार्गे नेतव्याः । यदि इत्थं क्रियते चेत् समाजसेवा भवति । सर्वैर्मिलित्वा विद्यालयस्य स्थापना विधेया । तथैव विकाससम्बद्धानि कार्याणि कर्तव्यानि । ततः समाजस्य विकासः सम्भवति । समाजस्य विकासेन एव राष्ट्रस्य विकासः जायते ।

६. **समाजस्य विकासाय किं किं कर्तुं शक्यते ? सूचीं निर्माय प्रदर्शयत ।**

७. **मञ्जूषासाहाय्येन रिक्तस्थानं पूरयत**

| मञ्जूषा |
| --- |
| चालयन्ति, पाययति, पाठयति, दापयति, स्थापयति, गमयति, मारयति, स्नापयति |

(क) माता शिशुं दुग्धं .................. ।

(ख) ऋषिका भगिनीं .................. ।

(ग) संस्कृतग्रामः जनान् संस्कृतं .................. ।

(घ) चालकः यात्रिणः दूरदेशं .................. ।

(ङ) वैज्ञानिकाः यन्त्रं .................. ।

(च) सेवकः शिशुं गृहाद् बहिः .................. ।

(छ) पशुचिकित्सकः रुग्णकुक्कुटान् .................. ।

(ज) समाजसेवकः दीनेभ्यः वस्त्राणि .................. ।

८. **मञ्जूषासाहाय्येन अनुच्छेदे रिक्तस्थानं पूरयत**

............. वेदाद् एव धर्मार्थकाममोक्षाख्यान् ............. विदन्ति ।पुरा वेदः ............. एव आसीत् । अस्य एकत्र लिपिबद्धं ............. नासीत् । श्रवणपरम्परया अस्य अध्ययनं ............. ।ज्ञानस्य उपदेशनाद्धा वेदस्य अपरमेकं ............. 'आम्नायः' च वर्तते ।वेदानां समग्रतया अध्ययनाय वेदाङ्गानां च ............. अनिवार्यं वर्तते । ............. वेदस्य अध्ययनयेनैव मानवः पूर्णः ............. भवति ।

**शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।**
**छन्दोविचितिरित्येष षडङ्गो वेद उच्यते ॥**

| मञ्जूषा |
| --- |
| अध्ययनम्, ग्रन्थस्वरूपम्, पुरुषार्थान्, वेदज्ञः, एकः, नाम, षडङ्गस्य, इति, भवति स्म, जनाः |

## व्याकरणानुशीलनम्

१. वर्णानां बाह्यप्रयत्नान् पठत

बाह्यप्रयत्नः एकादशविधः भवति, यथा -

| विवारः, श्वासः, अघोषः | संवारः, नादः, घोषः | अल्पप्राणः |
| --- | --- | --- |
| क ख श | ग घ ङ य | क ग ङ य |
| च छ ष | ज झ ञ व | च ज ञ व |
| ट ठ स | ड ढ ण र | ट ड ण र |
| त थ | द ध न ल | त द न ल |
| प फ | ब भ म ह | प ब म |

**महाप्राणः**

ख घ श

छ झ ष

ठ ढ स

थ ध ह

फ भ

**उदात्तः, अनुदात्तः, स्वरितः**

अ इ उ ऋ लृ

ए ओ ऐ औ

२. अधस्तनान् प्रश्नान् उत्तरयत

(क) सवर्णस्य बाह्यप्रयत्नाः के ?

(ख) के वर्णाः संवाराः, नादाः, घोषाः, महाप्राणाः च ?

(ग) ग-ड-ब-वर्णानां बाह्यप्रयत्नाः के ?

(घ) लृवर्णस्य बाह्यप्रयत्नाः के ?

(ङ) लकारः अल्पप्राणः महाप्राणः वा ?

## ३. रिक्तस्थानं पूरयत

(क) बाह्यप्रयत्नः ................विधः भवति ।

(ख) खकारस्य बाह्यप्रयत्नाः ................ सन्ति ।

(ग) हकारः .................. प्राणः अस्ति ।

(घ) मकारस्य बाह्यप्रयत्नाः ................. भवन्ति ।

(ङ) उकारस्य बाह्यप्रयत्नाः ............... सन्ति ।

## ४. परस्परं मेलयत

| | |
|---|---|
| विवारः, श्वासः, अघोषः, अल्पप्राणः | स |
| विवारः, श्वासः, अघोषः, महाप्राणः | ज |
| संवारः, नादः, घोषः, अल्पप्राणः | ए |
| संवारः, नादः, घोषः, महाप्राणः | प |
| उदात्तः, अनुदात्तः, स्वरितः | ढ |

## ५. उपसर्गाणां योजनेन शब्दनिर्माणप्रक्रियां पठत

उपसर्गः

| | | |
|---|---|---|
| वि | रोधः | विरोधः = विरोधनम् |
| अव | | अवरोधः = विघ्नोत्पादनम् |
| प्रति | | प्रतिरोधः = प्रतिकरणम् |
| अनु | | अनुरोधः = निवेदनम् |
| नि | | निरोधः = नियन्त्रणम् |

अत्र 'रोधः' मूलशब्दे वि-अव-प्रति-अनु-निवर्णानां संयोजनेन शब्दस्य अर्थे परिवर्तनं जातमस्ति । शब्दस्य अर्थपरिवर्तकाः एतादृशाः वर्णाः वर्णसमूहा वा उपसर्गाः कथ्यन्ते । अर्थस्य उत्कर्षः, अपकर्षः विकर्षो वा उपसर्गाणां कार्यं भवति । अत एव व्याकरणग्रन्थेषु उक्तम् –

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।**
**प्रहाराऽऽहारसंहारविहारपरिहारवत् ॥**

| उपसर्गाः | निर्मितशब्दाः | उदाहरणानि |
|---|---|---|
| अति | अतिवृष्टिः | वनविनाशस्य परिणामः अतिवृष्टिः अपि भवति । |
| अधि | अधिवेशनम् | संसदः अधिवेशनं चलति । |
| अनु | अनुच्छेदः | पाठस्य अनुच्छेदः सरलो वर्तते । |
| अप | अपराधः | अपराधः प्रतिष्ठाम् अपकर्षति । |
| अभि | अभिभावकः | अभिभावकः छात्रं निर्दिशति । |
| अव | अवरोधः | मार्गे अवरोधस्य कारणाद् अद्य यानं न आगच्छत् । |
| आ | आगमनम् | गुरोः आगमनं प्रियं भवति । |
| उत्/उद् | उन्नतिः | समाजसेविनां सर्वत्र उन्नतिः भवति । |
| उप | उपयोगः | परीक्षायां लेखन्याः उपयोगो विधीयते । |
| दुर्/दुस् | दुर्घटना | दुर्घटना शोकं जनयति । |
| नि | नियमः | नियमः सर्वेषु समानो भवति । |
| निर्/निस् | निरीक्षणम् | निरीक्षकः निरीक्षणं करोति । |
| परा | परामर्शः | शिक्षकाणां परामर्शः अद्यापि चलति । |
| परि | परिपत्रम् | प्रधानाध्यापकः परिपत्रं प्रेषयति । |
| प्र | प्रयोगः | शास्त्रस्य व्यवहारे प्रयोगः उत्तमः भवति । |
| प्रति | प्रतिनिधिः | संयुक्तराष्ट्रसङ्घे नेपालस्य प्रतिनिधिः वर्तते । |
| वि | विज्ञानम् | विज्ञानं जीवनं सुकरं करोति । |
| सम् | सङ्कलनम् | शोधार्थी ग्रन्थानां सङ्कलनं करोति । |
| सु | सुशासनम् | सुशासनं जनतायाः अभीष्टं वर्तते । |

६. **प्रदत्तान् उपसर्गान् प्रयुज्य एकैकं शब्दनिर्माणं कुरुत**

**प्र, परा, अप, सम्, अनु, अव, निस्, निर, दुस्, दुर्, वि, आ/आङ्, नि, अधि, अति, सु, उत्, अभि, प्रति, परि, उप ।**

यथा-

कारः →

| | | |
|---|---|---|
| प्र | - | प्रकारः |
| अप | - | ............ |
| सम् | - | ............ |
| वि | - | ............ |
| आ | - | ............ |
| अधि | - | ............ |
| प्रति | - | ............ |
| परि | - | ............ |
| उप | - | ............ |

७. **अधस्तनेभ्यः पदेभ्यः उपसर्गान् पृथक् कुरुत**

प्रसिद्धः, विचारणीयम्, प्रधानम्, प्रकारेण, प्राप्तुम्, आरुह्य, परिचायकम्, सम्पन्नता, निश्चिन्वन्ति, प्रायच्छत्, अवकरः, संस्कृतम्, परियोजना ।

८. **निर्देशानुसारेण वाक्यानि पूरयत**

(क) कृष्णबहादुरः ग्रामात् .................. । (आ + गम्, लट्)

(ख) अस्मिन् वर्षे .................. वर्षणम् अभवत् । (अति + अधिकम्)

(ग) रीतेशः कक्षायाम् .................. नास्ति । (उप + स्था + क्त)

(घ) गोसाइँकुण्डतः त्रिशूली नदी .................. । (उत् + भू + लट्)

९. **पुरुषवचनानि विचार्य अधस्तनानि रूपाणि पठत**

| **तत्-शब्दः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः पुरुषः | सः/सा/तत् | तौ/ते/ते | ते/ताः/तानि |
| मध्यमः पुरुषः | त्वम् | युवाम् | यूयम् |
| उत्तमः पुरुषः | अहम् | आवाम् | वयम् |

| अस्-धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमः पुरुषः | असि | स्थः | स्थ |
| उत्तमः पुरुषः | अस्मि | स्वः | स्मः |

१०. अस्धातोः रूपाणि प्रयुज्य रिक्तस्थानं पूरयत

(क) अहम् छात्रा ............. ।

(ख) तौ नायकौ ............... ।

(ग) तानि मित्राणि ............. ।

(घ) यूयं अनुजाः .......... ।

(ङ) आवाम् बालकौ ............ ।

## कोषानुशीलनम्

### लक्ष्म्याः नामानि

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥१॥
इन्दिरा लोकमाता मा क्षीरोदतनया रमा ॥२॥
भार्गवी लोकजननी क्षीरसागरकन्यका ॥३॥
शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनम् ॥४॥
कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ॥५॥

### गरुडस्य नामानि

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ॥१॥
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥२॥

### शिवस्य नामानि

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ॥१॥
ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ॥२॥
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ॥३॥
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥४॥

उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ॥५॥
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥६॥
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ॥७॥
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥८॥
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ॥९॥
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥१०॥
अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः ॥११॥

## पदानुशीलनी

**लक्ष्म्याः चतुर्दश नामानि** – (अत्र सर्वाणि नामानि स्त्रीलिङ्गे) लक्ष्मीः, पद्मालया, पद्मा, कमला, श्रीः, हरिप्रिया, इन्दिरा, लोकमाता, मा, क्षीरोदतनया, रमा, भार्गवी, लोकजननी, क्षीरसागरकन्यका ।

**गरुडस्य नव नामानि** – (अत्र सर्वाणि नामानि पुंलिङ्गे) गरुत्मान्, गरुडः, तार्क्ष्यः, वैनतेयः, खगेश्वरः, नागान्तकः, विष्णुरथः, सुपर्णः, पन्नगाशनः ।

**शिवस्य अष्टचत्वारिंशद् नामानि** – (अत्र सर्वाणि नामानि पुंलिङ्गे) शम्भुः, ईशः, पशुपतिः, शिवः, शूली, महेश्वरः, ईश्वरः, शर्वः, ईशानः, शङ्करः, चन्द्रशेखरः, भूतेशः, खण्डपरशुः, गिरीशः, गिरिशः, मृडः, मृत्युञ्जयः, कृत्तिवासाः, पिनाकी, प्रमथाधिपः, उग्रः, कपर्दी, श्रीकण्ठः, शितिकण्ठः, कपालभृत्, वामदेवः, महादेवः, विरूपाक्षः, त्रिलोचनः, कृशानुरेताः, सर्वज्ञः, धूर्जतिः, नीललोहितः, हरः, स्मरहरः, भर्गः, त्र्यम्बकः, त्रिपुरान्तकः, गङ्गाधरः, अन्धकरिपुः, क्रतुध्वंसी, वृषध्वजः, व्योमकेशः, भवः, भीमः, स्थाणुः, रुद्रः, उमापतिः, अहिर्बुध्न्यः, अष्टमूर्तिः, गजारिः, महानटः ।

## अभ्यासः

१. अधस्तनं पद्यं शुद्धम् उच्चरत
   गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।
   नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥
२. लक्ष्म्याः दश नामानि पृथक् पृथक् लिखत ।
३. तार्क्ष्यः इति कस्य नाम ?
४. शिवस्य नाम्नां पङ्क्तिद्वयं विलिख्य नामानि पृथक् लिखत ।
५. मा-शब्दः कस्मिन् लिङ्गे अस्ति ?

६. **रिक्तस्थानं पूरयत**

शम्भुरीशः .......... शिवः ....... महेश्वरः ।

ईश्वरः ...... ईशानः शङ्करश्चन्द्रशेखरः ॥

........ खण्डपरशुर्गिरीशो ........... मृडः ।

............ कृत्तिवासाः ....... प्रमथाधिपः ॥

७. **उदाहरणानुसारेण कमला-शब्दस्य रूपावलीं पूरयत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | कमला | कमले | कमलाः |
| द्वितीया | कमलाम् | ........ | कमलाः |
| तृतीया | कमलया | कमलाभ्याम् | कमलाभिः |
| चतुर्थी | कमलायै | ........ | कमलाभ्यः |
| पञ्चमी | कमलायाः | ........ | ........ |
| षष्ठी | ........ | कमलयोः | कमलानाम् |
| सप्तमी | कमलायाम् | ........ | ........ |
| सम्बोधनम् | हे कमले ! | ........ | ........ |

८. **इन्दिरा-शब्दस्य रूपावलीं लिखत ।**

९. **प्रदत्तैः पदैः वाक्यानि रचयत** - लक्ष्मीः, सुपर्णः, हरः ।

१०. **पर्यायान् परस्परं मेलयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| पिनाकी | भार्गवी |
| पद्मा | शूली |
| वैनतेयः | उमापतिः |
| महानटः | सुपर्णः |

**प्रतिभाप्रदर्शनाभ्यासः**

आत्मना दृष्टस्य, श्रुतस्य सम्मिलितस्य वा कस्यापि कार्यक्रमस्य विषये सङ्क्षेपेण विलिख्य शिक्षकं दर्शयत ।

# चतुर्थः पाठः

## पित्रे पत्रम्

देवर्षिगुरुकुलम्
चारपाने, झापा
२०७७।११।०४ श्रीपञ्चमी

पितृवर्यस्य चरणकमलयोः सादरं प्रणतिः ।

अत्र कुशली अस्मि । तत्रापि सर्वेषां शं कामये । भवद्भिः प्रेषितं कृपापत्रं ह्यः अलभे । तत्रत्यं निखिलं वृत्तान्तं समधिगम्य नितरां प्रसन्नः अस्मि । पितृचरणानां शैत्यजः काशः अपसृत इति विज्ञाय सन्तोषम् अनुभवामि ।

इदानीं षष्ठ्याः कक्षायाः वार्षिकपरीक्षायै प्रवृत्तः अस्मि । परीक्षा समीचीना भविष्यतीति बलवान् विश्वासः वर्तते । अत्र गुरुकुले आगत्य बहुप्रकारैः लाभान्वितः अभवम् । ज्ञानम्, चरित्रनिर्माणम्, आरोग्यरक्षणोपायं च अहं सम्यग् अजानाम् । मम दिनचर्या आमूलं परिवर्तिता । अनुशासनस्य पालने अभ्यस्तः अस्मि । नित्यकर्मसम्पादनम् अनु ईशवन्दन-पठन-लेखन-सदाचारपालनादिकार्यैः दिनानि यान्ति । अवशिष्टः समयः भोजनाय, क्रीडनाय च भवति, नान्यस्मै । अत्र गुरुवर्यैः ये शिक्ष्यन्ते, ते प्रतिपलं स्वान्तं मुदा भरन्ति । सुहृदां व्यवहारः अपि नास्ति कश्चिद् असाधुः । अन्येभ्यः विद्यालयेभ्यः गुरुकुलं विशेषं वर्तते । विद्यालयः अयं ज्ञानं यच्छति, शास्त्रं च शिक्षयति । युगपदेव सदाचारपालनाय च प्रेरयति । एतद् अन्यत्र दुर्लभम् । समये समये विदुषां प्रवचनमपि सातिशयं लाभदायकं भवति । पूर्वं मानसे ईषद् भीतिः आसीत् । इदानीं सर्वं भयम् अपगतम् । अत्र पठित्वा स्वात्मानं धन्यं मन्ये ।

मातुः चरणयोः नित्यं प्रणतिः वाच्या । भ्रातरि स्नेहराशिः भगिन्याम् आशीः च अस्ति । भवतां स्नेहभरितानि कृपापत्राणि अहर्निशं मम मानसं मोदयन्ति । मम विषये कापि चिन्ता न कर्तव्या । विद्याध्ययनं समाप्य भवतां सेवायै सान्निध्यसुखाय च गृहम् आगमिष्यामि एव ।

आशीर्वादाकाङ्क्षी सूनुः
विजयः

पत्रमञ्जूषा

| प्रेषकः | प्रापकः | पत्रचिटिका |
| --- | --- | --- |
| छिरिङ तामाङः | सोनामः तामाङः | |
| चारपाने-२, झापा | सल्लेरी-५, सोलुखुम्बु | |
| प्रदेशः - १ | प्रदेशः - १ | |
| नेपालः | नेपालः | |

## शब्दार्थाः

| | | |
| --- | --- | --- |
| शम् | = | मङ्गलम्, कल्याण |
| अलभे | = | आप्नवम्, पाएँ |
| निखिलः | = | सम्पूर्ण, सबै |
| वृत्तान्तः | = | वार्ता, समाचार |
| समधिगम्य | = | ज्ञात्वा, जानेर |
| नितराम् | = | अत्यन्तम्, अत्यन्त |
| प्रसन्न | = | मोदितमनः, हृदय प्रसन्न भएको |
| शैत्यजः | = | शीतजः, चिसोबाट भएको |
| काशः | = | क्षवः, खोकी |
| अपसृतः | = | दूरीभूतः, हटेको |
| प्रवृत्तः | = | क्रियाशीलः, लागिरहेको |
| सम्यग् | = | सुष्ठु, राम्ररी |
| अजानाम् | = | अबुध्ये, थाहा पाएँ |
| दिनचर्या | = | दैनिकजीवनम्, दैनिकी |
| यज्ञानुष्ठानम् | = | होमपूजादिकर्म, होमपूजा आदि कार्य |
| यान्ति | = | गच्छन्ति, बित्दछन्/जान्छन् |
| स्वान्तम् | = | मानसम्, मन |
| मुदा | = | हर्षेण, खुसीले |
| असाधुः | = | अनुचितः, नराम्रो |
| युगपत् | = | सह एव, एकै पटक |

ईषत् = स्वल्पम्, अलिअलि
वाच्या = वक्तव्या, भनियोस्
अहर्निशम् = दिवा नक्तम्, रातदिन
मोदयन्ति = प्रसादयन्ति, प्रसन्न गराउँछन्
सूनुः = पुत्रः, छोरो

## अभ्यासः

### श्रवणं भाषणं च

१. **अधो लिखितानि समस्तपदानि पृथक्कृत्य लिङ्ग-वचन-विभक्तीः सम्मेल्य उच्चारयत**
यथा- वार्षिकपरीक्षायै = वार्षिक्यै परीक्षायै
पितृचरणानाम्, चरित्रनिर्माणम्, अवशिष्टः, सदाचारपालनाय, भ्रातरि, भगिन्याम्

२. **शिक्षकात् पाठं श्रुत्वा पाठस्य विषयवस्तु श्रावयत ।**

३. **सतीर्थ्यात् पाठस्य प्रथमानुच्छेदं श्रुत्वा तत्र प्रयुक्तानि बहुवचनबोधकानि पदानि उच्चारयत ।**

४. **अधो लिखितेषु पदेषु पदसङ्ख्यां वदत**
यथा- बहुप्रकारैः = द्वे

आरोग्यरक्षणोपायम् = .......................

नित्यकर्मसम्पादनम् = .......................

चरित्रनिर्माणम् = .......................

प्रवचनमपि = .......................

स्नेहभरितानि = .......................

विद्याध्ययनम् = .......................

५. **अधो लिखितं गद्यखण्डं श्रुत्वा कोष्ठस्य पदानां साहाय्येन लेखकप्रेषकौ वदत**
अहम् एकमासतः अस्वस्था अस्मि । समये समये उदरपीडा भवति । प्रतिवेशिनः त्वाम् आकारयितुं परामृशन्ति । ते वदन्ति, “यः विषमकाले मातरं न सेवते, सः कथं पुत्रः

भवति ?" तव वृत्तौ विघ्नः न उद्भवेदिति कामये । परम् उपचाराय मां चिकित्सालये कः नयेदिति पुनः चिन्तयामि । सर्वं जानासि इति जानामि । यद् उचितं तत् कुरु ।

## लेखक-प्रेषकौ

**(अग्रजानुजौ/अनुजाग्रजौ/मातृपुत्रौ/पितृपुत्रौ/मित्रमित्रे/पितृव्यभ्रातृजौ/भ्रातृजपितृव्यौ)**

### पठनम्

१. **अधो लिखितं गद्यांश पठित्वा उत्तरं दत्त ।**

दिनाङ्कः - २०७७।१०।०२

श्रीमान् व्यवस्थापकमहोदयः,
सरस्वतीप्रकाशनागारः,
काष्ठमण्डपः ।

**विषयः - पुस्तकप्रेषणार्थम् अनुरोधः ।**

भवतः प्रकाशनसंस्थया 'सरलसंस्कृतव्याकरणशलाका' इति नामकं पुस्तकं प्रकाशितम् । एतत् मिति श्रुत्वा हर्षमनुभवामि । विद्यार्थिनां कृते एतद् अतीव उपयोगि अस्तीति श्रुतवान् अस्मि । अस्माकं विद्यालयस्य विद्यार्थिनः तत् प्राप्तुम् इच्छन्ति । तैः एतदर्थम् अहं वारंवारम् अनुरुद्धः अस्मि । पुस्तकक्रयणाय वित्तमपि सङ्कलितं वर्तते । वयं पञ्चाशत् पुस्तकानि क्रेतुं तत्पराः स्मः । पुस्तकानि सन्ति चेत् भवतः संसूचनं प्रतीक्षामहे । ततः लिखितोत्तरस्य प्राप्तेः अनुपदमेव वित्तं द्रुतसेवया प्रेषयिष्यामः ।

गुरुदयालः कौशिकः
प्रधानाध्यापकः
अमरभारती-विद्यासदनम्, धनगढी

**प्रश्नाः**

(क) सरस्वतीप्रकाशनागारेण किं प्रकाशितम् ?
(ख) विद्यार्थिनः किम् इच्छन्ति ?
(ग) कैः प्रधानाध्यापकः वारंवारम् अनुरुद्धः ?
(घ) किमर्थं वित्तं सङ्कलितम् अस्ति ?

(ङ) वित्तं कया सेवया प्रेषयिष्यते ?

(च) पाठस्थस्य पत्रस्य प्रेषकः प्रापकः च कौ ?

२. **अधो लिखितानुच्छेदं द्रुतं पठित्वा उचितं शीर्षकं दत्त**

पत्राणां बहुप्रकाराः भवन्ति । वैयक्तिकम्, विद्यालयीयम्, कार्यालयीयं चेति प्रमुखाः प्रकाराः सन्ति । वैयक्तिकमपि पत्रं नैकविधं भवति । पिता पुत्राय लिखति, पुत्रः अपि पित्रे लिखति । पुत्रः मात्रे, माता पुत्राय च लिखति । मातुलाः मातुल्यः अपि भागिनेयान् भागिनेयीः च सम्बोध्य लिखितुं शक्नुवन्ति । तथैव ते च लेखनाय तत्पराः भवन्ति । पतिपत्न्योः मध्ये अपि पत्रव्यवहारः भवति । सामान्येन एकः परिचितः अपरं परिचितं सम्बोध्य पत्रं लिखति । तद् वैयक्तिकं बोद्धव्यम् । पत्रलेखनमपि एकं कौशलं मन्यते । कौशलेन लिखितं पत्रं साहित्यं भवति । विश्वसाहित्यस्य कानिचन उदाहरणानि पत्रलेखनाद् एव प्रख्यातानि सन्ति । पत्राणि सूचनां ददति, सम्बन्धं दृढं कुर्वन्ति, सौमनस्यं च वर्धयन्ति । बहवः पत्रलेखननिष्णाताः साहित्यकाररूपेण परिचिताः दृश्यन्ते ।

३. **मित्राय लिखितं पत्रं पठित्वा तव विद्यालयस्य वार्षिकोत्सवविषये कक्षायां परामर्शं कुरुत**

गौरीनगरम्-७, काष्ठमण्डपः

दिनाङ्कः - २ कार्तिकः २०६८

**प्रिय मित्र !**

**सुमधुरं स्मरणम् ।**

अत्र अहं कुशली अस्मि । आशासे, तत्रापि सर्वं कुशलं भवेत् । सप्ताहस्य पूर्वं तव पत्रं प्राप्तवान् आसम् । तव जापानभ्रमणस्य विषये पठित्वा मनः अतीव प्रसन्नम् अभवत् । यदा तव पत्रं प्राप्तवान्, तदा अहम् अत्यन्तं व्यस्तः आसम् । अतः इदानीं तव पत्रस्य प्रत्युत्तरं लिखन् अस्मि ।

अत्र अस्माकं विद्यालये सप्ताहव्यापी वार्षिकोत्सवः ह्यः एव समाप्तः । एकमासपूर्वतः खलु सर्वे छात्राः, वयं शिक्षकाः च कार्यक्रमस्य पूर्वाभ्यासे संलग्नाः आस्म । शिक्षामन्त्री कार्यक्रमस्य मुख्यातिथिः आसीत् । स अस्माकं विद्यालयस्य प्रशंसां कृतवान् । तस्य एव हस्ताभ्याम् अहं

तत्र उत्कृष्टशिक्षणस्य कृते पारितोषिकं प्राप्तवान् । कश्चित् नवीनः समाचारः भविष्यति चेद् अवश्यमपि आगामिनि पत्रे उल्लेखिष्यामि । त्वमपि समये समये पत्रं प्रेषय । तत्र तव पितृभ्यां प्रणतिः, अनुजाय च आशिषः सन्तु । धन्यवादः ।

तव स्नेही सखा

रामनारायणः थारू

## लेखनम्

१. **अधो लिखितानि पदानि अभ्यासपुस्तिकायां लिखत**

कृपापत्रम्, शैत्यजः समीचीनाः, आमूलम्, अभ्यस्तः, स्वान्तम्, सुहृदाम्, सातिशयम्, स्नेहराशिः, सान्निध्यसुखाय

२. **भिन्नभिन्नवाक्येषु प्रयोगं कुरुत**

प्रणतिः, तत्रत्यम्, आगत्य, ईशवन्दनम्, अवशिष्टः, गुरुवर्यैः, शिक्षयति, वाच्या, कृपापत्राणि, मोदयन्ति, आशीः

३. **परस्परं योजयत**

| | |
|---|---|
| निखिलः | विश्वासः |
| बलवान् | परिवर्तिता |
| अवशिष्टः | अजानाम् |
| अहम् | वृत्तान्तः |
| दिनचर्या | समयः |
| दिनानि | पठन्ति |
| प्रवचनम् | लाभदायकम् |
| | यान्ति |

४. **अतिसङ्क्षिप्तानि उत्तराणि लिखत**

(क) विनयः किमर्थं प्रसन्नः अस्ति ?

(ख) गुरुकुले दिनानि कथं यान्ति ?

(ग) अन्येभ्यः विद्यालयेभ्यः गुरुकुलं कथं विशेषम् अस्ति ?

(घ) कुत्र पठित्वा धन्यः भवितुं शक्यते ?

(ङ) कानि कस्य मानसं मोदयन्ति ?

**५. अधो लिखितानां पदानां लिङ्ग-वचन-विभक्तीः निर्दिशत**

| यथा- अपसृतः | लिङ्गम् | वचनम् | विभक्तिः |
|---|---|---|---|
| | पुंलिङ्गम् | एकवचनम् | प्रथमा विभक्तिः |
| दिनानि | | | |
| व्यवहारः | | | |
| एतद् | | | |
| प्रणतिः | | | |
| सेवायै | | | |

**६. अधस्तने वैयक्तिकपत्रे मञ्जूषायाः पदैः रिक्तस्थानं पूरयत**

देवघट्टधाम्नः

तिथयः ०६/०४/२०१२

**पूज्यौ पितरौ !**

**सादरं** ......... ।

अत्र कुशलं तत्रास्तु । भवतोः कृते कर्षस्य समाचारः अस्ति यत्, अहं........ परीक्षायां ............ स्थानं ......... । एतेन गुरुकुले स्वामिवर्याः अपि ........... सन्ति । सर्वे गुरवः ........... च मां प्रशंसन्ति । रामनवम्यां गुरुकुलस्य वार्षिकोत्सवे अहं ............. अपि प्राप्स्यामि । सम्प्रति अत्र संस्कृतसम्भाषणशिविरं .......... । अतः अवकाशः नास्ति । आश्विन-मासे विजयादशम्याः ........... अवश्यं ............ आगमिष्यामि । अस्तु, लेखनाद् विरमामि ।

भवतोः तनयः

राजः शर्मा

वार्षिक्याम्, गृहम्, चरणस्पर्शः, मित्राणि, प्रचलति, प्रथमम्, अवसरे, प्राप्तवान्, पारितोषिकम्, सन्तुष्टाः

## व्याकरणानुशीलनम्

१. **सन्धिविषये अधो लिखितम् अनुच्छेदं पठत**

सन्धेः अर्थः मेलनं भवति । द्वयोः वर्णयोः मेलनं सन्धिः निगद्यते । वर्णयोः अत्यन्तं सामीप्यं संहिता भवति । संहितया विना सन्धिः न सम्भवति । शब्दयोः पदयोः वा आद्यन्तवर्णयोः परस्परं संयोजनेन सन्धिः भवति ।

**सन्धिः त्रिविधः -** स्वरसन्धिः, व्यञ्जनसन्धिः, विसर्गसन्धिश्च ।

**स्वरसन्धिः –** एकस्य स्वरस्य अपरेण स्वरेण सह मेलनं स्वरसन्धिः भवति । यथा- दैत्य+अरिः = दैत्यारिः

**व्यञ्जनसन्धिः –** एकस्य व्यञ्जनस्य अपरेण व्यञ्जनेन स्वरेण वा सह मेलनं व्यञ्जनसन्धिः भवति । यथा - दिक्+नागः = दिङ्नागः

**विसर्गसन्धिः –** विसर्गस्य स्वरेण व्यञ्जनेन वा सह मेलनं विसर्गसन्धिः भवति । यथा- नरः+अयम् = नरोऽयम्, धनुः+टङ्कारः = धनुष्टङ्कारः

एतेषां सन्धीनामपि उपभेदाः भवन्ति ।

तेषु दीर्घसन्धेः अभ्यासं कुरुत

**दीर्घसन्धिः**

अ+अ/ अ+आ/ आ+अ/ आ+आ= आ

सुख+अन्तः = सुखान्तः, छात्र+आवासः = छात्रावासः, विद्या+अर्थी = विद्यार्थी, विद्या+आलयः = विद्यालयः

इ/ई+ इ/ई = ई

कवि+इन्द्रः = कवीन्द्रः, गिरि+ईशः = गिरीशः, मही+ इन्द्रः = महीन्द्रः, नारी+ ईश्वरः = नारीश्वरः

उ/ऊ+उ/ऊ = ऊ

भानु+उदयः = भानूदयः, लघु+ऊर्मिः = लघूर्मिः, वधू+उत्साहः = वधूत्साहः, भू+ऊर्ध्वः = भूर्ध्वः

ऋ+ऋ= ॠ

पितृ+ऋणम्= पितॄणम्

२. **सन्धिगतं रूपं दर्शयत**

तथा+अपि ..........  कवि+इन्द्रः ..........

सती+ईशः ............  परम+अर्थः ...........

शिशु+उत्साहः ..........  विधु+उदयः ..............

कपि+ईशः ..........  मातृ+ऋजुता ............

३. **सन्धिविच्छेदं कुरुत**

अधीशः ................  मुरारिः ...................

हिमालयः ...................  गुरूपदेशः ....................

लक्ष्मीन्दुः ...................  महाशयः ..................

सिन्धूर्मिः .................  देवालयः .................

४. **तालिकायाः रूपाणि पठत**

| **लट्लकारः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **भू-धातुः**<br>प्रथमः पुरुषः | भवति | भवतः | भवन्ति |
| मध्यमः पुरुषः | भवसि | भवथः | भवथ |
| उत्तमः पुरुषः | भवामि | भवावः | भवामः |
| **गम्-धातुः**<br>प्रथमः पुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमः पुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमः पुरुषः | गच्छामि | गच्छावः | गच्छामः |

| **पूज्-धातुः** | | | |
|---|---|---|---|
| प्रथमः पुरुषः | पूजयति | पूजयतः | पूजयन्ति |
| मध्यमः पुरुषः | पूजयसि | पूजयथः | पूजयथ |
| उत्तमः पुरुषः | पूजयामि | पूजयावः | पूजयामः |

**५. निर्देशानुसारेण लट्लकारे क्रियारूपाणि पूरयत**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः पुरुषः | पश्यति | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | चलन्ति |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | ........ |
| मध्यमः पुरुषः | ........ | खेलथः | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | वदामः |
| प्रथमः पुरुषः | रचयति | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ ........ | |

६. कोष्ठकाधारेण लट्लकारस्य रूपैः रिक्तस्थानं पूरयत

(क) तत्र पुस्तकानि .............. । (भू-प्रथमपुरुषे)

(ख) अहं पण्डितः ................. । (अस्-उत्तमपुरुषे)

(ग) छात्राः पुस्तकं .............. । (पठ्-प्रथमपुरुषे)

(घ) यूयं नगरं .................... । (गम्-मध्यमपुरुषे)

(ङ) सा सरस्वतीं ............... । (पूज्-प्रथमपुरुषे)

## कोषानुशीलनम्

### अष्टसिद्धीनां नामानि

अणिमा महिमा चैव गरिमा लघिमा तथा ॥१॥
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥२॥

### उमायाः नामानि

उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥१॥
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ॥२॥
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥३॥
आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ॥४॥
कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका ॥५॥

### गणेशस्य नामानि

विनायको विघ्नराजद्वैमातुरगणाधिपाः ॥१॥
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ॥२॥

### कार्तिकेयस्य नामानि

कार्तिकेयो महासेनः शरजन्मा षडाननः ॥१॥
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥२॥
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ॥३॥
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥४॥

### इन्द्रस्य नामानि

इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः ॥१॥
वृद्धश्रवाः शुनासीरः पुरुहूतः पुरन्दरः ॥२॥
जिष्णुलेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ॥३॥
सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा ॥४॥
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ॥५॥
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥६॥
सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ॥७॥
आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रियाः ॥८॥

## पदानुशीलनी

**लिङ्गव्यवस्था -** अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे च (ङ) इति सङ्केतः प्रदत्तो वर्तते ।

**अष्टसिद्धीनां नामानि -** अणिमा (ख), महिमा (ख), गरिमा (ख), लघिमा (ख), प्राप्तिः (ख), प्राकाम्यम् (ग), ईशित्वम् (ग), वशित्वम् (ग) ।

**उमायाः सप्तदश नामानि -** (अत्र सर्वाणि नामानि स्त्रीलिङ्गे) उमा, कात्यायनी, गौरी, काली, हैमवती, ईश्वरी, शिवा, भवानी, रुद्राणी, शर्वाणी, सर्वमङ्गला, अपर्णा, पार्वती, दुर्गा, मृडानी, चण्डिका, अम्बिका, आर्या, दाक्षायणी, गिरिजा, मेनकात्मजा ।

**गणेशस्य अष्ट नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) विनायकः, विघ्नराजः, द्वैमातुरः, गणाधिपः, एकदन्तः, हेरम्बः, लम्बोदरः, गजाननः ।

**कार्तिकेयस्य सप्तदश नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) कार्तिकेयः, महासेनः, शरजन्माः, षडाननः, पार्वतीनन्दनः, स्कन्दः, सेनानीः, अग्निभूः, गुहः, बाहुलेयः, तारकजित्, विशाखः, शिखिवाहनः, षाण्मातुरः, शक्तिधरः, कुमारः, क्रौञ्चदारणः ।

**इन्द्रस्य पञ्चत्रिंशद् नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) इन्द्रः, मरुत्वान्, मघवा, विडौजाः, पाकशासनः, वृद्धश्रवाः, शुनासीरः, पुरुहूतः, पुरन्दरः, जिष्णुः, लेखर्षभः, शक्रः,

शतमन्युः, दिवस्पतिः, सुत्रामा, गोत्रभिद्, वज्री, वासवः, वृत्रहा, वृषा, वास्तोष्पतिः, सुरपतिः, बलारातिः, शचीपतिः, जम्भभेदी, हरिहयः, स्वाराट्, नमुचिसूदनः, सङ्क्रन्दनः, दुश्च्यवनः, तुराषाट्, मेघवाहनः, आखण्डलः, सहस्राक्षः, ऋभुक्षा ।

## अभ्यासः

१. अधस्तनं पद्यं शुद्धम् उच्चरत

अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाऽष्टसिद्धयः ॥

२. विनायकस्य पञ्च नामानि पृथक् पृथक् लिखत ।

३. 'अग्निभूः' इति कस्य नाम ?

४. कार्तिकेयस्य नाम्नां पङ्क्तिद्वयं विलिख्य नामानि पृथक् लिखत ।

५. तुषाराट्-शब्दः कस्मिन् लिङ्गे अस्ति ?

६. रिक्तस्थानं पूरयत

इन्द्रो मरुत्वान् ..... बिडौजाः ........ ।
........... शुनासीरः .......... पुरन्दरः ॥
जिष्णुलेखर्षभः ..... शतमन्युदिवस्पतिः ।
सुत्रामा ......... वज्री .... वृत्रहा .... ॥

७. उदाहरणानुसारेण भवानी-शब्दस्य रूपावलीं पूरयत

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भवानी | भवान्यौ | भवान्यः |
| द्वितीया | भवानीम् | ........ | भवानीः |
| तृतीया | भवान्या | भवानीभ्याम् | भवानीभिः |
| चतुर्थी | भवान्यै | ........ | भवानीभ्यः |
| पञ्चमी | भवान्याः | ........ | ........ |
| षष्ठी | ........ | भवान्योः | भवानीनाम् |
| सप्तमी | भवान्याम् | ........ | ........ |

| | | | |
|---|---|---|---|
| सम्बोधनम् | हे भवानि ! | ........ | ........ |

९. पार्वती-शब्दस्य रूपावलीं लिखत ।

१०. प्रदत्तैः पदैः वाक्यानि रचयत

गरिमा, गौरी, गजाननः, कुमारः, सुरपतिः ।

११. पर्यायान् परस्परं मेलयत

| 'अ' खण्ड | 'आ' खण्ड |
|---|---|
| अपर्णा | स्कन्दः |
| एकदन्तः | शचीपतिः |
| बाहुलेयः | विनायकः |
| वज्री | गौरी |

### प्रतिभाप्रदर्शनाभ्यासः

शिक्षकस्य साहाय्यम् अवाप्य अधो लिखितं श्लोकं पित्रा पुत्राय लिखितस्य सङ्क्षिप्तपत्रस्य स्वरूपे रूपान्तरयत

यद्यपि बहु नाधीषे तथापि पठ पुत्र ! व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥

# पञ्चमः पाठः

## संस्कृतस्य अभियन्ता



नेपालः देवभूमिः अस्ति । अयं देशः महर्षीणां तपोभूमिः, सिद्धानां साधनाभूमिः देवभाषायाः उद्गमभूमिः च अस्ति । संस्कृतं देवभाषा वर्तते । संस्कृते वेदाः वेदाङ्गानि पुराणानि दर्शनानि च विद्यन्ते । अतः संस्कृतं ज्ञानभाण्डागारम् अस्ति । संस्कृतस्य ज्ञानेन संसारम् आलोकयितुम् महापुरुषाः एव क्षमाः भवन्ति । नेपाले तादृशेषु संस्कृतप्रचारकेषु जनार्दनघिमिरे-महोदयस्य नाम सादरं गृह्यते । विद्यायाः, योगस्य, ध्यानस्य, भाषाणां च अभ्यासेन जनार्दनः विशिष्टः विद्वान् सञ्जातः आसीत् । सरलेन जीवनेन उन्नतेन विचारेण च जनार्दनः अनुकरणीयः आसीत् ।

जनार्दन-घिमिरे-महोदयस्य जन्म २०२७ तमे वैक्रमाब्दे भाद्रमासस्य त्रयोदशे दिनाङ्के भाद्रकृष्णात्रयोदश्याम् अभवत् । तस्य जन्मभूमिः दोलखामण्डलस्य कालिञ्चोकग्रामपालिकायाः हिलेपानीग्रामः अस्ति । स रत्नकुमारी-मुक्तिनाथयोः ज्येष्ठः सुपुत्रः आसीत् । आयुर्वेदस्य ज्ञाता अस्य पिता कविराजः आसीत् । जनार्दनः पितुः संस्कृतप्रेम्णा, संस्कृतज्ञानेन च अत्यन्तं प्रभावितः आसीत् ।

अनेकाभिः प्रतिभाभिः समन्वितः स बाल्याद् एव अध्ययने पटुः आसीत् । पितुः एव प्रारम्भिकीं शिक्षां गृहीतवान् । स जन्मभूमौ वर्तमानाद् हिलेपानी-संस्कृतमाध्यमिक-विद्यालयात् प्राथमिकीं शिक्षां गृहीतवान् । पश्चात् काष्ठमण्डपम् आगत्य सतीनधारासंस्कृतछात्रावासे अतिष्ठत् । तत्र स्थित्वा स संस्कृतमाध्यमिकविद्यालयाद् माध्यमिकीं शिक्षाम् उत्तीर्य वाल्मीकिविद्यापीठात् नव्यव्याकरणविषये उच्चशिक्षाम् अधिगतवान् । पश्चात् स त्रिभुवनविश्वविद्यालयतः संस्कृते

स्नातकोत्तरपरीक्षां च समुत्तीर्णवान् । बाल्याद् एव अतिरिक्तक्रियाकलापेषु सर्वदा अग्रेसरः स प्रखरः वक्ता आसीत् । अनुशासनस्य विनयस्य सरलतायाः सत्यवादितायाः उत्साहस्य च प्रतिमूर्तिः जनार्दनः स्ववयस्यानां प्रेरकः आसीत् ।

स संस्कृतप्रेम कदापि न त्यक्तवान् । सः आङ्गलविद्यालयेषु अपि संस्कृताध्यापनस्य अभियानं सञ्चालितवान् । अतः स स्वयमेव एकस्मिन् संस्थागते आङ्गलविद्यालये संस्कृतं पाठयितुम् आरब्धवान् । जनार्दनस्य संस्कृतप्रेम तस्य प्रतिभाम् उत्साहं च दृष्ट्वा विद्यालयस्य सञ्चालकाः प्रसन्नाः अभवन् । ते तं ससम्मानं संस्कृतविभागाध्यक्षपदे प्रतिष्ठापितवन्तः । प्रतिकूलायां परिस्थितौ अपि संस्कृतसेवायां निरतः स विश्वविद्यालये अपि संस्कृतप्रचारं कर्तुम् ऐच्छत् । स २०६८ तमे वैक्रमाब्दे त्रिभुवनविश्वविद्यालयस्य संस्कृतविभागे उपप्राध्यापकः अभवत् ।

उत्साहः एव जनार्दनस्य परिचायकः गुणः आसीत् । धर्मस्य संस्कृतेः समाजस्य राष्ट्रस्य च उत्थानकार्ये जनार्दनस्य उत्साहः अप्रतिमः आसीत् । सविद्वत्तया वाक्कलया च सर्वान् वशीकर्तुं समर्थः आसीत् । संस्कृतस्य नेपाल्याः हिन्दीभाषायाः आङ्गलभाषायाः च मुखरः वक्ता सविश्वम् एव संस्कृतमयं कर्तुम् इच्छति स्म । 'विश्वस्य परिवर्तनाय आरम्भः स्वस्माद् एव कार्यः' इति विचार्य स प्रथमं स्वयं संस्कृतमयः अभवत् । अनन्तरं स्वस्य जन्मभूमौ एव स गौरीशङ्करसंस्कृतग्रामस्य परिकल्पनम् अकरोत् । स स्वस्य अध्यक्षतायां गौरीशङ्करसंस्कृतग्राम-बहूद्देश्यसमितिं च सङ्घटितवान् । स 'विश्वस्य सर्वासु भाषासु सभ्यतासु च संस्कृतम् अनुस्यूतम् अस्ति' इति कथयति स्म । अतः स संस्कृतस्य सर्वासां विद्यानां विकासाय नेपाले एव विशिष्टं शिक्षाकेन्द्रं निर्मातुम् इच्छति स्म । तस्यैव नेतृत्वे त्रिभुवनविश्वविद्यालयः कारुसंस्कृतम् इति पाठ्यक्रमं संरचितवान् आसीत् । एषः पाठ्यक्रमः संस्कृतस्य प्रायोगिकं पक्षं समुद्घाटयति ।

जनार्दनः 'पाणनीयधातुपाठे ध्वनिपरिवर्तनम्' इति विषये विद्यावारिधिशोधप्रबन्धं रचितवान् आसीत् । स शोधप्रबन्धः भाषाविज्ञाने ध्वनिविज्ञानस्य महत्त्वपूर्णा उपलब्धिः मन्यते । शब्दसन्दोहः इति तस्य ग्रन्थः सर्वेषां भाषाविदां मार्गदर्शकः अस्ति । यः प्रायेण विश्वस्य सर्वासु प्रमुखभाषासु संस्कृतस्य प्रभावं दर्शयति । तस्य नेतृत्वे निर्मिताः 'बीजवाणी' इत्यस्य चत्वारः एव अङ्कुराः सरलतया संस्कृतशिक्षणे सफलाः सन्ति । यस्य कस्य अपि मञ्चस्य उपयोगं स संस्कृतस्य

महत्त्ववर्णने एव करोति स्म । संस्कृतसेवायां तस्य सोत्साहां प्रवृत्तिं दृष्ट्वा भारतस्य कुरुक्षेत्रे वर्तमानं महर्षि-आर्षगुरुकुलं तस्मै २०१६ तमे ईशवीयाब्दे आर्षप्रज्ञापुरस्कारं प्रदत्तवत् ।

एवंविधः संस्कृतसेवानिरतः उत्साहेन भरितः जनार्दनः दुर्दैववशाद् अल्पे वयसि एव संसारं त्यक्तवान् । स स्थानीयं निर्वाचनं परिलक्ष्य संस्कृतग्रामस्य विषये परामर्शं कर्तुं जन्मभूमिं गच्छन् आसीत् । २०७४ तमस्य विक्रमवर्षस्य वैशाखमासस्य २८ तमे दिनाङ्के बसयानस्य दुर्घटनायाम् आहतः अभवत् । उपचाररतः स ज्येष्ठमासस्य प्रथमे दिनाङ्के ज्येष्ठकृष्णाचतुर्थ्यां कीर्तिशेषः अभवत् । जनार्दनः स्वजीवनस्य समग्रान् पक्षान् संस्कृतस्य सेवायै समर्पितवान् । संस्कृत-गिरौ गौरीशङ्करे उदितः स संस्कृतस्य एव शिखरे गौरीशङ्करे अस्तं गतः । तस्य उदयाचलः अस्ताचलः च संस्कृतम् एव अभवत् । अतः कः अपि संस्कृतानुरागी जनार्दनं विस्मर्तुं न शक्नोति ।

**शब्दार्थाः**

| | | |
|---|---|---|
| आलोकयितुम् | - | प्रकाशयितुम्, प्रकाशित गर्न |
| क्षमाः | - | सफलाः, सफल |
| उत्तीर्य | - | उत्तीर्णं कृत्वा, उत्तीर्ण गरेर |
| पश्चात् | - | अनन्तरम्, पछि |
| वाक्कला | - | भाषणकला, बोल्ने कला |
| अनुकरणीयः | - | अनुकार्यः, अनुकरण गर्न योग्य |
| पटुः | - | चतुरः, तगडा |
| वयस्य | - | समानवयाः, एउटै उमेरको साथी |
| अप्रतिमः | - | अनुपमः, अर्को उदाहरण नभएको |
| वशीकर्तुम् | - | नियन्त्रितम्, वशमा राख्न |
| उदयाचलः | - | उदयगिरिः, सूर्य उदाउने पहाड |
| अस्ताचलः | - | अस्तगिरिः, सूर्य अस्ताउने पहाड |
| अनुस्यूतम् | - | सततसम्बद्धम्, निरन्तर सम्बन्ध भएको |
| सोत्साहाम् | - | उत्साहभरिताम्, उत्साहले भरिएको |
| आहतः | - | सव्रणः, घाइते |

**अभ्यासः**

## श्रवणं भाषणं च

१. **कक्षायां पाठस्य श्रवणानन्तरं स्वमातृभाषायां पाठसारं श्रावयत ।**

२. **मित्रात् पाठस्य द्वितीयम् अनुच्छेदं श्रुत्वा प्रश्नान् उत्तरयत**

(क) जनार्दनस्य जन्म कस्मिन् वैक्रमाब्दे अभवत् ?

(ख) जनार्दनस्य जन्मतिथिः का ?

(ग) जनार्दनस्य पितरौ कौ ?

३. **शिक्षकात् पदानि श्रुत्वा अनुवाचयत**

भाषाणाम्, सत्यवादितायाः, विशिष्टः, विद्वान्, वेदाङ्गानि, बाल्यात्, समन्वितः, प्रतिष्ठापितवन्तः, सर्वेषाम्, अप्रतिमः ।

४. **सर्वे मिलित्वा पाठस्य अनुच्छेदान् क्रमेण साभिनयं पठित्वा श्रावयत ।**

५. **अधस्तनानि वाक्यानि श्रावयत**

(क) भगवतः उपासकाः आशिषं प्राप्नुवन्ति ।

(ख) छात्राः शिक्षकान् सादरं प्रणमन्ति ।

(ग) दीनानां सेवा उत्तमं कार्यम् अस्ति ।

(घ) महात्मा गौतमः नेपालमातुः सुपुत्रः अस्ति ।

(ङ) स्वामिनः विवेकानन्दस्य प्रवचनकला अत्युत्तमा आसीत् ।

६. **शिक्षकाद् अधस्तनं पद्यं तदर्थं च श्रुत्वा के मनुष्यरूपेण पशुसमानाः भूत्वा जीवन्ति ? इति कथयत**

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूताः
मनुष्यरूपेण मृगाश्चरन्ति ॥

## पठनम्

१. **बोधपाठं पठित्वा प्रश्नान् उत्तरयत**

संस्कृतं विना नेपालं बोद्धुं न शक्यते, संसारं ज्ञातुं च न शक्यते इति जनार्दनस्य सिंहनादः भवति स्म । शिक्षानीति-विषये, धर्मनीति-विषये, राजनीति-विषये, कलायाः, संस्कृतेः, मानव-सभ्यतायाः च विषये तस्य विशिष्टम् अध्ययनम् आसीत् । रेडियोकार्यक्रमे अनेन नेपालस्य प्रायः सर्वैः धर्म-संस्कृति-सम्बद्धैः विद्वद्भिः, साधुभिः, अभियन्तृभिः च परामृश्य लोकहिताय ज्ञानराशिः अर्पितः आसीत् । कार्यक्रमस्य सञ्चालन-समये अस्य सरलतया, वैदुष्येण, सम्मानेन च अभिभूताः विद्वांसः, धर्मगुरवः, साधवः, संस्कृतज्ञाः, संस्कृतिविदः च एनं यत्र तत्र प्रशंसन्ते स्म । अस्य धार्मिक-कार्यक्रमे ज्ञान-विज्ञानयोः मनोरमः सङ्गमः भवति स्म । अस्य जिह्वायां शास्त्रस्य प्रमाणेन, तर्केण च सिद्धा ज्ञानगङ्गा वहति स्म । अतः सञ्चारस्य प्रायः सर्वेषु क्षेत्रेषु अस्य विशेषः प्रवेशः आसीत् । अतः साधवः, विद्वांसः च धार्मिक-कार्यक्रमस्य आयोजनार्थम्, तस्य सञ्चालनार्थम्, तस्य प्रचारार्थं च जनार्दनस्य एव उपस्थितिं कामयन्ते स्म ।

विशेषतः धार्मिकमेलासु, कुम्भमेलासु, संस्कृतसम्मेलनेषु, संस्कृताभियानेषु, यज्ञमहायज्ञेषु, विश्वशान्ति-सम्मेलनेषु, बुद्धजयन्ती-श्रीकृष्णजयन्ती-शिवरात्रि-सदृशेषु धार्मिकपर्वसु, विविधेषु बौद्धिकेषु, साहित्यिकेषु च कार्यक्रमेषु जनार्दनस्य योगदानम् अविस्मरणीयं भवति स्म । तेषु कार्यक्रमेषु स आयोजकतया, संयोजकतया, अध्यक्षतया, सदस्यतया, महासचिवतया, प्रचार-संयोजकता, प्रधान-प्रचारकतया, निर्णायकतया, अतिथितया च अतुलनीयं सहयोगं करोति स्म । अनेन अनेकासां सङ्घसंस्थानां दैनिकाः, पाक्षिकाः, मासिकाः, अर्धमासिकाः च पत्रिकाः सम्पादिताः आसन् । राष्ट्रिय-दैनिक-समाचार-पत्रिकायाः सम्पादनेन च अनेन समाजे ख्यातिः प्राप्ता आसीत् ।

जनार्दनस्य सार्वत्रिक-क्रियाशीलतायाः अन्तर्निहितम् उद्देश्यम् आसीद्- नेपाले समस्त-जगति च संस्कृत-विद्यायाः प्रचारः । संस्कृतविद्यां केन्द्रे निधाय स समाजस्य सर्वेषु क्षेत्रेषु क्रियाशीलः आसीत् । जनार्दनः नेपाले संस्कृतविद्या-प्रचारस्य महान् अभियन्ता आसीत् । विद्यालये संस्कृतस्य शिक्षणक्रमे अनेन नेपालस्य अन्येषु संस्थागत-विद्यालयेषु च संस्कृतस्य अनिवार्यता प्रदर्शिता । तदर्थं पाठ्यपुस्तकानि विलिख्य अनेन संस्थागत-विद्यालयेषु संस्कृतशिक्षणस्य अभियानं परिचालितम् । बहवः संस्थागत-विद्यालयाः

जनार्दनस्य प्रस्तावं स्वीकृतवन्तः । तस्य एव परिणामस्वरूपम् इदानीं नेपालस्य बहुषु संस्थागतविद्यालयेषु संस्कृतस्य पठनपाठनं भवति । अधुना प्रतिदिनम् संस्थागत-विद्यालयेषु संस्कृतं प्रति अनुरागः च वर्धमानः अस्ति । आराष्ट्रम् आवासीयविद्यालयाः संस्कृतं पाठयितुं समुत्सुकाः सन्ति ।

(क) किं विना नेपालं बोद्धुं न शक्यते ?

(ख) जनार्दनस्य धार्मिक-कार्यक्रमे कयोः मनोरमः सङ्गमः भवति स्म ?

(ग) कुत्र जनार्दनस्य विशेषः प्रवेशः आसीत् ?

(घ) जनार्दनस्य सार्वत्रिक-क्रियाशीलतायाः अन्तर्निहितम् उद्देश्यम् किम् आसीत् ?

(ङ) जनार्दनः समाजस्य केषु क्षेत्रेषु क्रियाशीलः आसीत् ?

(च) जनार्दनः नेपाले कस्य महान् अभियन्ता आसीत् ?

(छ) जनार्दनेन कुत्र संस्कृतस्य अनिवार्यता प्रदर्शिता ?

(ज) जनार्दनेन किं कृत्वा संस्कृतशिक्षणस्य अभियानं परिचालितम् ?

(झ) के जनार्दनस्य प्रस्तावं स्वीकृतवन्तः ?

**२. पाठस्य पञ्चमानुच्छेदस्य द्रुतपठनं कुरुत ।**

**३. पाठस्य अन्तिमानुच्छेदं पठित्वा कः अपि जनार्दनं किमर्थं विस्मर्तुं न शक्नोति ? इति विषये विमृशत ।**

**४. तालिकायाः सङ्ख्यावाचकपदानि पठित्वा स्यूते स्थितानां पुस्तिकानां सङ्ख्यां गणयत**

| अङ्काः | पदानि | १७ | सप्तदश | ३४ | चतुस्त्रिंशत् |
|---|---|---|---|---|---|
| १ | एकम् | १८ | अष्टादश | ३५ | पञ्चत्रिंशत् |
| २ | द्वे | १९ | एकोनविंशतिः | ३६ | षट्त्रिंशत् |
| ३ | त्रीणि | २० | विंशतिः | ३७ | सप्तत्रिंशत् |
| ४ | चत्वारि | २१ | एकविंशतिः | ३८ | अष्टत्रिंशत् |
| ५ | पञ्च | २२ | द्वाविंशतिः | ३९ | एकोनचत्वारिंशत् |
| ६ | षट् | २३ | त्रयोविंशतिः | ४० | चत्वारिंशत् |

| | | | | | |
|---|---|---|---|---|---|
| ७ | सप्त | २४ | चतुर्विंशतिः | ४१ | एकचत्वारिंशत् |
| ८ | अष्ट | २५ | पञ्चविंशतिः | ४२ | द्वाचत्वारिंशत् |
| ९ | नव | २६ | षड्विंशतिः | ४३ | त्रयश्चत्वारिंशत् |
| १० | दश | २७ | सप्तविंशतिः | ४४ | चतुश्चत्वारिंशत् |
| ११ | एकादश | २८ | अष्टाविंशतिः | ४५ | पञ्चचत्वारिंशत् |
| १२ | द्वादश | २९ | एकोनत्रिंशत् | ४६ | षट्चत्वारिंशत् |
| १३ | त्रयोदश | ३० | त्रिंशत् | ४७ | सप्तचत्वारिंशत् |
| १४ | चतुर्दश | ३१ | एकत्रिंशत् | ४८ | अष्टचत्वारिंशत् |
| १५ | पञ्चदश | ३२ | द्वात्रिंशत् | ४९ | एकोनपञ्चाशत् |
| १६ | षोडश | ३३ | त्रयस्त्रिंशत् | ५० | पञ्चाशत् |

**तालिकायां 'पञ्च' इति पदात् पूर्वतनानि चत्वारि रूपाणि नपुंसकलिङ्गे प्रदत्तानि सन्ति । अन्यानि रूपाणि त्रिषु लिङ्गेषु समानानि एव प्रयुक्तानि भवन्ति । यथा**

| **पुंलिङ्गे** | **स्त्रीलिङ्गे** | **नपुंसकलिङ्गे** |
|---|---|---|
| एकः पर्वतः | एका पार्वती | एकं पर्व |
| द्वौ मालाकारौ | द्वे माले | द्वे मित्रे |
| त्रयः याचकाः | तिस्रः याजिकाः | त्रीणि यन्त्राणि |
| चत्वारः चातकाः | चतस्रः चटकाः | चत्वारि चित्राणि |
| पञ्च पाचकाः | पञ्च पाठिकाः | पञ्च पत्राणि |

**लेखनम्**

1. **अधस्तनस्य अनुच्छेदस्य आधारेण प्रश्नोत्तराणि पूरयत**

नेपालः देवभूमिः अस्ति । अयं देशः ऋषीणाम्, महर्षीणाम्, साधूनाम्, साधकानां च साधनाभूमिः मन्यते । देवभूमिः नेपालदेशः देवभाषायाः च उद्गमभूमिः वर्तते । देवभाषा च संस्कृतम् अस्ति । अत्रैव स्थित्वा मन्त्रद्रष्टारः ऋषयः वेदमन्त्रान् दृष्टवन्तः, पुराणानि च निर्मितवन्तः । अस्यां भूमौ समये समये संस्कृतवाङ्मयस्य उपासकाः,

संस्कृतविद्यायाः प्रचारकाः महान्तः अभियन्तारः च समुत्पद्यन्ते । तादृशेषु संस्कृतविद्या-प्रचारकेषु नेपालदेशे स्वर्गीयस्य जनार्दनधिमिरे-महोदयस्य नाम सादरं गृह्यते ।

(क) कः देवभूमिः अस्ति ?

................ देवभूमिः अस्ति । (मानवः, नेपालः, नाम)

(ख) अयं देशः कस्याः उद्गमभूमिः वर्तते ?

अयं देशः ................ उद्गमभूमिः वर्तते । (देवभाषायाः, आङ्ग्लभाषायाः, चीनीभाषायाः)

(ग) संस्कृतं कीदृशी भाषा अस्ति ?

संस्कृतं ................ अस्ति । (जनभाषा, राष्ट्रभाषा, देवभाषा)

(घ) के वेदमन्त्रान् ददृशुः ?

................ वेदमन्त्रान् ददृशुः । (ऋषयः, कपयः, कवयः)

२. **पाठाधारेण पूर्णवाक्येन प्रश्नान् उत्तरयत**

(क) केन जनार्दनः अनुकरणीय आसीत् ?

(ख) जनार्दनः बाल्यकालाद् एव कीदृशः आसीत् ?

(ग) कीदृशः जनार्दनः स्ववयस्यानां प्रेरक आसीत् ?

(घ) जनार्दनः कुतः प्रारम्भिकीं शिक्षाम् अधिगतवान् ?

(ङ) के जनार्दनं संस्कृतविभागाध्यक्षपदे प्रतिष्ठापितवन्तः ?

(च) जनार्दनः उच्चशिक्षां कुतः अधिगतवान् ?

(छ) कः जनार्दनस्य परिचायकः गुणः ?

(ज) जनार्दनः किं कथयति स्म ?

(झ) शब्दसन्दोहः कीदृशः ग्रन्थः अस्ति ?

(ञ) के सरलतया संस्कृतशिक्षणे सफलाः सन्ति ?

(ट) जनार्दनः कं पुरस्कारं प्राप्तवान् ?

(ठ) जनार्दनः कदा पञ्चत्वम् अगच्छत् ?

**३. पाठस्य अन्तिमानुच्छेदस्य श्रुतलेखनं कुरुत ।**

**४. पाठाद् अन्विष्य प्रदत्तानां पदानां विशेषणपदानि लिखत**

यथा -

जीवनेन – सरलेन

(क) प्रतिभाभिः – ...........

(ख) परिस्थितिः – ...........

(ग) उपलब्धिः – ...........

(घ) पक्षान् – ...........

**५. मञ्जूषासाहाय्येन वार्तालापं पूरयत**



पीयूषः इदं चित्रं पश्य ।

अनपेक्षः ............................ ।

पीयूषः न, कस्य इदं चित्रम् ? वद ।

अनपेक्षः इदं चित्रं कवेः ........... अस्ति ।

पीयूषः एष कविः किं काव्यं लिखितवान्, जानासि ?

अनपेक्षः एष ..................................... ।

पीयूषः एष कविः केन पुरस्कारेण सम्मानितः ?

अनपेक्षः ......................................... । पूर्वम् अहम् एतस्य चित्रं न दृष्टवान् परन्तु एतस्य विषये जानामि ।

पीयूषः तर्हि, सम्प्रति एतस्य विषये .................................... ।

'गीताञ्जलिः' इति विश्वप्रसिद्धं काव्यं लिखितवान्, रवीन्द्रनाथस्य, एष नोबेल-पुरस्कारेण सम्मानितः, तव चित्रेण सहितं ज्ञानं पूर्णम् अभवत्, किम्, ऋषेः चित्रम्

## व्याकरणानुशीलनम्

१. **सोदाहरणं गुणसन्धिनियमान् पठत**

**गुणसन्धिः**

अ/आ+ इ/ई = ए

देव+इन्द्रः = देवेन्द्रः, रमा+ईशः = रमेशः, महा+इन्द्रः = महेन्द्रः, महा+ईश्वरः = महेश्वरः

अ/आ+उ/ऊ = ओ

सूर्य+उदयः = सूर्योदयः, एक+ऊनः = एकोनः, महा+उदयः = महोदयः, महा+ऊर्मिः = महोर्मिः

अ/आ +ऋ = अर्

देव+ऋषिः = देवर्षिः, ब्रह्मा+ऋषिः = ब्रह्मर्षिः

२. **सन्धिगतं रूपं दर्शयत**

गज+इन्द्रः ............. महा+उत्सवः .............

वसन्त+ऋतुः .............. प्रजा+ईशः ..............

परम+उत्तमः ............ यथा+इच्छम् ............

स्वच्छ+उदकम् ............ महा+ऋद्धिः .............

वर्षा+ऋतुः ................ नाथ+इति ............

मम+लृकारः ..............

३. **सन्धिविच्छेदं कुरुत**

महेशः ............. देवर्षिः ............

प्रेक्षते .......... खगेन्द्रः ...............

परोपकारः ................. पुरुषोत्तमः .............

सर्वेश्वरः ................. ग्रीष्मर्तुः ...............

रमेशः ............... ममल्कारः ................

४. उदाहरणानुसारेण रूपावलीतालिकां रचयत

| वृत्-धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वर्तते | वर्तेते | वर्तन्ते |
| मध्यमः पुरुषः | वर्तसे | वर्तेथे | वर्तध्वे |
| उत्तमः पुरुषः | वर्ते | वर्तावहे | वर्तामहे |

धातवः – सेव् (सेवते) मुद् (मोदते)

कम्प् (कम्पते) बुध् (बुध्यते)

रुच् (रोचते) सह् (सहते)

५. सङ्केतानुसारं रिक्तस्थानं पूरयत

(क) छात्राः गुरुं ............. । (सेव्)

(ख) अभ्यासेन ज्ञानम् ............. । (एध्)

(ग) यूयं पारितोषिकं ............ । (लभ्)

(घ) आवां दुःखं ............ । (सह्)

(ङ) त्वं पाठं ................ ? (बुध्)

## कोषानुशीलनम्

### देवगङ्गायाः नामानि

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ॥१॥

### सुमेरुपर्वतस्य नामानि

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥१॥

### देववृक्षाणां नामानि

पञ्चैते देवतरवो मन्दारः पारिजातकः ॥१॥

सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥२॥

### अग्नेः नामानि

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ॥१॥
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥२॥
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ॥३॥
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥४॥
लोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ॥५॥
हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ॥६॥
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ॥७॥
शूचिरप्पित्तमौर्वस्तु वाडवो वडवानलः ॥८॥

### यमराजस्य नामानि

धर्मराजः पितृपतिः समवर्ती परेतराट् ॥१॥
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ॥२॥
कालो दण्डधरः श्राद्धदेवो वैवस्तोऽन्तकः ॥३॥

### राक्षसस्य नामानि

राक्षसः कौणपः, क्रव्यात् क्रव्यादोऽस्त्रप आशरः ॥१॥
रात्रिश्चरो रात्रिचरः कर्बुरो निकषात्मजः ॥२॥
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥३॥

## पदानुशीलनी

**लिङ्गव्यवस्था -** अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे च (ङ), इति सङ्केतः प्रदत्तो वर्तते ।

**देवगङ्गायाः चत्वारि नामानि -** (अत्र सर्वाणि नामानि स्त्रीलिङ्गे) मन्दाकिनी, वियद्गङ्गा, स्वर्णदी, सरदीर्घिका ।

**सुमेरुपर्वतस्य पञ्च नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) मेरुः, सुमेरुः, हेमाद्रिः, रत्नसानुः, सुरालयः ।

**पञ्चानां देववृक्षाणां नामानि -** मन्दारः (क), पारिजातकः (क), सन्तानः (क), कल्पवृक्षः (क), हरिचन्दनम् (ङ) ।

**अग्नेः चतुस्त्रिंशद् नामानि -** (अत्र 'अप्पित्तम्' इति नपुंसके, अन्यानि पुंलिङ्गे) अग्निः, वैश्वानरः, वह्निः, वीतिहोत्रः, धनञ्जयः, कृपीटयोनिः, ज्वलनः, जातवेदाः, तनूनपात्, बर्हिः, शुष्मा, कृष्णवर्त्मा, शोचिष्केशः, उषर्बुधः, आश्रयाशः, बृहद्भानुः, कृशानुः, पावकः, अनलः, रोहिताश्वः, वायुसखः, शिखावान्, आशुशुक्षणिः, हिरण्यरेताः, हुतभुग्, दहनः, हव्यवाहनः, सप्तार्चिः, दमुनाः, शुक्रः, चित्रभानुः, विभावसुः, शुचिः, अप्पित्तम् ।

**यमराजस्य चतुर्दश नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) धर्मराजः, पितृपतिः, समवर्ती, परेतराट्, कृतान्तः, यमुनाभ्राता, शमनः, यमराट्, यमः, कालः, दण्डधरः, श्राद्धदेवः, वैवस्वतः, अन्तकः ।

**राक्षसस्य पञ्चदश नामानि -** (अत्र 'यातु, रक्षः' इति द्वे नपुंसकलिङ्गे, अन्यानि सर्वाणि पुंलिङ्गे) राक्षसः, कौणपः, क्रव्यात्, क्रव्यादः, अस्रपः, आशरः, रात्रिञ्चरः, रात्रिचरः, कर्बुरः, निकषात्मजः, यातुधानः, पुण्यजनः, नैर्ऋतः, यातु, रक्षः ।

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धम् उच्चारयत**

पञ्चैते देवतरवो मन्दारः पारिजातकः ।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥

२. **देवगङ्गायाः चत्वारि नामानि पृथक् पृथक् लिखत ।**

३. **'कर्बुरः' इति कस्य नाम ?**

४. **अग्नेः नाम्नां पङ्क्तिद्वयं विलिख्य नामानि पृथक् लिखत ।**

५. **हरिचन्दन-शब्दः कस्मिन् कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

लोहिताश्वो ..... शिखावानाशुशुक्षणिः ।
........... हुतभुग्दहनो ................. ॥
................ शुक्रश्चित्रभानुर्विभावसुः ।
सुचिरप्पित्तमौर्वस्तु ........ वडवानलः ॥

७. **उदाहरणानुसारेण पितृपति-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पितृपतिः | पितृपती | पितृपतयः |
| द्वितीया | पितृपतिम् | ........ | पितृपतीन् |
| तृतीया | पितृपतिना | पितृपतिभ्याम् | पितृपतिभिः |
| चतुर्थी | पितृपतये | ........ | पितृपतिभ्यः |
| पञ्चमी | पितृपतेः | ........ | ........ |
| षष्ठी | ........ | पितृपत्योः | पितृपतीनाम् |
| सप्तमी | पितृपतौ | ........ | ........ |
| सम्बोधनम् | हे पितृपते ! | ........ | ........ |

८. **सप्तार्चि-शब्दस्य रूपावलीं लिखत ।**

९. **प्रदत्तैः पदैः वाक्यानि रचयत**

मन्दाकिनी, सुमेरुः, मन्दारः, पावकः, कृतान्तः, रात्रिञ्चरः ।

१०. **पर्यायान् परस्परं मेलयत**

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| स्वर्णदी | विभावसुः |
| रत्नसानुः | कालः |
| कल्पवृक्षः | कौणपः |
| चित्रभानुः | सुरदीर्घिका |
| यमः | सुरालयः |
| राक्षसः | हरिचन्दनम् |

## प्रतिभाप्रदर्शनाभ्यासः

१. प्रदत्तानां पदानां साहाय्येन पञ्चवाक्यैः चित्रं वर्णयत



**मञ्जूषा**

सरोवरः, चतुष्कोणाकारः, शिवलिङ्गम्, नीलवर्णम्, विटपाः, हरितः चत्वरः, स्वच्छं जलम्, मार्गः, वृत्ताकारं पीठम्, आकाशम्

# विवेकस्य सौन्दर्यम्

प्राचीनकाले ग्रीसदेशे सुकरातनामा महान् दार्शनिकः आसीत् । तस्य बहवः शिष्याः आसन् । स सर्वदा शिष्यान् उपदिशति स्म । शिष्याः च पुरतः स्थित्वा ध्यानेन तस्य प्रवचनं शृण्वन्ति स्म ।

एकदा प्रातःकाले सुकरातः स्वशिष्यान् अध्यापयन् आसीत् । तस्मिन् एव समये विचित्रवेषधारी कश्चन ज्योतिर्वित् तत्र आगच्छत् । स तत्र आगत्य सर्वेषां पुरतः उच्चैः अवदत्, "अहं सर्वज्ञः अस्मि, कस्यापि मुखाकृतिं दृष्ट्वा तस्य चरित्रं वर्णयितुं शक्नोमि । युष्मासु कः मम नैपुण्यं परीक्षितुम् इच्छति ?"



तत् श्रुत्वा सर्वे शिष्याः सुकरातस्य मुखम् अपश्यन्, स्वयं किमपि न अकथयन् । सुकरातः तं ज्योतिर्विदं स्वस्य चरितं वर्णयितुम् अकथयत् । ज्योतिर्वित् किञ्चित्कालं निर्निमेषं सुकरातस्य मुखम् अवलोकितवान् ।

सुकरातः अतीव ज्ञानवान् आसीत्, किन्तु आकृत्या सुन्दरः न आसीत् । तस्य मुखम् अवलोक्य ज्योतिर्विद् अकथयत्, "त्वं सर्वकारस्य विरोधं करोषि । तव मनसि द्रोहस्य भावना वर्तते । आकृत्या एव त्वम् अतीव क्रुद्धः दृश्यसे ।"

गुरुनिन्दां श्रुत्वा तत्र स्थिताः सर्वे शिष्याः कुपिताः अभवन् । ते तं ज्योतिर्विदं ततः निष्कासयितुम् ऐच्छन् । सुकरातः तान् निवारयन् आह, "महोदय ! अन्यान् अपि मम स्वभावान् प्रकटयतु ।"

ज्योतिर्विद् आह, "तव शिरसः आकृतिः अपि समीचीना नास्ति, एतेन ज्ञायते, त्वम् अतीव लुब्धः असि । तव चिबुकम् अपि कुरूपम् अस्ति, अतः त्वम् अतीव उन्मत्तः असि ।"

इत्थं श्रुत्वा सर्वे शिष्यगणाः क्रुद्धाः अभवन् । सुकरातस्तु अतीव प्रसन्नः आसीत् । स तस्मै ज्योतिर्विदे उपहारम् अददात् । ज्योतिर्वित् ततः बहिः निरगच्छत् । सुकरातस्य एतादृशम् आश्चर्यजनकं व्यवहारं दृष्ट्वा शिष्याः चकिताः अभवन् । ते सुकरातम् अपृच्छन्, "गुरो ! भवान् तं ज्योतिर्विदं किमर्थं पुरस्कृतवान् ? स तु भवतः विषये सर्वम् असत्यम् अकथयत् ।" इति ।

ततः सुकरातः स्वशिष्यान् अकथयत्, "प्रेयांसः शिष्याः ! ज्योतिर्विद् यद् अकथयत्, तत् सर्वं सत्यम् अस्ति । तेन वर्णिताः सर्वे अपि दोषाः मयि सन्ति । अहं लुब्धः अस्मि, क्रुद्धः अस्मि, सर्वकारस्य विरोधी च अस्मि । किन्तु स एकम् अतीव महत्त्वपूर्णं विषयं वक्तुं विस्मृतवान् । स केवलं मम शारीरिकं रूपम् एव दृष्टवान्, मम विवेकस्य सौन्दर्यं न दृष्टवान् । अहं विवेकशक्त्या एव स्वस्य दुर्गुणान् वशीकर्तुं समर्थः अस्मि । स मम बाह्यां कुरूपतां तु अवलोकितवान्, किन्तु मम बुद्धेः शक्तिं नैव ज्ञातवान् ।" इत्युक्त्वा सुकरातः ईषद् हसित्वा तूष्णीम् अतिष्ठत् ।

गुरोः तादृशम् उपदेशं श्रुत्वा सर्वे अपि शिष्याः परस्परं मुखम् अवलोक्य शान्ताः अभवन् ।

**शब्दार्थाः**

**दार्शनिकः** - **दर्शनशास्त्रनिपुणः, दर्शनशास्त्र जान्ने**

**विचित्रवेषधारी** - **विचित्रवस्त्रयुतः, रङ्गीबिरङ्गी कपडा लगाएको**

**ज्योतिर्विद्** - **ज्योतिषशास्त्रज्ञः, ज्योतिषी**

निर्निमेषम् - नेत्रोन्मीलनं विना, एक टकले (आँखा नझिम्क्याईकन)
निष्कासयितुम् - निःसारयितुम्, निकाल्न
चिबुकम् - हनुः, चिउँडो
प्रेयांसः - अतीव प्रियाः, प्रिय (बहुवचन)
विवेकशक्त्या - बुद्धिबलेन, विवेकको बलले
ईषद् - स्वल्पम्, थोरै

## अभ्यासः

### श्रवणं भाषणं च

१. पाठस्य द्वितीयम् अनुच्छेदं शिक्षकस्य मुखात् शृणुत । तस्य अर्थं च शिक्षकस्य साहाय्येन वदत ।

२. पाठस्य प्रथमम् अनुच्छेदं शिक्षकस्य मुखात् श्रुत्वा लिखत ।

३. पाठस्य एकम् एकम् अनुच्छेदम् एकैकशः उच्चारयत ।

४. अधस्तनशब्दानां सम्यग् उच्चारणं कुरुत
प्राचीनकाले, अध्यापयन्, विचित्रवेषधारी, ज्योतिर्विद्, क्रुद्धाः, आश्चर्यजनकम्

५. पाठस्य कथां मातृभाषया कक्षायां श्रावयत ।

### पठनम्

१. पाठस्य मौनपठनं कृत्वा अधस्तनशब्दानाम् अर्थं वदत
सर्वदा, कश्चन, मुखाकृतिः, अवलोकितवान्, निवारयन्

२. द्वितीयम् अनुच्छेदं पठित्वा अधस्तनप्रश्नान् उत्तरयत
(क) सुकरातः किं कुर्वन् आसीत् ?
(ख) ज्योतिर्वित् कीदृशः आसीत् ?
(ग) ज्योतिर्वित् किं दृष्ट्वा चरित्रं वर्णयितुं शक्नोति ?

## ३. समुचितविकल्पं (√) चिह्नद्वारा सङ्केतयत

(क) सुकरातः कीदृशः आसीत् ?

(अ) अतीव सुन्दरः (आ) ज्ञानवान् (इ) लुब्धः

(ख) गुरुनिन्दां श्रुत्वा शिष्याः कीदृशाः अभवन् ?

(अ) कुपिताः (आ) प्रसन्नाः (इ) दुःखिताः

(ग) सुकरातस्य व्यवहारः कीदृशः आसीत् ?

(अ) साधारणः (आ) आश्चर्यजनकः (इ) उचितः

(घ) सुकरातः ज्योतिर्विदं किम् अकरोत् ?

(अ) अताडयत् (आ) पुरस्कारम् अददात् (इ) किमपि न कृतवान्

## ५. अधस्तनवाक्यानि पठित्वा कथानुसारं क्रमविन्यासं मेलयत

( ) सुकरातस्य समक्षे ज्योतिर्विद् आगच्छत् ।

( ) सुकरातः शिष्यान् अध्यापयन् आसीत् ।

( ) सुकरातः प्रसन्नः अभवत् ।

( ) ज्योतिर्वित् सुकरातस्य फलादेशं कृतवान् ।

( ) शिष्याः कुपिताः अभवन् ।

( ) शिष्याः शान्ताः अभवन् ।

( ) सुकरातः ज्योतिर्विदे पुरस्कारम् अददात् ।

( ) सुकरातः विवेकशक्तेः महत्त्वम् उपदिष्टवान् ।

## ६. अधस्तनम् अनुच्छेदं पठित्वा आशयं स्फुटीकुरुत

गौतमबुद्धः एकवारम् एकस्मिन् ग्रामे गतवान् । तत्र स वृक्षच्छायायां स्थित्वा उपदेशं कुर्वन् आसीत् । बहवः जनाः तत्र आगत्य बुद्धाय उपहारान् प्रयच्छन्तः आसन् । मध्ये काचन वृद्धा आगतवती । सा उक्तवती, "भगवन् ! अहम् दीना निर्धना चास्मि । मम पार्श्वे उपहाराय किम् अपि नास्ति । अद्य मम अहोभाग्येन एकम् आम्रम् प्राप्तवती। तदपि अर्धम् अहम् एव खादितवती । तदैव अहं श्रुतवती, भवान् अद्य जनानाम्

उपहारं स्वीकरोति । अधुना मया सह अर्धम् आम्रं वर्तते, कृपया उपहारं स्वीकरोतु" इति । वृद्धायाः एतादृशं वचनं श्रुत्वा सकरुणः बुद्धः हर्षितः अभवत् । स्वस्य आसनात् उत्थाय नीचैः आगत्य स उच्छिष्टम् आम्रफलं प्रेम्णा स्वीकृतवान् । प्रसन्ना वृद्धा च ततः निर्गतवती । तद् दृष्ट्वा अन्ये ग्रामवासिनः चकिताः अभवन् । ते अपृच्छन्, "तस्याः उच्छिष्टम् अर्धम् आम्रफलम् आदातुं भवान् किमर्थम् आसनाद् उत्थाय नीचैः आगतवान् ?" इति । तत् श्रुत्वा बुद्धः स्मितमुखेन अकथयत्, "सा स्वस्य सर्वस्वं उपहृतवती । भवन्तः स्वसम्पदः किञ्चिदंशं उपहृत्य अपि अहङ्कारेण पूर्णा भवन्ति । किन्तु सा सर्वस्वं मयि समर्प्य अपि विनयेन, श्रद्धया च अवनता अस्ति । एतादृशः उपहारः दुर्लभः भवति ।" तत् श्रुत्वा सर्वे शिष्याः अवनताः अभवन् ।

## लेखनम्

१. **शुद्धं रूपम् अन्विष्य उत्तरपुस्तिकायां लिखत**

| | | | |
|---|---|---|---|
| (क) | (अ) बभूब | (आ) बभुव | (इ) बभूव |
| (ख) | (अ) बर्णयितुम् | (आ) वर्णयितुम् | (इ) वर्णयीतुम् |
| (ग) | (अ) सर्वकारः | (आ) शर्वकारः | (इ) सर्बकारः |
| (घ) | (अ) निर्निमेषम् | (आ) नीर्निमेषम् | (इ) निर्नीमेषम् |

२. **अधस्तनपदानि प्रयुज्य वाक्यानि रचयत**

शिष्याः, प्रसन्नः, कश्चन, किञ्चित्कालम्, चकिताः, अपृच्छन्

३. **पाठमनुसृत्य अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) सुकरातस्य शिष्याः किं कुर्वन्ति स्म ?

(ख) सुकरातस्य समक्षे कः आगच्छत् ? स च किम् अवदत् ?

(ग) गुरुनिन्दां श्रुत्वा शिष्याः किम् अकुर्वन् ?

(घ) ज्योतिर्विदः वर्णनं श्रुत्वा सुकरातः किम् अकरोत् ?

(ङ) कस्य शक्त्या दुर्गुणानि वशीकृतानि भवन्ति ?

(च) शिष्याः किमर्थं शान्ताः अभवन् ?

४. **कोष्ठकात् समुचितानि पदानि आदाय रिक्तस्थानानि पूरयत**

| | | | | |
|---|---|---|---|---|
| पुरतः | बहवः | चरितम् | ज्योतिर्विद् | अध्यापयन् |
| सर्वकारस्य | कुपिताः | सौन्दर्यम् | | |

सुकरातस्य ............ शिष्याः आसन् । ते सुकरातस्य .......... स्थित्वा प्रवचनं शृण्वन्ति स्म । प्रातःकाले सुकरातः शिष्यान् ........ आसीत् । तत्र एकः .......... आगच्छत् । सुकरातः तं ज्योतिर्विदं स्वस्य .......... वर्णयितुम् अकथयत् । ज्योतिर्विद् अकथयत्, "त्वं .......... विरोधं करोषि ।" तस्य वर्णनं श्रुत्वा शिष्याः ........... बभूवुः । सुकरातः अकथयत्, "सः मम शारीरिकम् रूपम् एव दृष्टवान्, विवेकस्य ........ न दृष्टवान् ।" इति ।

५. **युष्माकं पार्श्वे अपसारणीयाः दुर्गुणाः के सन्ति ? अन्विष्य लिखत ।**

## व्याकरणानुशीलनम्

१. **सोदाहरणं वृद्धिसन्धिनियमान् पठत**

अ/आ+ए/ऐ = ऐ

सदा+एव = सदैव, मत+ऐक्यम् = मतैक्यम्, तथा+एव = तथैव, महा+ऐश्वर्यम् = महैश्वर्यम्

अ/आ +ओ/औ = औ

परम+ओजस्वी = परमौजस्वी, वन+औषधम् = वनौषधम्, महा+ओजस्वी = महौजस्वी, महा+औषधम् = महौषधम्

२. **सन्धिगतं रूपं लिखत**

| | |
|---|---|
| सप्त+एते ............. | वन+ओकाः .............. |
| बाला+एषा ............. | महा+ओजाः ............... |
| तव+एव ................. | दिव्य+औषधम् .......... |
| दीर्घ+ओकारः ............ | मत+ऐक्यम् ............. |
| महा+औषधम् .............. | मम+औत्सुक्यम् ........... |
| चित्त+ऐकाग्र्यम् ............. | नृप+ऐश्वर्यम् ............... |

३. **सन्धिविच्छेदं कुरुत**

| | |
|---|---|
| तथैव ............. | जनैकता .............. |
| एकैकम् .............. | महौदार्यम् ............. |
| सर्वैश्वर्यम् ................ | जलौघः ................ |
| प्राचीनैतिहयम् .............. | तण्डुलौदनम् .............. |
| दीर्घैकारः ............... | वीरैक्यम् ................ |
| ज्ञानैश्वर्यम् ............. | महौतुः ............... |
| देवौजः ................. | |

४. **कर्मपदं परिचित्य पठत**

(क) छात्राः पुस्तकं पठन्ति ।

(ख) वयं विद्यालयं गच्छामः ।

(ग) गुरुः शिष्यान् पाठयति ।

(घ) यूयं चलचित्रं पश्यथ ।

(ङ) अहं गीतं गायामि ।

५. **पदानि परस्परं संयोज्य वाक्यानि रचयत**

| **कर्ता** | **कर्म** | **क्रिया** |
|---|---|---|
| बालकाः | भोजनालयम् | गच्छसि । |
| वयम् | चलचित्रालयम् | पूजयामः । |
| माता | क्रीडाक्षेत्रम् | गच्छति । |
| भक्ताः | मन्दिरम् | पूजयन्ति । |
| त्वम् | श्रीकृष्णम् | गच्छन्ति । |
| छात्रौ | सदाशिवम् | पूजयति ? |
| कः | श्रीरामम् | गच्छतः । |

६. रिक्तस्थानं पूरयत

(क) अहं .................. खादामि ।

(ख) यूयं ............ पिबथ ।

(ग) ते ............... गच्छन्ति ।

(घ) भक्ताः ............. पूजयन्ति ।

(ङ) युवां ............... लिखथः ।

मन्दिरम्, ईश्वरम्, फलानि, कविताम्, दुग्धम्

## कोषानुशीलनम्

### वरुणस्य नामानि

प्रचेता वरुणः पाशी यादसां पतिरप्पतिः ॥१॥

### वायोः, महावायोः, झञ्झावातस्य, वेगस्य, 'शीघ्रम्' इत्यस्य च नामानि

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥१॥
पृषदश्वो गन्धवहो गन्धवाहाऽनिलाऽशुगाः ॥२॥
समीर-मारुत-मरुज्जगत्प्राण-समीरणाः ॥३॥
नभस्वद्वात-पवन-पवमान-प्रभञ्जनाः ॥४॥
प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः ॥५॥
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥६॥
शरीरस्था इमे, रंहस्तरसी तु रयः स्यदः ॥७॥
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥८॥
सत्त्वरं चपलं तूर्णमविलम्बितमाशु च ॥९॥

### नित्यस्य नामानि

सततानारताश्रान्तसन्तताविरतानिशम् ॥१॥
नित्यानवरताजस्रमप्यथातिशयो भरः ॥२॥
अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥३॥
तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ॥४॥
क्लीबे शीघ्राद्यसत्त्वं स्यात् त्रिष्वेषां भेद्यगामि यत् ॥५॥

## कुबेरस्य नामानि

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ॥१॥
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥२॥
किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ॥३॥
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥४॥

### पदानुशीलनी

**वरुणस्य पञ्च नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) प्रचेताः, वरुणः, पाशी, यादसां पतिः, अप्पतिः ।

**वायोः विंशतिः नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) श्वसनः, स्पर्शनः, वायुः, मातरिश्वा, सदागतिः, पृषदश्वः, गन्धवहः, गन्धवाहः, अनिलः, आशुगः, समीरः, मारुतः, मरुत्, जगत्प्राणः, समीरणः, नभस्वत्, वातः, पवनः, पवमानः, प्रभञ्जनः ।

**महावायोः द्वे नामनी (पुंलिङ्गे)** - प्रकम्पनः, महावातः ।

**वृष्टिसहितस्य वायोः नाम (पुंलिङ्गे)** - झञ्झावातः ।

**पञ्चानां प्राणानां नामानि (पुंलिङ्गे)** - प्राणः, अपानः, समानः, उदानः, व्यानः ।

**वेगस्य पञ्च नामानि** - रंहः (न.), तरः (न.), रयः (पुं.), स्यदः (पुं.), जवः (पुं.) ।

**'शीघ्रम्' इत्यस्य नामानि** - शीघ्रम्, त्वरितम्, लघु, क्षिप्रम्, अरम्, द्रुतम्, सत्वरम्, चपलम्, तूर्णम्, अविलम्बितम्, आशु ।

**नित्यस्य नव नामानि** - (अत्र सर्वाणि नामानि अव्ययानि) सततम्, अनारतम्, अश्रान्तम्, सन्ततम्, अविरतम्, अनिशम्, नित्यम्, अनवरतम्, अजस्रम् ।

**अतिशयस्य नामानि** - (सर्वाणि विशेषणानि) अतिशयः (पुं.), भरः (पुं.), अतिवेलम् (न.), भृशम् (अ.), अत्यर्थम् (अ.), अतिमात्रम् (अ.), उद्गाढम् (अ.), निर्भरम् (अ.), तीव्रम्, एकान्तम्, नितान्तम्, गाढम्, बाढम्, दृढम् (शीघ्रादिदृढपर्यन्ताः शब्दा अद्रव्ये नपुंसकलिङ्गे भवन्ति, द्रव्ये च विशेष्यलिङ्गे भवन्ति ।

**कुबेरस्य सप्तदश नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) कुबेरः, त्र्यम्बकसखः, यक्षराट्, गुह्यकेश्वरः, मनुष्यधर्मा, धनदः, राजराजः, धनाधिपः, किन्नरेशः, वैश्रवणः, पौलस्त्यः, नरवाहनः, यक्षः, एकपिङ्गः, ऐलविलः, श्रीदः, पुण्यजनेश्वरः ।

## अभ्यासः

१. अधस्तनं पद्यं शुद्धम् उच्चरत

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥

२. वरुणस्य पञ्च नामानि पृथक् पृथक् लिखत ।

३. 'श्रीदः' इति कस्य नाम ?

४. नित्यस्य नाम्नां पङ्क्तिद्वयं विलिख्य नामानि पृथक् लिखत ।

५. गन्धवह-शब्दः कस्मिन् लिङ्गे अस्ति ?

६. रिक्तस्थानं पूरयत

श्वसनः ....... वायुर्मातरिश्वा ........... ॥१॥

......... गन्धवहो गन्धवाहाऽनिलाऽशुगाः ॥२॥

समीर-........-मरुज्जगत्प्राण-........... ॥३॥

नभस्वद्वात-पवन-............-प्रभञ्जनाः ॥४॥

७. मरुत्-शब्दस्य रूपावलीं लिखत ।

८. प्रदत्तैः पदैः वाक्यानि रचयत

वरुणः, अनिलः, अजस्रम्, धनदः ।

९. पर्यायान् परस्परं मेलयत

| 'अ' खण्ड | 'आ' खण्ड |
|---|---|
| प्रचेताः | अनारतम् |
| समीरः | किन्नरेशः |
| सततम् | पाशी |
| धनाधिपः | मारुतः |

### प्रतिभाप्रदर्शनाभ्यासः

कञ्चन प्रेरणाप्रदं प्रसङ्गं कक्षायां श्रावयन्तु ।

## नीतिपद्यानि

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुर्यत् कृत्वा नावसीदति ॥१॥
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् प्रियं हि वक्तव्यं वचने का दरिद्रता ? ॥२॥
षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥३॥
वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥४॥
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ॥५॥

### शब्दार्थाः

| | | |
|---|---|---|
| आलस्यम् | - | अलसता, अल्छीपन |
| रिपुः | - | वैरी, शत्रु |
| न अवसीदति | - | न खिद्यति, दुःख पाउँदैन |
| प्रियवाक्यप्रदानेन | - | मधुरभाषणेन, मिठो बोल्नाले |
| तुष्यन्ति | - | प्रसीदन्ति, खुसी हुन्छन् |
| दरिद्रता | - | दारिद्र्यम्, दरिद्रपना |
| भूतिः | - | ऐश्वर्यम्, सम्पन्नता |
| दीर्घसूत्रता | - | मन्दता, सुस्तपन |
| वृत्तम् | - | चरित्रम्, चरित्र |
| वित्तम् | - | धनम्, सम्पत्ति |

## पदच्छेदः, अन्वयः, सरलार्थश्च

१

पदच्छेदः - आलस्यम्, हि, मनुष्याणाम्, शरीरस्थः, महान्, रिपुः, नास्ति, उद्यमसमः, बन्धुः, यत्, कृत्वा, न, अवसीदति ।

अन्वयः - हि आलस्यं मनुष्याणां शरीरस्थः महान् रिपुः (अस्ति) । उद्यमसमः बन्धुः नास्ति, यत् कृत्वा (मनुष्यः) न अवसीदति ।

सरलार्थः - आलस्यं मनुष्याणां महान् शत्रुः वर्तते । तच्च आलस्यं बहिः न भवति, मनुष्याणां शरीरे एव भवति । तथैव मनुष्याणां शरीरे उद्यमः अपि भवति । सः अस्माकं बान्धवः अस्ति । उद्यमेन मनुष्यस्य कल्याणं सम्भवति । तस्माद् मनुष्यः आलस्यं न कुर्यात्, अपि तु उद्योगम् एव सर्वदा विदध्यात् ।

२.

पदच्छेदः - प्रियवाक्यप्रदानेन, सर्वे, तुष्यन्ति, जन्तवः, तस्मात्, प्रियम्, हि, वक्तव्यम्, वचने, का, दरिद्रता ?

अन्वयः - प्रियवाक्यप्रदानेन सर्वे जन्तवः तुष्यन्ति, तस्मात् प्रियं हि वक्तव्यम्, वचने का दरिद्रता ?

सरलार्थः - सर्वे प्राणिनः प्रियं वाक्यं श्रोतुम् इच्छन्ति । मधुरां वाणीं श्रुत्वा सर्वे प्राणिनः सन्तुष्टाः भवन्ति । अप्रियं वाक्यं कः अपि श्रोतुं नेच्छति । अतः सदा प्रियम् एव वाक्यं वक्तव्यम् । प्रियवाक्यस्य कृते अस्माभिः लोभः न कर्तव्यः ।

३.

पदच्छेदः - षड्, दोषाः, पुरुषेण, इह, हातव्या, भूतिम्, इच्छता, निद्रा, तन्द्रा, भयम्, क्रोधः, आलस्यम्, दीर्घसूत्रता ।

अन्वयः - इह भूतिम् इच्छता पुरुषेण षड् दोषाः हातव्याः । निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ।

सरलार्थः - यः नरः अस्मिन् लोके स्वस्य कल्याणम् इच्छेत्, सः निद्रा, तन्द्रा, भयम्, क्रोधः, आलस्यम्, दीर्घसूत्रता चेति षड् दोषान् त्यजेत् । अतिनिद्रादिदोषरहितस्य एव पुरुषस्य लोके समृद्धिर्भवति इत्यर्थः ।

४.

पदच्छेदः - वृत्तम्, यत्नेन, संरक्षेद्, वित्तम्, एति, च, याति, च, अक्षीणः, वित्ततः, क्षीणः, वृत्ततः, तु, हतः, हतः ।

अन्वयः - वृत्तं यत्नेन संरक्षेत्, वित्तम् एति च याति च । वित्ततः क्षीणः अक्षीणः (एव), वृत्ततः हतः तु हतः (एव) ।

सरलार्थः - मनुष्यः स्वस्य चरित्रं यत्नपूर्वकं रक्षेत् । धनं तु आयाति, गच्छति च । यस्य धनं नश्यति तस्य किम् अपि न नश्यति । यस्य च चरित्रं नश्यति तस्य तु सर्वं नश्यति ।

५.

पदच्छेदः - मनसि, एकम्, वचसि, एकम्, कर्मणि, एकम्, महात्मनाम्, मनसि, अन्यद्, वचसि, अन्यद्, कर्मणि, अन्यद्, दुरात्मनाम् ।

अन्वयः - महात्मनां मनसि एकं वचसि एकं कर्मणि एकं (भवति) । दुरात्मनां मनसि अन्यद् वचसि अन्यत् कर्मणि अन्यद् (भवति) ।

सरलार्थः - सज्जनाः मनसि यथा विचारयन्ति तथा एव वदन्ति, तादृशम् एव व्यवहारं च कुर्वन्ति । किन्तु दुर्जनाः यथा विचारयन्ति तथा न वदन्ति, यथा वदन्ति तथा व्यवहारं च न कुर्वन्ति । सज्जनानां विचारे, भाषणे व्यवहारे च समानता भवति, दुर्जनानां तु विचारे, वचने, व्यवहारे च समानता न भवति ।

## अभ्यासः

### श्रवणं भाषणं च

**१. शिक्षकस्य मुखात् पद्यानि शृणुत । उच्चारणक्रमे कुत्र कुत्र विश्रामः भवति ? इति च वदत ।**

**२. पाठस्य तृतीयं पद्यं श्रुत्वा पुरुषेण के दोषाः त्यक्तव्याः ? वदत ।**

**३. पाठस्य पद्यानि श्रुत्वा अधस्तनाः शब्दाः कस्मिन् पद्ये सन्ति ? परस्परं योजयत**

| समूहः क | समूहः ख |
|---|---|
| शरीरस्थः | तृतीये |
| वक्तव्यम् | चतुर्थे |
| हातव्याः | प्रथमे |
| संरक्षेद् | द्वितीये |

४. पाठस्य पद्यानि शिक्षकम् अनुसृत्य उच्चारयत ।

५. सर्वे एकैकशः एकम् एकं पद्यम् उच्चैः उच्चारयत, अन्ये तस्य उच्चारणम् अनुकुरुत ।

६. अधस्तनपदानि सम्यग् उच्चारयत

नास्त्युद्यमसमः, प्रियवाक्यप्रदानेन, दीर्घसूत्रता, वृत्ततस्तु, कर्मण्यन्यद्

७. 'कः सज्जनः ? कश्च दुर्जनः ?' इति विषये कक्षायां विमर्शं कृत्वा निष्कर्षं श्रावयत ।

८. अधस्तनं श्लोकं श्रुत्वा शिक्षकस्य साहाय्येन आशयं वदत

न क्वचिन्मानवः कुर्याद् हिंसनं सर्वप्राणिनाम् ।

भावं प्रेम्णो दयायाश्च सर्वत्र संसृजेन्नरः ॥

## पठनम्

१. प्रथमपद्यस्य सरलार्थं पठित्वा उत्तरयत

(क) कः मनुष्याणां रिपुः अस्ति ?

(ख) आलस्यं कुत्र भवति ?

(ग) कः मनुष्याणां बान्धवः ?

२. तृतीयस्य पद्यस्य पदच्छेदं पठित्वा अन्वयं कुरुत ।

३. चतुर्थस्य पद्यस्य सरलार्थं पठित्वा एतत् पद्यं किम् उपदिशति ? वदत ।

४. पाठं पठित्वा सत्यासत्यं विवेचयत

(क) आलस्यं शरीराद् बहिः भवति ।

(ख) अस्माभिः सदा प्रियं वक्तव्यम् ।

(ग) मनुष्येण कल्याणाय दोषाः न त्यक्तव्याः ।

(घ) वित्ताद् वृत्तम् मूल्यवत् ।

(ङ) महात्मानां मनसि वचसि व्यवहारे च भिन्नता भवति ।

५. पाठस्य तृतीयं पद्यं पठित्वा स्वस्य कल्पाणाय त्यक्तव्यानां दोषाणां सूचीं निर्मात ।

६. **अधस्तनं प्रसङ्गं पठित्वा चरित्रस्य महत्त्वविषये कक्षायां विमृशत**

व्यवहारे सद्गुणवान् जनः शीलवान् भवति । सम्यग् आचरणम् एव शीलं भवति इति विद्वांसः कथयन्ति । शीलवान् जनः सत्यं वदति, असत्यभाषणे न प्रवर्तते । स सर्वैः अपि जनैः सह शिष्टतया व्यवहरति । स मातुः पितुः मान्यजनानां च आदरं करोति, तेषां वचनानि पालयति ।

शीलवान् जनः सदैव सत्कर्मणि प्रवृत्तः भवति । सः कदापि पापकर्मणि न प्रवर्तते । तस्य मनसि सदा पुण्यकर्मणः चिन्तनं भवति । स दीनानां साहाय्यं करोति । स कस्मैचिदपि दुःखं न ददाति । स नित्यं परेषां स्वस्य च हितचिन्तनं करोति ।

अपगतं धनं पुनः अर्जयितुं शक्यते परन्तु एकवारम् अपगतं शीलं न भूयः प्रत्यागच्छति । धनेन हीनः जनः अपि शीलवान् अस्ति चेत् सः समाजे सम्मानं लभते परन्तु शीलेत हीनं धनवन्तम् अपि जनं सामाजिकाः तिरस्कुर्वन्ति ।

## लेखनम्

१. **अधस्तनपदानि शुद्धानि कृत्वा लिखत**

शरिरस्थः, तुस्यन्ति, पुरूषेण, क्षिणः, बचस्येकम् ।

२. **पाठं पठित्वा अधस्तनप्रश्नानाम् उत्तराणि लिखन्तु**

(क) मनुष्याणां महान् रिपुः कः अस्ति ?

(ख) किं कृत्वा मनुष्यो न अवसीदति ?

(ग) जन्तवः कथं तुष्यन्ति ?

(घ) कुत्र दरिद्रता न कार्या ?

(ङ) किम् एति याति च ?

(च) केन क्षीणः अक्षीण इव भवति ?

(छ) महात्मनां किं लक्षणम् ?

(ज) दुर्जनाः किं कुर्वन्ति ?

**३.** **अधस्तनानि पदानि प्रयुज्य एकैकं वाक्यं रचयत**

कृत्वा, जन्तवः, दोषाः, संरक्षेद्, दुरात्मनाम् ।

**४.** **समुचितपदविन्यासेन रिक्तस्थानानि पूरयत**

(क) मनुष्याणां बन्धुः ............. अस्ति । (आलस्यम्, उद्यमः)

(ख) प्राणिनः ........ तुष्यन्ति । (प्रियवाक्येन, दुर्वाच्येन)

(ग) मनुष्यः .......... यत्नेन संरक्षेत् । (वित्तम्, वृत्तम्)

(घ) ......... हतो हतः । (वित्ततस्तु, वृत्ततस्तु)

(ङ) मनसि, वचसि कर्मणि च एकं ......... भवति । (महात्मनाम्, दुरात्मनाम्)

**५.** **अधस्तनेषु विषयेषु एकम् एकम् अनुच्छेदं रचयत**

(क) निद्रा (ख) क्रोधः (ग) आलस्यम्

**६.** **अधस्तनं श्लोकं पठित्वा मानवः कथं भवितुं शक्यते ? इति लिखत**

सर्वैः सह मिलित्वा तु नरः सुखमवाप्नुयात् ॥

ईर्ष्यां द्वेषं विहायैव मानवो मानवो भवेत् ।

## व्याकरणानुशीलनम्

**१.** **सोदाहरणं यण्सन्धिनियमान् पठत**

इ/ई+अ/आ/उ/ए= य्

अति+अन्तम् = अत्यन्तम्, इति+आदि = इत्यादि, अति+उक्तिः = अत्युक्तिः, प्रति+एकम् = प्रत्येकम्, नदी+अम्बुः = नद्यम्बुः, नदी+आयामः = नद्यायामः, नारी+उत्साहः = नार्युत्साहः, नदी+एका = नद्येका

उ/ऊ+अ/आ/ए/ऐ = व्

अनु+अयः = अन्वयः, सु+आगतम् = स्वागतम्, अनु+एषणम् = अन्वेषणम्, भानु+ऐश्वर्यम् = भान्वैश्वर्यम्, वधू+अनुसन्धानम् = वध्वनुसन्धानम्, चमू+आक्रमणम् = चम्वाक्रमणम्, वधू+एकता = वध्वैकता, वधू+ऐश्वर्यम् = वध्वैश्वर्यम्

२. **सन्धिगतं रूपं लिखत**

शशी+उदेति ...........

मातृ+आदेशः ............

मधु+अस्ति .............

गौरी+आगच्छति ................

गृहेषु+आसक्तः .........

पितृ+आज्ञा ..............

अभि+उदयः ..............

गच्छति+एषः ............

घस्लृ+आदेशः .............

वधू+आगमनम् ............

दधि+आनय ...............

३. **सन्धिविच्छेदं कुरुत**

यद्यपि ..............

इत्यादि ...............

गुर्वाज्ञा ...............

करोम्यहम् ..............

कुर्विदम् ...............

मात्रनुज्ञा ...........

भ्रात्रादेशः ...............

भ्वादिः ...........

स्वागतम् .............

पित्रधीनः ..............

प्रत्येकम् ...............

४. **लङ्लकारस्य प्रदत्तानि रूपाणि पठत**

**हस्-धातुः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अहसत् | अहसताम् | अहसन् |
| मध्यमः पुरुषः | अहसः | अहसतम् | अहसत |
| उत्तमः पुरुषः | अहसम् | अहसाव | अहसाम |

कृ– धातुः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमः पुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमः पुरुषः | अकरवम् | अकुर्व | अकुर्म |

**५. लङ्लकारे हस्धातोः रूपाणि इव प्रदत्तानां धातूनां रूपाणि लिखत**

पठ्, वद्, लिख्, चल्, धाव्, गम्, नम्, पच् ।

**६. पदानि परस्परं संयोज्य वाक्यानि रचयत**

| | | |
|---|---|---|
| अहम् | | अकुरुताम् |
| कर्मकराः | | अकरोत् |
| वयम् | | अकुरुत |
| माता | कार्यम् | अकरवम् |
| त्वम् | | अकरोः |
| पण्डितौ | | अकुर्म |
| यूयम् | | अकुर्वन् |

**७. निर्देशानुसारेण लङ्लकारस्य रूपेण पूरयत**

(क) बालकः तथैव............... । (हस्- प्रथमपुरुषे)

(ख) त्वं निबन्धं..................। (पठ्- मध्यमपुरुषे)

(ग) नीराजनः कवितां.............। (लिख्- प्रथमपुरुषे)

(घ) कथाकाराः कथां............... । (वद्- प्रथमपुरुषे)

(ङ) आवां तत्र...................... । (गम्- उत्तमपुरुषे)

## कोषानुशीलनम्

### अथ व्योमवर्गः

| आकाशस्य नामानि |
| --- |
| द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ॥१॥ |
| नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥२॥ |
| वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी ॥३॥ |
| विहायसोऽपि नाकोऽपि द्युरपि स्यात् तदव्ययम् ॥४॥ |
| तारापथोऽन्तरिक्षं च मेघाध्वा च महाबिलम् ॥५॥ |
| ॥ इति व्योमवर्गः ॥ |

## पदानुशीलनी

**लिङ्गव्यवस्था** - अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे (ङ), स्त्रीनपुंसकलिङ्गत्वे च (च) इति सङ्केतः प्रदत्तो वर्तते ।

**आकाशस्य षोडश नामानि** - द्यौः (ख), द्यौः (दिव्) (ख), अभ्रम् (ग), व्योम (ग), पुष्करम् (ग), अम्बरम् (ग), नभः (ग), अन्तरिक्षम् (ग), गगनम् (ग), अनन्तम् (ग), सुरवर्त्म (ग), खम् (ग), वियद् (ग), विष्णुपदम् (ग), आकाशम् (ङ), विहायः (ङ), विहायसः (क), नाकः (क), द्युः (घ), तारापथः (क), अन्तरिक्षम् (ग), मेघाध्वा (क), महाबिलम् (ग) ।

### अभ्यासः

१. **अधस्तनं पद्यं शुद्धम् उच्चरत**

द्योदिवौ द्वे स्त्रियामभ्रं व्योमपुष्करमम्बरम् ।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥

२. **आकाशस्य दश नामानि पृथक् पृथक् लिखत ।**

३. **आकाशस्य नाम्नां पङ्क्तिद्वयं विलिख्य नामानि पृथक् लिखत ।**

४. आकाश-शब्दः कस्मिन् कस्मिन् लिङ्गे अस्ति ?

५. रिक्तस्थानं पूरयत

नभोऽन्तरिक्षं गगनमनन्तं ............ खम् ।

वियद् ........ वा .... पुंस्याकाशविहायसी ! ॥

.......... नाकोऽपि ....... स्यात् तदव्ययम् ।

तारापथोऽन्तरिक्षं च ......... च ............ ॥

६. दिव्-शब्दस्य रूपावलीं पूरयत

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | द्यौः | दिवौ | दिवः |
| द्वितीया | दिवम् | ........ | दिवः |
| तृतीया | दिवा | द्युभ्याम् | द्युभिः |
| चतुर्थी | दिवे | ........ | द्युभ्यः |
| पञ्चमी | दिवः | ........ | ........ |
| षष्ठी | ........ | दिवोः | दिवाम् |
| सप्तमी | दिवि | ........ | ........ |
| सम्बोधनम् | हे द्यौः ! | ........ | ........ |

७. व्योम-शब्दस्य रूपावलीं लिखत ।

८. प्रदत्तैः पदैः वाक्यानि रचयत

नभसि, अन्तरिक्षम्, गगनात्, दिवा ।

**प्रतिभाप्रदर्शनाभ्यासः**

पाठाद् अतिरिक्तम् अन्यं नीतिपद्यम् अन्विष्य कक्षायां श्रावयत । तस्य सरलार्थं च स्ववचसा बोधयत ।

# गुरुकुलपरम्परा



संयमः  नमस्ते साध्वि ! कुत्र गच्छन्ती असि ?

साध्वी  नमस्ते संयम ! ग्रामान्तरं गच्छन्ती अस्मि । तत्र एकं गुरुकुलम् अस्ति । मम अनुजः अपि तत्रैव पठति । अद्य गुरुकुलस्य वार्षिकोत्सवकार्यक्रमः अस्ति । अतः अहं तत्र गन्तुम् इच्छामि ।

संयमः  तत्र गुरुकुलम् अस्ति इति तु अहम् अपि श्रुतवान् आसम् । परन्तु एकवारम् अपि तत्र गतवान् नास्मि । कीदृशं भवति गुरुकुलम् ?

साध्वी  गुरुकुलम् शिक्षालयः एव । स च आवासीयः शिक्षालयः । तत्रत्याः छात्राः शास्त्रीयैः विषयैः सह आधुनिकान् विषयान् च पठन्ति । मम अनुजस्य गुरुकुलं कुमाराणां कृते अस्ति । अपरस्मिन् ग्रामे कन्यानां कृते कन्यागुरुकुलं च अस्ति ।

संयमः  गुरुकुलम् इति तस्य नाम कथम् ?

साध्वी  गुरोः कुलम् एव गुरुकुलम् । गुरुणा सञ्चालिता विद्याध्ययनस्य परम्परा तत्र सञ्चलति ।

संयमः  मम पितामहः गुरोः विषये एकं श्लोकं नित्यं कथयति । अहम् अपि तं श्लोकं जानामि -

**गुशब्दस्त्वन्धकारः स्याद् रुशब्दस्तन्निवारकः ।**

**अन्धकारविरोधित्वाद् गुरुरित्यभिधीयते ॥**

गुरुकुलस्य शिक्षायाः परम्परा कदा प्रारब्धा भवेत् ?

साध्वी एषा अतीव प्राचीना परम्परा अस्ति । प्रह्लादस्य नाम श्रुतवान् असि किम् ?

संयमः आम्, स दैत्यराजस्य हिरण्यकशिपोः पुत्रः आसीत् इति श्रुतम् । महान् हरिभक्तः सः ।

साध्वी उचितं श्रुतवान् असि । प्रथमस्य सत्ययुगस्य कथा एषा । स शुक्राचार्यस्य गुरुकुले पठति स्म ।

संयमः अहो ! एतावती प्राचीना अस्ति गुरुकुलस्य परम्परा ?

साध्वी तावत् एव न । रामलक्ष्मणौ वसिष्ठस्य गुरुकुले श्रीरामपुत्रौ लवकुशौ वाल्मीकेः गुरुकुले, श्रीकृष्ण-बलरामौ सान्दीपनेः गुरुकुले, पाण्डवाः कौरवाश्च द्रोणाचार्यस्य राजकीये गुरुकुले अपठन् इति च श्रूयते ।



संयमः साध्वि ! गुरुकुलस्य परम्परायाः विषये त्वम् अधिकं ज्ञातवती असि ।

साध्वी मम अनुजस्य गुरुकुलस्य वार्षिकोत्सवस्य अवसरे अहं प्रतिवर्षं तत्र गच्छामि । तत्रत्यानां गुरूणां छात्राणां च भाषणं श्रुत्वा अहम् एतत् सर्वं ज्ञातवती अस्मि । एतावदेव न, तत्रत्येषु कार्यक्रमेषु आदर्शजीवनचर्यायाः, युक्ताहार-विहारयोः, चारित्रिकसमुन्नतेः, आदर्शजीवनशैल्याः च विषयेषु परिचर्चा भवति ।

संयमः एवम् अस्ति किम् ? तर्हि तु अहम् अपि गन्तुम् इच्छामि ।

साध्वी आगच्छ तावत् । सहैव गच्छाव ।

संयमः गच्छाव ।

## शब्दार्थाः

| | | |
|---|---|---|
| ग्रामान्तरम् | - | अन्यं ग्रामम्, अर्को गाउँमा |
| अनुजः | - | भ्राता, भाइ |
| एकवारम् | - | एककृत्वः, एकपटक |
| तत्रत्याः | - | तत्र स्थिताः, त्यहाँ रहेका |
| प्राचीना | - | पुरातनी, पुरानो |
| अतीव | - | अत्यन्तम्, अति नै |
| पुत्रः | - | तनयः, छोरा |
| अधिकम् | - | बहु, धेरै |
| दिनचर्या | - | दैनन्दिनी, दैनिकी |
| युक्ताहारः | - | उचितः आहारः, उपयुक्त भोजन |
| समुन्नतिः | - | सम्यग् विकासः, राम्रो उन्नतिः |
| जीवनशैली | - | जीवनरीतिः, जिउने तरिका |
| सहैव | - | साकमेव, सँगसँगै |

## अभ्यासः

### श्रवणं भाषणं च

१. **संवादस्य कक्षायां श्रवणानन्तरं स्वमातृभाषायां पाठसारं श्रावयत ।**

२. **संयमस्य कथनं श्रुत्वा प्रश्नान् उत्तरयत**

(क) संयमः किं श्रुतवान् आसीत् ?

(ख) कः दैत्यराजः आसीत् ?

(ग) दैत्यराजस्य पुत्रस्य नाम किम् ?

(घ) का गुरुकुलस्य विषये अधिकं जानाति ?

३. **पाठस्य पद्यं श्रुत्वा शिक्षकसाहाय्येन तस्य पदच्छेदं कुरुत ।**

४. **शिक्षकात् पदानि श्रुत्वा अनुवाचयत**

अनुजः, वार्षिकोत्सवः, अवसरः, प्रतिवर्षम्, तत्रत्यानाम्, गुरूणाम्, छात्राणाम्,

भाषणम्, श्रुत्वा, ज्ञातवती, एतावदेव, कार्यक्रमेषु, आदर्शजीवनचर्या, युक्ताहारविहारौ, चारित्रिकसमुन्नतिः, आदर्शजीवनशैली, परिचर्या ।

५. **पाठस्य पद्यानां लयोच्चारणपूर्वकं सामूहिकवाचनं कुरुत ।**

६. **शिक्षकस्य साहाय्येन पाठस्य पद्यस्य अन्वयं श्रावयत ।**

७. **शिक्षकात् अधस्तनं शास्त्रसन्दर्भं श्रुत्वा परस्परं विमृशत**
**मुनीनां दशसाहस्रं योऽन्नपानादिपोषणात् ।**
**अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥**

## पठनम्

१. **बोधपाठं पठित्वा प्रश्नान् उत्तरयत**

विद्वांसः विद्यां मानवस्य तृतीयं नेत्रं मन्यन्ते । विद्यायाः प्रकाशः अज्ञानस्य अन्धकारं विनाशयति । विद्यया एव मानवः कर्तव्याकर्तव्ययोः विवेकं कर्तुं शक्नोति । विद्याहीनः जनः 'किं कर्तव्यम्, किं च अकर्तव्यम् ?' इति न जानाति । 'विद्याहीनः जनः पशुवद् भवति' इति शास्त्रं निर्दिशति । अतः विद्यया एव मानवः मानवः भवति । विद्यया एव मानवः समुन्नतिं प्राप्नोति । विद्यया एव मानवस्य जीवनं सम्यक् चलति । विद्या शिक्षा अपि कथ्यते । शिक्षा जन्मतः एव आरब्धा भवति । सर्वप्रथमं माता एव शिशुं व्यवहारं शिक्षयति । अतः माता सर्वेषां प्रथमा शिक्षिका वर्तते । माता शिक्षिता भवति चेत् सन्ततयः अपि शिक्षिताः भवन्ति । तेन परिवारः शिक्षितः भवति । एवं समाजः एव शिक्षितः भवति । अतः शिक्षितस्य समाजस्य निर्माणाय नार्यः शिक्षिताः कर्तव्याः ।

**प्रश्नाः**

(क) विद्या मानवस्य तृतीयं नेत्रम् इति के मन्यन्ते ?

(ख) कया मानवः मानवः भवति ?

(ग) विद्याया प्रकाशः किं विनाशयति ?

(घ) विद्यया मानवः किं कर्तुं शक्नोति ?

(ङ) विद्याहीनः जनः किं न जानाति ?

(च) विद्यया मानवस्य जीवनं कथं चलति ?

(छ) का अस्माकं प्रथमा शिक्षिका वर्तते ?

(ज) शिक्षा कुतः आरब्धा भवति ?

(झ) सन्ततयः कथं शिक्षिताः भवन्ति ?

(ञ) शिक्षितस्य समाजस्य निर्माणाय किं कर्तव्यम् ?

**२. गुरोः महत्त्वविषये पाठप्रदत्तं श्लोकं पठित्वा शिक्षकस्य साहाय्येन भावार्थं प्रकाशयत**

**३. अधस्तनं श्लोकं शिक्षकमुखात् श्रुत्वा राज्यस्य उत्तराधिकारिविषये कक्षायां परामृशत**

**शाश्वतोऽयं सदा धर्मः स्थितोऽस्माकं नरर्षभ ! ।**
**ज्येष्ठे त्वयि स्थिते रामे कनीयान् न भवेन्नृपः ॥**

**४. मित्रद्वयं मिलित्वा पाठस्य संवादं साभिनयं पठित्वा श्रावयत ।**

**५. पाठस्य शब्दान् प्रयुज्य निर्मितानि नवीनानि वाक्यानि पठत**

(क) पुरा मुनयः गुरुकुलं सञ्चालयन्ति स्म ।

(ख) अहं केवलम् एकवारं मुक्तिक्षेत्रम् अगच्छम् ।

(ग) चित्रवने देवघट्टे एकं सुन्दरं कन्यागुरुकुलम् अस्ति ।

(घ) संस्कृतं विश्वस्य प्राचीना भाषा अस्ति ।

(ङ) मम पितरौ प्रतिवर्षं गुरुकुलाय अन्नदानं कुरुतः ।

## लेखनम्

**१. अधस्तनस्य साध्व्याः कथनस्य आधारेण प्रश्नोत्तराणि पूरयत**

साध्वी - मम अनुजस्य गुरुकुलस्य वार्षिकोत्सवस्य अवसरे अहं प्रतिवर्षं तत्र गच्छामि । तत्रत्यानां गुरूणां छात्राणां च भाषणं श्रुत्वा अहम् एतत् सर्वं ज्ञातवती अस्मि । तत्रत्येषु कार्यक्रमेषु आदर्शजीवनचर्यायाः, युक्ताहार-विहारयोः, चारित्रिकसमुन्नतेः, आदर्शजीवनशैल्याः च विषयेषु परिचर्चा भवति ।

(क) वार्षिकोत्सवः कदा भवति ?

वार्षिकोत्सवः ................ भवति । (प्रतिसप्ताहम्, प्रतिमासम्, प्रतिवर्षम्)

(ख) तत्र गुरवः छात्राः च किं कुर्वन्ति ?

तत्र गुरवः छात्राः च ................ कुर्वन्ति । (भाषणम्, भ्रमणम्, नर्तनम्)

(ग) गुरुकुलस्य विषये का ज्ञातवती अस्ति ?

गुरुकुलस्य विषये ................ ज्ञातवती अस्ति । (संयमः, साध्वी, ग्रामीणः)

(घ) वार्षिकोत्सवे विविधेषु विषयेषु किं भवति ?

वार्षिकोत्सवे विविधेषु विषयेषु ................ भवति । (कलहः, वार्ता, परिचर्चा)

२. **पाठाधारेण पूर्णवाक्येन प्रश्नान् उत्तरयत**

(क) साध्वी कुत्र गच्छन्ती अस्ति ?

(ख) गुरुकुले कः पठति ?

(ग) अद्य गुरुकुले कः कार्यक्रमः अस्ति ?

(घ) कः एकवारम् अपि गुरुकुले गतवान् नास्ति ?

(ङ) गुरुकुलं कीदृशः शिक्षालयः ?

(च) गुरुकुलीयाः छात्राः कान् विषयान् पठन्ति ?

(छ) साध्व्याः अनुजस्य गुरुकुलं केषां कृते अस्ति ?

(ज) कन्यागुरुकुलं कुत्र अस्ति ?

(झ) गुरुकुले केन सञ्चालिता विद्याध्ययनस्य परम्परा सञ्चलति ?

(ञ) संयमः कस्य विषये श्लोकं जानाति ?

३. **पाठस्य पद्यस्य श्रुतलेखनं कुरुत ।**

४. **पाठाद् अन्विष्य पर्यायपदानि लिखत**

(क) भ्राता – अनुजः

(ख) एककृत्वः – ..........

(ग) पुरातनी – ...........

(घ) विद्या – ...........

(ङ) दानवराजस्य – ...........

**५. पाठाधारेण रिक्तस्थानं पूरयत**

गुशब्दस्त्वन्धकारः .......... रुशब्दस्तन्निवारकः ।

.................................. गुरुरित्यभिधीयते ॥

**६. अधस्तनीं हास्यकणिकां पठित्वा एकपदेन प्रश्नान् उत्तरयत**

(पुस्तके पृष्ठमध्ये दृष्ट्वा कालिदासः रोदिति । तदनन्तरम्.....)

विद्योत्तमा - पतिदेव ! रोदनस्य कारणं किमस्ति ?

कालिदासः - किमपि न ।

विद्योत्तमा - (मनसा एव- पुस्तके लिखितस्य पाठस्य भावगाम्भीर्यं प्रविश्य रोदनं भवेत्) पुनः कथयति- भवता रोदनस्य कारणं अवश्यं वक्तव्यम्, नो चेत्, अहम् अपि रोदिमि ।

(परन्तु स ततः अपि तारस्वरेण रोदनं करोति ।)

कालिदासः - बाल्यकाले मया पठितः 'क' वर्णः कियान् स्थूलः आसीत् परन्तु अधुना अत्र पुस्तके पश्यामि, 'क' तु अतीव कृशः अस्ति । एतेन दुःखी भूत्वा रोदिमि ।

**प्रश्नाः**

(क) कालिदासः किं करोति ?

(ख) का कालिदासं कथयति ?

(ग) कः अतीव कृशः अस्ति ?

(घ) कालिदासः कथं रोदनं करोति ?

## व्याकरणानुशीलनम्

१. **सोदाहरणम् अयादिसन्धिनियमान् पूर्वरूपसन्धिनियमान् च पठत**

**अयादिसन्धिः**

ए+अच् = अय् ने+अनम् =नयनम्

ऐ+अच् = आय् गै+अकः = गायकः

ओ+अच् = अव् पो+अनः = पवनः

औ+अच् = आव् पौ+अकः = पावकः, नौ+इकः = नाविकः

**पूर्वरूपसन्धिः**

ए(पदान्तः)+अ = एऽ ते+अपि = तेऽपि, गृहे+अस्ति =गृहेऽस्ति

ओ(पदान्तः)+अ =ओऽ मानवो+अयम् = मानवोऽयम्, शम्भो+अत्र = शम्भोऽत्र

२. **सन्धिगतं रूपं लिखत**

रिपो + ए ..............

कवे + ए ...........

भो + अति ................

ने + अति ..............

गै + अकः ...........

नै+इका ...............

भौ+उकः ...............

प्रस्तौ+अकः ...............

साधो + ए ............

जे + अति ...........

स्थाने + अस्मिन् ............

गुरो + अत्र ...............

हरे + अव .........

विष्णो + अव ...............

अतो + अस्मि ............

ग्रामे + अगच्छत् ..............

३. **सन्धिविच्छेदं कुरुत**

असावयम् .............

शयनम् ................

भाविका .................

गायति ............

| | |
|---|---|
| वागर्थाविव ........... | नयति ................ |
| विजयते ............. | तावकः ........... |
| कूर्मोऽङ्गानि ........... | अवेक्षेऽहम् ............ |
| अपरिहार्येऽर्थे ............. | नाशोऽस्ति ............ |
| क्रोधोऽभिजायते ............... | वर्ततेऽत्र .................. |

४. **उदाहरणानुसारेण रूपावलीं पूरयत**

| धातुः + प्रत्ययः | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| पठ् + क्तवतु | पठितवान् | पठितवती | पठितवत् |
| लिख् + क्तवतु | ............ | ............ | ............. |
| कथ् + क्तवतु | ............ | ............. | ............. |
| हस् + क्तवतु | ............ | ............. | ............. |
| पूज् + क्तवतु | ............ | ............. | ............. |
| धाव् + क्तवतु | ........... | ............ | ............. |
| चल् + क्तवतु | .......... | ............ | ............. |
| भ्रम् + क्तवतु | .......... | .......... | ........... |
| गम् + क्तवतु | गतवान् | ........... | ............ |
| कृ + क्तवतु | ........... | ............ | .............. |
| वद् + क्तवतु | ........... | उक्तवती | ............ |
| भू + क्तवतु | भूतवान् | ............ | ........... |
| दृश् + क्तवतु | .......... | ............. | दृष्टवत् |
| नी + क्तवतु | ........... | नीतवती | ............. |
| पृच्छ् + क्तवतु | पृष्टवान् | ........... | ............. |
| प्र + आप् + क्तवतु | ........... | प्राप्तवती | ........... |
| ज्ञा + क्तवतु | ........... | ............ | ज्ञातवत् |

| | | | |
|---|---|---|---|
| लभ् + क्तवतु | ........... | लब्धवती | ............ |
| श्रु + क्तवतु | श्रुतवान् | ............ | ............. |
| पा + क्तवतु | ............ | ........... | पीतवत् |
| स्था + क्तवतु | ........... | स्थितवती | ........... |

**क्तवतु-प्रत्ययः भूतकाले कर्तृवाच्ये प्रयुज्यते । एतस्य प्रयोगः क्रियार्थे विशेषणरूपेण च भवति । अत एव रूपाणि त्रिषु लिङ्गेषु सर्वासु विभक्तिषु च चलन्ति । मूलक्रियारूपेण तु प्रथमाविभक्तौ एव प्रयुज्यते । एतस्य प्रयोगः कर्तुः लिङ्गवचनानुसारेण भवति ।**

५. **वचनपरिवर्तनं कुरुत**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| राहुलः गतवान् । | ....... ........। | ...... .........। |
| ....... ........। | छात्रौ पठितवन्तौ । | ..... .........। |
| ....... ........। | ....... ........। | ते दृष्टवन्तः । |
| निभा श्रुतवती । | ....... ........। | ....... ........। |
| ...... .......। | बालिके हसितवत्यौ । | ....... ........। |
| ....... ........। | ........ .......। | ताः कथितवत्यः । |
| मित्रं ज्ञातवत् । | ....... ........। | ....... ........। |
| ........ .......। | फले पतितवती । | ....... ........। |
| ........ .......। | ...... .........। | तानि भ्रमितवन्ति । |

६. **निर्देशानुसारेण वाक्यपरिवर्तनं कुरुत**

(क) अश्विनीकुमारः पारितोषिकं लब्धवान् । (बहुवचने)

(ख) छात्रः प्रत्युत्तरं लिखितवान् । (स्त्रीलिङ्गे)

(ग) विद्यालये वार्षिकोत्सवः अभवत् । (क्तवतुप्रत्यये)

(घ) मित्राणि विदेशं गतवन्ति । (एकवचने)

(ङ) जनाः उच्चस्वरेण हसितवन्तः । (लङ्लकारे)

## कोषानुशीलनम्

### अथ दिग्वर्गः

**दिशो नामानि**

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ॥१॥

**पूर्वादीनाम् एकैकं नाम**

प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥१॥
उत्तरा दिगुदीची स्याद्दिश्यं तु त्रिषु दिग्भवे ॥२॥

**मेघस्य नामानि**

अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहकः ॥१॥
धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् ॥२॥
घनजीमूतमुदिरजलमुग्धूमयोनयः ॥३॥

**विद्युतो नामानि**

शम्पा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ॥१॥
तडित् सौदामनी विद्युच्चञ्चला चपला अपि ॥२॥

**चन्द्रस्य नामानि**

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥१॥
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥२॥
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥३॥
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥४॥

## पदानुशीलनी

**दिशः पञ्च नामानि -** (अत्र सर्वाणि नामानि स्त्रीलिङ्गे) दिक्, ककुभ्, काष्ठा, आशा, हरित् ।

**पूर्वादीनाम् एकैकं नाम -** (अत्र सर्वाणि नामानि स्त्रीलिङ्गे) प्राची - पूर्वदिशो नाम, अवाची - दक्षिणदिशो नाम, प्रतीची - पश्चिमदिशायाः नाम, उदीची - उत्तरदिशायाः नाम ।

**मेघस्य पञ्चदश नामानि -** (अत्र 'अभ्रम्' इति नपुंसके, अन्यानि पुंलिङ्गे) अभ्रम्, मेघः,

वारिवाहः, स्तनयित्नुः, बलाहकः, धाराधरः, जलधरः, तडित्वान्, वारिदः, अम्बुभृत्, घनः, जीमूतः, मुदिरः, जलमुक्, धूमयोनिः ।

**विद्युतो दश नामानि -** (अत्र सर्वाणि नामानि स्त्रीलिङ्गे) शम्पा, शतह्रदा, ह्रादिनी, ऐरावती, क्षणप्रभा, तडित्, सौदामनी, विद्युत्, चञ्चला, चपला ।

**चन्द्रस्य विंशतिः नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) हिमांशुः, चन्द्रमाः, चन्द्रः, इन्दुः, कुमुदबान्धवः, विधुः, सुधांशुः, शुभ्रांशु, ओषधीशः, निशापतिः, अब्जः, जैवातृकः, सोमः, ग्लौः, मृगाङ्कः, कलानिधिः, द्विजराजः, शशधरः, नक्षत्रेशः, क्षपाकरः ।

## अभ्यासः

१. **अधस्तनात् पद्यात् मेघस्य दश नामानि पृथक् कृत्वा लिखत**

अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहकः ।

धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् ॥

२. **विद्युतः नाम्नां पङ्क्तिद्वयं लिखत ।**

३. **'उदीची' इति कस्याः नाम ?**

४. **अधस्तने पद्ये रिक्तस्थानं पूरयत**

........... जैवातृकः ....... ग्लौर्मृगाङ्कः ........ ।

.................... शशधरो ............... क्षपाकरः ॥

५. **पर्यायान् परस्परं मेलयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| जलधरः | सुधांशुः |
| सौदामनी | तडित्वान् |
| विधुः | निशापतिः |
| ओषधीशः | विद्युत् |

६. **उदाहरणानुसारेण प्राची-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | प्राची | प्राच्यौ | प्राच्यः |
| द्वितीया | प्राचीम् | ........ | प्राचीः |
| तृतीया | प्राच्या | प्राचीभ्याम् | प्राचीभिः |
| चतुर्थी | प्राच्यै | ........ | प्राचीभ्यः |
| पञ्चमी | प्राच्याः | ........ | ........ |
| षष्ठी | ........ | प्राच्योः | प्राचीनाम् |
| सप्तमी | प्राच्याम् | ........ | ........ |
| सम्बोधनम् | हे प्राचि ! | ........ | ........ |

७. **सौदामनी-शब्दस्य रूपावलीं लिखत ।**

८. **प्रदत्तैः पदैः वाक्यानि रचयत**

अवाची, घनः, क्षणप्रभा, कलानिधिः ।

## प्रतिभाप्रदर्शनाभ्यासः

**१. प्रदत्तानां पदानां चित्रस्य च साहाय्येन पञ्चवाक्यैः वर्णयत**



**मञ्जूषा**

गुरुकुलम्, उन्नतानि भवनानि, सरस्वत्याः प्रतिमा, अस्ति, गुरवः शिष्याः च, सज्जीकृतं मन्दिरम्, पूजयन्ति, वसन्तपञ्चमी, पुष्पाणि, माला, नैवेद्यम्, फलानि

# नवमः पाठः

## प्रधानाध्यापकाय निवेदनम्

दिनाङ्कः २०७७।१०।२०

श्रीमन्तः प्रधानाध्यापकमहोदयाः,
संस्कृत-माध्यमिक-विद्यालयः,
मटिहानी, महोत्तरी ।

**विषय - अवकाशाभियाचनम् ।**

**मान्याः,**

अहं षष्ठ्याः कक्षायाः छात्रा अस्मि इति भवन्तः विदन्ति एव । पूर्वम् अहं सर्वदा सर्वासु कक्षासु उपस्थिता आसम् । मम उपस्थितिपुस्तिकायाः अभिलेखः एतत् प्रमाणयति । इदानीम् अहं कतिपयैः दिवसैः रुग्णा अस्मि । अहं ज्वर-काश-प्रतिश्यायादिभिः आक्रान्ता अभवम् । परिवारः शैत्यस्य कारणं परिणामं च कथयति । गार्हस्थोपचारविधिः अवलम्बितः परं लाभदायकः न अभवत् । चिकित्सालये परीक्षणं कारितवती । चिकित्सकः प्रदूषितजलेन एवम् अभवत् इति कथयति । रोगस्य आक्रमणात् पूर्वम् अहं आपणाद् जलं क्रीत्वा पीतवती । तत् किञ्चिद् दुर्गन्धि आसीत् । सायं शिरसि पीडा अभवत् । चिकित्सकस्य कथनात् तत् स्मृतवती अस्मि । 'अहं सप्ताहस्य अभ्यन्तरे स्वस्था भवामि' इति चिकित्सकः कथयति । स्वल्पया असावधानतया रुग्णा अभवम् इति मनसि खेदः उत्पद्यते । भोजने अविचारः न कर्तव्यः इति अहं ज्ञातवती । एतस्मिन् अवधौ अहं विद्यालये उपस्थातुं न शक्नोमि । हापितं पाठं सखीनां सहयोगेन पठिष्यामि । अतः अस्य मासस्य सप्तदशदिवसात् पञ्चविंशं दिवसं यावद् विद्यालयाद् अवकाशं प्रदातुं निवेदयामि ।

आज्ञापालिका छात्रा
अञ्जलिझा
कक्षा - षष्ठी, क्रमाङ्कः - ७

## शब्दार्थाः

| | | |
|---|---|---|
| विदन्ति | - | जानन्ति, जान्दछन् |
| अभिलेखः | - | लेखप्रमाणम्, लिखित प्रमाण |
| प्रमाणयति | - | पुष्टीकरोति, प्रमाणित गर्छ |
| ज्वरः | - | क्षपणी, जरो (व्यथा) |
| प्रतिश्यायः | - | शीतज्वरः, रुघा |
| गार्हस्थोपचारविधिः | - | गृहोपचारकर्म, घरेलु उपचार |
| निश्चिनोति | - | प्रमाणयति, निधो गर्दछ |
| आपणः | - | पण्यशाला, पसल |
| खेदः | - | चिन्ता, मनको चिन्ता |
| हापितः | - | लुप्तावसरः, गुमाएको |
| अवकाशः | - | मुक्तिः, बिदा |

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकात् श्रुत्वा अधस्तनानां सन्धियुक्तानां पदानां सन्धिविच्छेदयुतानि पदानि पाठाद् अन्विष्य कथयत**

अस्मीति, नाभवत्, सम्भवेदिति, विदन्त्येव, पूर्वमहम्, पीडाभवत्, सप्ताहस्याभ्यन्तरे, विद्यालयादवकाशम् ।

२. **पाठं श्रुत्वा रोगाक्रमणस्य कारणं वदत ।**

३. **सतीर्थ्याद् अधोलिखितानि पदानि श्रुत्वा तेषां कालं कथयत**

अस्मि, आसम्, निश्चिनोति, अजायत, अनुमिनोति, पठिष्यामि, निवेदयामि ।

४. **शिक्षकाद् अधोलिखितं गद्यखण्डं श्रुत्वा सारांशं निगदत**

सत्यं किम् असत्यं किम् इति विवादस्य विषयः वर्तते । सर्वे सत्यं समर्थयन्ति असत्यं तिरस्कुर्वन्ति । परम् असत्यमपि विलुप्तं नास्ति । त्रिषु कालेषु निर्बाधं यत् तिष्ठति तत् सत्यम् अस्ति । यत् कस्मिँश्चित् काले तिष्ठति, कस्मिँश्चित् काले न तिष्ठति

तद् असत्यम् अस्ति । सत्यासत्ययोः निरूपणं दर्शनस्य एव विषयः उच्यते । तत् सत्यं नास्ति । अस्माकं दिनचर्यायाम् अपि सत्यासत्ययोः प्रभावः भवति । सत्येन लाभः जायते, असत्येन हानिः जायते । सत्यवादिनं जनाः पुरस्कुर्वन्ति, असत्यवादिनं जनाः तिरस्कुर्वन्ति । अतः अस्माभिः व्यवहारे सत्यस्य अवलम्बनं कर्तव्यम् । सत्यम् असत्यं वा किम् अवलम्बनीयमिति अस्माकम् आत्मनिर्णयस्य विषयः वर्तते ।

**५. प्रधानाचार्याय लिखितं निवेदनं श्रुत्वा चारित्रिकप्रमाणपत्रस्य आवश्यकता किमर्थं भवति ? इति कथयत**

दिनाङ्काः २०६१/०५/१७

श्रीमन्तः प्रधानाचार्याः,
रानीपोखरीसंस्कृत-माध्यमिक-विद्यालयः,
काण्ठमण्डपः ।

**विषयः - चारित्रिक-प्रमाणपत्रस्य प्राप्तये ।**

**महोदयाः,**

अहम् अस्मिन् विद्यालये षष्ठ्याः कक्षायाः प्रारभ्य सम्प्रति दशमकक्षायाः प्रवेशिका-परीक्षां च समुत्तीर्णवती अस्मि । अत्रत्ये विद्यार्थिजीवने अहं सदैव सफला छात्रा अस्मि । अहम् अनुशासने अपि बहुवारं पारितोषिकाणि प्राप्तवती इति भवतामपि प्रत्यक्षः विषयः । अतः अहं विद्यालयस्य एका अतीव अनुशिष्टा छात्रा अस्मि, एतत् तु भवन्तः जानन्ति एव ।

इदानीं प्रवेशिकां समुत्तीर्य अपि अस्मिन् एव विद्यालये अध्ययनस्य इच्छा आसीत् परन्तु अत्र उच्चमाध्यमिकशिक्षायाः व्यवस्था नास्ति । तेन अहं गोशालास्थितं वेदविद्याश्रम-उच्चमाध्यमिकविद्यालयं गन्तुं सन्नद्धा अस्मि । तदर्थं सविनयं निवेदयामि यत् - चारित्रिकप्रमाणपत्रस्य प्रदानेन मां कृतार्थयन्तु, इति ।

भवदीया सुशीला छात्रा
सुमित्रा न्यौपाने
क्रमाङ्कः - १

## पठनम्

१. एकः सतीर्थ्यः पाठं प्रतिवाक्यं पठ, अन्ये च अनुपठत ।

२. 'पूर्वम्, सर्वदा, च, सायम्, इति, अतः' इत्यव्ययपदैः निर्मितानि वाक्यानि पुनः पठत ।

३. अधो लिखितं निवेदनं पठित्वा तदनुवर्तिनः प्रश्नान् सङ्क्षेपेण उत्तरयत

श्रीमन्तः प्रधानाचार्यमहोदयाः,
महाकाली-माध्यमिकविद्यालयः,
कञ्चनपुरम् ।

**विषयः- शुल्कार्पणम् ।**

**मान्यवर !**

विद्यालयस्य वार्षिकपरीक्षायाः सूचना प्रकाशितास्ति । सूचनायां परीक्षायै प्रतिविद्यार्थि शतद्वयं रूप्यकाणि अर्पयितुं निर्दिष्टं वर्तते । इदानीम् अहं तद् अर्पयितुं क्षमः नास्मि । तत् सङ्कलयितुं मम पिता यत्नरतः वर्तते । परीक्षायाः अन्तं यावत् शुल्कस्य सङ्कलनं अवश्यं भविष्यति । तदभावे परीक्षापरिणामस्य स्थगनमपि मया सोढव्यं भविष्यति । कृपया परीक्षालेखनाय अनुमतिं प्रदाय माम् अनुग्रहीष्यन्ति श्रीमन्तः इति विश्वसिमि ।

आज्ञापालकः छात्रः
रत्नः जोशी
कक्षा - षष्ठी
क्रमाङ्कः - १२

(क) विद्यालयेन कस्मिन् विषये सूचना प्रकाशिता वर्तते ?

(ख) प्रत्येकं विद्यार्थिना कति रूप्यकाणि अर्पणीयानि सन्ति ?

(ग) रत्नस्य पिता किं कुर्वन् अस्ति ?

(घ) शुल्कस्य सङ्कलनं कदा भविष्यति ?

(ङ) रत्नः किं विश्वसिति ?

४. **परस्परं संयोज्य पठत**

| | |
|---|---|
| प्रियपुत्र ईश्वर | स्वस्ति |
| प्रियमित्र आनन्द | सप्रेम अभिवादनम् |
| पितृचरणयोः | सादरं प्रणामः |
| प्रिय अनुज अखिलेश | शुभाशीर्वादाः सन्तु |

## लेखनम्

१. **अधो लिखितानां पदानां वाक्येषु प्रयोगं कुरुत**

अभिलेखः, आक्रान्ता, निश्चिनोति, स्वल्पया, अवधौ, यावद्, निवेदयामि

२. **कोष्ठेषु उपयुक्तं लेख्यचिहनं दत्त**

(क) अहं विद्यालये पठन् अस्मि (................)

(ख) ज्वर-काश-प्रतिश्यायादिभिः का आक्रान्ता (................)

(ग) शतद्वयं रूप्यकाणि दातुं न शक्नोति, अहो दुःखम् (................)

(घ) स अवदत्, श्रीमन्तः शुल्कम् अवश्यं दास्यामि (................)

(ङ) जनकपुरे बहूनि मन्दिराणि सन्ति, यथा जानकीमन्दिरम्, राममन्दिरम्, सङ्कटमोचनमन्दिरम् च (................)

३. **मञ्जूषायाः पदानि विचित्य रिक्तस्थानं पूरयत**

**सप्ताहस्य, कथयति, वहुवचनस्य, निवेदयामि, कारणम्**

(क) 'कक्षासु' ................ रूपं वर्तते ।

(ख) ................ नपुंसकलिङ्गे अस्ति ।

(ग) ................ षष्ठीविभक्तौ वर्तते ।

(घ) ................ क्रियापदम् अस्ति ।

(ङ) ................ उत्तमपुरुषे विद्यते ।

४. **एकेन वाक्येन उत्तरयत**

(क) पाठे निवेदनस्य विषयः कः अस्ति ?

(ख) चिकित्सालये किं विहितम् ?

(ग) कः वर्धमानः अस्ति ?

(घ) हापितस्य पाठस्य पठने केषां सहयोगः अपेक्षितः वर्तते ?

(ङ) अञ्जलिः कतमस्माद् दिनात् कतमं दिनं यावत् अवकाशम् अपेक्षते ?

५. **अधो लिखितानां पदानाम् एकैकं पर्यायं लिखत**

सर्वदा, दिवसः, कथयति, जलम्, रुग्णः, असमर्थः, सखीनाम्

६. **परस्परं मेलयत**

| | |
|---|---|
| देव + ऋषिः | काण्डर्षिः |
| महा + ऋषिः | श्रुतर्षिः |
| ब्रह्म + ऋषिः | राजर्षिः |
| राज + ऋषिः | परमर्षिः |
| परम + ऋषिः | महर्षिः |
| काण्ड + ऋषिः | देवर्षिः |
| श्रुत + ऋषिः | ब्रह्मर्षिः |

७. **प्रदत्ते पत्रे मञ्जूषायाः साहाय्येन रिक्तस्थानं पूरयत**

दिनाङ्कः २०६९/०८/१७

........... विद्यापीठप्रमुखाः !
वाल्मीकि-विद्यापीठम्
प्रदर्शनी-मार्गः, काष्ठमण्डपः

**विषयः अवकाश-............ ।**

महोदयाः

सविनयं ज्ञापयामि यत्, परश्वस्तनदिवसे मम .............. विवाहः अस्ति । परिवारस्य सदस्यत्वेन तत्र मम ............... अनिवार्या खलु । अतः विवाहोत्सवे भागं ..............

श्वस्तनात् ................ अवकाशं वाच्छामि । अवकाशप्रदानेन माम् अनुगृहणन्तु इति ............ निवेदयामि ।

भवदीयः

...........................

उप-प्राध्यापकः

वाल्मीकि-विद्यापीठम्

**उपस्थितिः, मान्याः, अच्युतः शर्मा, अनुजस्य, ग्रहीतुम्, दिनत्रयस्य, प्राप्त्यर्थम्, सादरम्**

## व्याकरणानुशीलनम्

**१. सोदाहरणं श्चुत्वसन्धिनियमान् ष्टुत्वसन्धिनियमान् च पठत**

**श्चुत्वसन्धिः**

रामस्+च = रामश्च, हरिस्+शेते = हरिश्शेते, सत्+चित् = सच्चित्, सद्+जनः = सज्जनः

**ष्टुत्वसन्धिः**

इष्+तः = इष्टः, रामस्+षष्ठः = रामष्षष्ठः, उद्+डीनः = उड्डीनः, विष्+नुः = विष्णुः, उष्+त्रः = उष्ट्रः

**२. सन्धिगतं रूपं लिखत**

सत्+छात्रः ...............

श्रीमन्+झटिति ............

कृष्णास्+चपलः ............

उद्+ज्वलः ..............

तत्+चैतन्यम् ................

जगद्+जायते ...............

याच्+ना ..............

हरिस्+टीकते ...............

महत्+टङ्कारः ...............

उद्+डयनम् ..................

बृहद्+ढक्का ...................

पेष्+ता ...............

कुर्यात्+टङ्कणम् ........

प्रविष्+तः ...............

३. **सन्धिविच्छेदं कुरुत**

उच्छेदः .............

सज्जनः .................

तज्जम् .............

भवच्छात्रः ...............

महाञ्झङ्कारः ................

हरिश्च ...............

षष्ठः .............

उड्डीयते ................

टिड्डितौ .............

सट्ठक्कुरः ..........

महट्टकारः ..........

४. **तालिकायाः रूपाणि पठत्**

| लृट्लकारः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **भू-धातुः** प्रथमः पुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमः पुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमः पुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

| | | | |
|---|---|---|---|
| **गम्-धातुः** | | | |
| प्रथमः पुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमः पुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमः पुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

| | | | |
|---|---|---|---|
| **पूज्-धातुः** | | | |
| प्रथमः पुरुषः | पूजयिष्यति | पूजयिष्यतः | पूजयिष्यन्ति |
| मध्यमः पुरुषः | पूजयिष्यसि | पूजयिष्यथः | पूजयिष्यथ |
| उत्तमः पुरुषः | पूजयिष्यामि | पूजयिष्यावः | पूजयिष्यामः |

५. निर्देशानुसारेण लृट्लकारे क्रियारूपाणि पूरयत

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | द्रक्ष्यति | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | चलिष्यन्ति |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | ........ |
| मध्यमः पुरुषः | ........ | खेलिष्यथः | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | वदिष्यामः |
| प्रथमः पुरुषः | रचयिष्यति | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |

६. कोष्ठकाधारेण लृट्लकारस्य रूपैः रिक्तस्थानं पूरयत

(क) वृक्षे फलानि .............. । (फल्-प्रथमपुरुषे)

(ख) वयं निबन्धं ................. । (लिख्-उत्तमपुरुषे)

(ग) छात्रा संस्कृतं .............. । (पठ्-प्रथमपुरुषे)

(घ) युवां ग्रामं .................... । (गम्-मध्यमपुरुषे)

(ङ) ते सरस्वतीं ............... । (पूज्-प्रथमपुरुषे)

## कोषानुशीलनम्

### हिमस्य नामानि

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ॥१॥
प्रालेयं मिहिका चाऽथ हिमानी हिमसंहतिः ॥२॥

### नक्षत्रस्य नामानि

नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम् ॥१॥

### बृहस्पतेः नामानि

बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः ॥१॥
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥२॥

### शुक्राचार्यस्य नामानि

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ॥१॥

### मङ्गलस्य नामानि

अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥१॥

### बुधशनैश्चरयोः नामानि

रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ ॥१॥

### राहोः नामानि

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ॥१॥

## पदानुशीलनी

**लिङ्गव्यवस्था -** अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे च (ङ), इति सङ्केतः प्रदत्तो वर्तते ।

**हिमस्य सप्त नामानि -** अवश्यायः (क), नीहारः (क), तुषारः (क), तुहिनम् (ग), हिमम् (ग), प्रालेयम् (ग), मिहिका (ख) ।

**नक्षत्रस्य षड् नामानि -** नक्षत्रम् (ग), ऋक्षम् (ग), भम् (ग), तारा (ख), तारका (ख), उडु (ग) ।

**बृहस्पतेः नव नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) बृहस्पतिः, सुराचार्यः, गीर्पति, धिषणः, गुरुः, जीवः, आङ्गिरसः, वाचस्पतिः, चित्रशिखण्डिजः ।

**शुक्राचार्यस्य षड् नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) शुक्रः, दैत्यगुरुः, काव्यः, उशनाः, भार्गवः, कविः ।

**मङ्गलस्य पञ्च नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) अङ्गारकः, कुजः, भौमः, लोहिताङ्गः, महीसुतः ।

**बुधस्य त्रीणि नामानि** - रौहिणेयः, बुधः, सौम्यः ।

**शनैश्चरस्य द्वे नामनी** - सौरिः, शनैश्चरः ।

**राहोः पञ्च नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) तमः, राहुः, स्वर्भानुः, सैंहिकेयः, विधुन्तुदः ।

## अभ्यासः

**१. अधस्तनात् पद्यात् हिमस्य सप्त नामानि पृथक् कृत्वा लिखत**

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं हिमिका चाऽथ हिमानी हिमसंहतिः ॥

**२. बृहस्पतेः नाम्नां पङ्क्तिद्वयं लिखत ।**

**३. 'स्वर्भानुः' इति कस्याः नाम ?**

**४. अधस्तने पद्ये रिक्तस्थानं पूरयत**

रौहिणेयो ...... सौम्यः ..... सौरिशनैश्चरौ ।
..... राहुः ......... सैंहिकेयो ............... ॥

**५. उदाहरणानुसारेण गुरु-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | ........ | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |

| | | | |
|---|---|---|---|
| चतुर्थी | गुरवे | ........ | गुरुभ्यः |
| पञ्चमी | गुरोः | ........ | ........ |
| षष्ठी | ........ | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | ........ | ........ |
| सम्बोधनम् | हे गुरो ! | ........ | ........ |

६. **पर्यायान् परस्परं मेलयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| तुषारः | दैत्यगुरुः |
| नक्षत्रम् | भौमः |
| आङ्गिरसः | सौम्यः |
| शुक्रः | तुहिनम् |
| कुजः | ऋक्षम् |
| बुधः | सैंहिकेयः |
| राहुः | वाचस्पतिः |

७. **स्वर्भानु-शब्दस्य रूपावलीं लिखत ।**

८. **प्रदत्तैः पदैः वाक्यानि रचयत**

हिमम्, तारा, सुराचार्यः, काव्यः, भौमः, रौहिणेयः, विधुन्तुदः ।

**प्रतिभाप्रदर्शनाभ्यासः**

**पाठाद् अधिगतं सन्देशं पञ्चभिः वाक्यैः विलिख्य शिक्षकं दर्शयत, ततः प्राप्तं परामर्श समावेश्य पुनर्विलिख्य कक्षायां श्रावयत**

## दशमः पाठः

# कर्दम-निर्मितं कामग-विमानम्

पुरा एकः कर्दम-नामकः ऋषिः आसीत् । सः महान् योगी आसीत् । सः अहोरात्रं योग-साधनायां निमग्नः भवति स्म । तस्य देवहूति-नामिका पत्नी आसीत् । सा मनोः पुत्री आसीत् । यथा पार्वती महादेवं नित्यम् उपासते तथैव सा पतिं कर्दमं नित्यम् उपासते स्म । सा कामं क्रोधं लोभं मोहं मदं मात्सर्यं च त्यक्तवती आसीत् । सा नित्यं मधुरां वाचं वदति स्म । निरन्तरं पतिसेवया तस्याः शरीरं जीर्णम् अभवत् । तस्याः शुश्रूषया अत्यन्तं सन्तुष्टः कर्दमः पत्नीम् अकथयत्, "हे देवहूते ! तव शुश्रूषया भक्त्या च अहं सन्तुष्टः अस्मि । मनुष्याणां कृते स्वकीयं शरीरम् अत्यन्तं प्रियं भवति । त्वं तादृशं शरीरं मम सेवायै अर्पितवती असि । अतः अहं तुभ्यं दिव्यदृष्टिं दिव्यवैभवं च ददामि । एतादृशं वैभवं महाराजानां कृते अपि दुर्लभम् अस्ति ।" पत्यौ समस्तसिद्धिं विलोक्य सा मधुरवाण्या अवदत्, "हे पतिदेव ! भवान् अमोघ-योगविद्यायाः अधिपतिः अस्ति । भवतः पार्श्वे अतुलनीयानि दिव्यानि वैभवानि सन्ति । परम्, अहम् अन्यत् किमपि न वाञ्छामि । केवलं सन्ततिम् इच्छामि ।"

कर्दमः प्रियपत्न्याः कामनां ज्ञातवान् । प्राचीनसमये कर्दमसदृशानां योगिनां कृते किमपि कार्यम् असाध्यं नासीत् । स योगविद्याबलेन तत्कालमेव कामग-विमानम् आविष्कृतवान् । तद् विमानम् इन्धनेन विना एव चलति स्म । तत् कामनानुरूपं मनोगत्या यत्र कुत्रापि गन्तुं शक्नोति स्म । तस्मिन् विमाने सर्वाः सामग्र्यः, सर्वाणि रत्नानि च आसन् । अतः तद् देदीप्यमानम् आसीत् । विमानं वातानुकूलम्, सर्वसुखप्रदं च आसीत् । तद् विमानं विविधैः अलङ्कारैः विभूषितम् आसीत् । तत्र अनेकाभिः शिल्पकलाभिः परिपूर्णम् एकं भवनम् आसीत् । तस्य अन्तः सुवर्णमयी शय्या आसीत् । तत्र व्यजनानि, चामराणि च स्थापितानि आसन् । तस्य भूमिः मरकतमणिना निर्मिता आसीत् । तस्य द्वारभागे वज्रनिर्मितं कपाटं विद्रुमनिर्मिता देहली च आसीत् । भवनस्य छदिः च इन्द्रनीलमणिभिः निर्मिता आसीत् ।

तत्र सुर्वणमयाः कलशाः स्थापिताः आसन् । भित्तयः पद्मरागमणिभिः निर्मिताः आसन् । तत्र रूचिराणि वितानानि, रत्नैः खचितानि तोरणानि च लम्बितानि आसन् । तत्र हंसानां कपोतानां च मधुरः ध्वनिः श्रूयते स्म । शयनागारः, विहारस्थलम्, विश्रामस्थानम्, पाकशाला, प्राङ्गणम् च सर्वाणि तत्र निर्मितानि आसन् । स्वनिर्मितं तादृशं विमानं विलोक्य महर्षिः कर्दमः स्वयमेव विस्मितः अभवत् ।



कर्दमः पत्न्या सह विमानम् आरूढवान् । तस्मिन् विमाने विमान-परिचारिकाः विद्याधर्यः आसन् । ताभिः सेविता देवहूतिः अत्यन्तं प्रसन्ना अभवत् । तौ तेन विमानेन बहुकालम् नन्दनादिवनेषु, सर्वेषु लोकेषु च अभ्रमताम् । विमाने रममाणयोः तयोः दम्पत्योः अनेकानि वर्षाणि मुहूर्तवत् व्यतीतानि । तत्र तयोः नव पुत्र्यः, एकः पुत्रः च अजायन्त । तयोः पुत्रः कपिलः कालानन्तरं साङ्ख्यदर्शनस्य प्रणेता अभवत् । पत्न्यां सन्ततिषु च कर्दमस्य विशेषः मोहः न आसीत् । महायोगिने कर्दमाय तादृशविमानस्य अपि महत्त्वं न आसीत् । अतः स पुनः योगसाधनायै स्वकीयाश्रमम् प्रत्यागच्छत् ।

अस्माकम् ऋषयः महान्तो वैज्ञानिकाः आसन् परं वैज्ञानिकेषु आविष्कारेषु तेषां मोहः न आसीत् । ते आवश्यकतानुसारं यत् किम् अपि यन्त्रं तत्कालम् एव आविष्कर्तुं शक्नुवन्ति स्म । परं लोकहिताय ते काम-लोभादि-जनकेषु आविष्कारेषु विशेषाभिरुचिं न दर्शयन्ति स्म । विज्ञानस्य अस्मिन् युगे अपि कर्दमनिर्मितेन विमानेन सदृशं विमानं न प्राप्यते । अद्यतनानि सर्वोत्कृष्टानि विमानानि अपि सर्वं लोकं भ्रमितुं न शक्नुवन्ति । एतानि मनोगत्या चलितुं न शक्नुवन्ति । इन्धनेन विना अनेकानि वर्षाणि यावद् वायुमण्डले भ्रमितुं न शक्नुवन्ति । आधुनिकैः वैज्ञानिकैः निर्मितं रकेटयानम् अपि कामगविमानेन स्पर्धितुं न शक्नोति ।

## शब्दार्थाः

पुरा = प्राचीनकाले, पहिलेको समयमा
अहोरात्रम् = अहर्निशम्, दिनरात
निमग्नः = मग्नः, डुबेको
उपासते = सेवते, सेवा गर्छ
मात्सर्यम् = मत्सरता, छुल्याइँ
जीर्णम् = शीर्णम्, थोत्रो
शुश्रूषया = सेवया, सेवाद्वारा
अमोघः = अव्यर्थः, खेर नजाने
कामग-विमानम् = इच्छाचारि-विमानम्, इच्छाअनुसार चल्ने विमान
देदीप्यमानम् = जाज्वल्यमानम्, अत्यन्त चम्किलो
वातानुकूलम् = समुचितवातयुतम्, उपयुक्त वातावरण भएको
व्यजनम् = तालवृन्तकम्, पङ्खा
चामरम् = बालव्यजनम्, चामर
मरकतमणिः = हरिन्मणिः, पन्ना
कपाटम् = अररम्, ढोकाको खापा
विद्रुमः = प्रबालम्, मुगा
देहली = द्वाराग्रस्थानम्, दैलो
छदिः = पटलम्, छत
इन्द्रनीलम् = नीलमणिः, निलो रङको मणि
पद्मरागः = माणिकः, रातो मणि
वितानम् = उल्लोचः, चँदुवा
विद्याधरी = विद्याधरस्त्री, देवयोनिजातिकी महिला
नन्दनादिवनानि = नन्दन-पुष्पभद्र-मानस-चैत्ररथ-नामकानि देवोद्यानानि, नन्दन, पुष्पभद्र, मानस, चैत्ररथ आदि बगैँचा,
मुहूर्तम् = घटिकाद्वयम्, दुई घडी वा ४८ मिनेटको समय
प्रणेता = प्रवर्तकः, निर्माता
सदृशम् = तुल्यम्, जस्तो

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकात् श्रुत्वा उच्चारयत**

शुश्रूषया, भक्त्या, दिव्यदृष्टिम्, अतुलनीयानि, आविष्कृतवान्, वज्रनिर्मितम्, विद्रुमनिर्मिता, प्राङ्गणम्, विद्याधर्यः, स्वकीयाश्रमम्, शक्नुवन्ति ।

२. **पाठस्य द्वितीयानुच्छेदं श्रुत्वा कामगविमानं वर्णयत ।**

३. **सतीर्थ्याद् अधोलिखितानि पदानि श्रुत्वा तेषां वचननिर्धारणं कुरुत**

महान्, शरीरम्, दिव्यानि, योगिनाम्, भित्तयः, रत्नैः, अभवत्, तौ, दम्पत्योः, तयोः, शक्नुवन्ति, अभ्रमताम् ।

४. **शिक्षकाद् अधोलिखितं गद्यखण्डं श्रुत्वा सारांशं निगदत**

आकाशीयानां पिण्डानां विज्ञानं खगोलविज्ञानं कथ्यते । खशब्दः आकाशशब्दस्य पर्यायः वर्तते । तस्मात् कारणात् खगोलविज्ञाने ग्रहनक्षत्रादीनाम् अध्ययनं भवति । अस्माकं पूर्वजाः पुरा एव तेषाम् अध्ययने सफलतां प्राप्नुवन् । ग्रहादीनां गतिस्थिती च ते जानन्ति स्म । ते ग्रहादीनां गतिस्थितिबोधाय गणितं प्रावर्तयन् । तच्च गणितं त्रिविधम् अस्ति - अङ्कगणितम्, बीजगणितम्, रेखागणितम् इति । अतः अस्माकं पूर्वजाः महान्तः गणितज्ञाः, खगोलविदश्च आसन् इति वयं जानीमः ।

### पठनम्

१. **क्रमेण पाठस्य अनुच्छेदान् वाचयत ।**

२. **'आसीत्, अभवत्, अकथयत्' इत्यादीनि क्रियापदानि लङ्लकारस्य सन्ति । पाठात् एवंविधानि लङ्लकारस्य पञ्च क्रियापदानि चित्वा लिखत ।**

३. **अधो लिखितम् अनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नान् सङ्क्षेपेण उत्तरयत**

**आयुर्वेदचिकित्सा**

रोगनिवारकं शास्त्रं चिकित्साशास्त्रम् अस्ति । जगति अखिलेषु प्राणिषु रोगः उद्भवति । रोगश्च नैकविधः । तादृशानां रोगाणां निवृत्तिः चिकित्साशास्त्रेण सम्भवति । चिकित्साशास्त्रस्य बहवः भेदाः सन्ति । न केवलं मनुष्याणाम्, पशुपक्षिणामपि चिकित्सा

भवति । चिकित्सायाम् आहार-विहारादिदिनचर्या च विचार्यते । पथ्यापथ्ययोः अविचारः रोगस्य प्रधानं कारणम् अस्ति । विज्ञाः वदन्ति, "दुर्भिक्षाद् अपि अधिकाः जनाः बहुभक्षणाद् बाहुल्येन म्रियमाणाः सन्ति ।" प्राधान्येन रोगः द्विविधः - शारीरिकः मानसिकश्च । शारीरिक-रोगेण दौर्बल्यं जायते, मानसिकेन उन्माद-उद्वेग-अशान्तिप्रभृतिसमस्याः सृज्यन्ते । चिन्ता च रोगस्य बलवत् कारणम् अस्ति । सर्वोपायैः चिन्ता अपाकर्तव्या । जलवाय्वोः ध्वनेश्च प्रदूषणमपि रोगं प्रसूते । स्वच्छं जलं पीत्वा, विषाणुरहितं श्वासं प्रश्वस्य शान्तस्थले उषित्वा च रोगः दूरीभवति । चिकित्साशास्त्रम् एतदेव शिक्षयति, उत्पन्नान् रोगान् च निवारयति । चिकित्साशास्त्रे बहुविधानि औषधानि प्रयुज्यन्ते । तेषु केभ्यश्चन पार्श्वप्रभावः अपि उद्भवति । तदा अपरौषधम् आवश्यकं भवति । तेन वित्तस्य समयस्य च हानिः जायते । आयुर्वेदचिकित्सा एताभ्यः समस्याभ्यः अस्मान् रक्षति । तत्र अस्माकं संयम-सदाचारयोः अपि भूमिका भवति । आयुर्वेदचिकित्सा आरोग्यरक्षणाय फलवती बलवती च विद्या वर्तते ।

(क) रोगनिवारकं शास्त्रं किम् अस्ति ?

(ख) चिकित्सायां किं विचार्यते ?

(ग) शारीरिकेण मानसिकेन च रोगेण काः समस्याः सृज्यन्ते ?

(घ) रोगः कथं दूरीभवति ?

(ङ) आयुर्वेदचिकित्सा कीदृशी विद्या वर्तते ?

**४. पाठस्य अन्तिमम् अनुच्छेदं पठित्वा अधस्तनानि वाक्यानि संशोधयत**

(क) अस्माकम् ऋषयः महान्तः वैज्ञानिकाः न आसन् ।

(ख) कामगविमाने कर्दमस्य विशेषा अभिरुचिः आसीत् ।

(ग) अद्यतनानि विमानानि मनोगत्या चलितुं शक्नुवन्ति ।

(घ) कामगविमानम् इन्धनेन चलति स्म ।

(ङ) आधुनिकं रकेटयानं कामगविमानेन स्पर्धितुं शक्नोति ।

## लेखनम्

**१. पाठस्य तृतीयानुच्छेदस्य श्रुतिलेखनं कुरुत ।**

२. **अधो लिखितानां पदानां वाक्येषु प्रयोगं कुरुत**

योगी, वैभवम्, असाध्यम्, व्यजनम्, विस्मितः, प्रणेता, तत्कालम् ।

३. **उदाहरणानुसारं सारिणीं पूरयत**

| क्रियापदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| आसीत् | लङ्लकारः | प्रथमपुरुषः | एकवचनम् |
| आसन् | | | |
| ददामि | | | |
| अस्ति | | | |
| अभ्रमताम् | | | |
| असि | | | |
| शक्नुवन्ति | | | |

४. **परस्परं मेलयत**

| लट्लकारः | लङ्लकारः |
|---|---|
| भवति | अवदन् |
| वदन्ति | अभवत् |
| वाञ्छामि | अशृणोः |
| शृणोषि | अवाञ्छम् |
| लिखथ | अबध्नात् |
| गच्छामः | अलिखत |
| बध्नाति | अगच्छाम |

५. **एकेन वाक्येन उत्तरयत**

(क) देवहूतिः कस्य पुत्री आसीत् ?

(ख) कः अमोघविद्यायाः अधिपतिः आसीत् ?

(ग) कर्दमः केन कामगविमानम् आविष्कृतवान् ?

(घ) कः साङ्ख्यदर्शनस्य प्रणेता अभवत् ?

(ङ) ऋषयः किमर्थम् आविष्कारेषु विशेषाभिरुचिं न दर्शयन्ति स्म ?

६. **अधो लिखितानां पदानाम् एकैकं विलोमपदं पाठात् चित्वा लिखत**

अधुना, कर्कशाम्, सुलभम्, रुष्टा, अम्रियन्त ।

७. **अधस्तनं गद्यं पठित्वा प्रश्नान् उत्तरयत**

निरन्तरं वर्धमानेन प्रदूषणेन मानवाः प्रतिदिनं विविधैः रोगैः आक्रान्ताः सन्ति । समाजस्य सचेष्टाः जनाः प्रदूषणसमस्यायाः समाधानाय सदा प्रयत्नं कुर्वन्ति । ये प्रदूषणं वर्धयन्ति तैः ज्ञातव्यं यत्, पर्यावरणस्य रक्षणेन अस्माकम् एव रक्षणं भवति तदर्थं स्थाने स्थाने वृक्षरोपणं कर्तव्यम् । वन्यानां वृक्षाणां छेदनं न कर्तव्यम् । पवनस्य शुद्धतायै प्रयत्नः कर्तव्यः । तदा एव जनाः सुखेन जीवितुं शक्नुवन्ति । केवलं जनाः एव न, प्रकृतौ वनस्पतयः अपि सुखेन जीवन्ति । प्रकृतिः अस्माकं स्वतः प्राप्ता सम्पत्तिः अस्ति । अतः पर्यावरणस्य प्रदूषणेन अस्याः विनाशः न कर्तव्यः ।

**प्रश्नाः**

(क) कुत्र वृक्षरोपणं कर्तव्यम् ?

(ख) वन्यानां वृक्षाणां किं न कर्तव्यम् ?

(ग) कस्य शुद्धतायै प्रयत्नः कर्तव्यः ?

(घ) पर्यावरणस्य प्रदूषणेन कस्याः विनाशः भवति ?

## व्याकरणानुशीलनम्

१. **सोदाहरणम् अनुस्वारसन्धिनियमान् परसवर्णसन्धिनियमान् च पठत**

**अनुस्वारसन्धिः**

म् (पदान्तः) + हल् = ं

म्/न् (अपदान्तः) + झल् = ं

सत्यम्+वद = सत्यं वद, पुस्तकम् + पठ = पुस्तकं पठ, ईश्वरम् +नमति = ईश्वरं नमति, गुरुम् +वन्दे = गुरुं वन्दे ।

**परसवर्णसन्धिः**

अनुस्वारः + कवर्गः = ङ्

अनुस्वारः + चवर्गः = ञ्

अनुस्वारः + टवर्गः = ण्

अनुस्वारः + तवर्गः = न्

अनुस्वारः + पवर्गः = म्

अन्+कितः = अं+ कितः = अङ्कितः , अन्+चितः = अं+चितः = अञ्चितः, कुन्+ठितः = कुं+ठितः = कुण्ठितः, शाम्+तः = शां+तः = शान्तः, गुम्+फितः = गुं+फितः = गुम्फितः

२. **सन्धिगतं रूपं लिखत**

**(क)**

मनान्+सि ............ ध्वम्+सः ...........

नम्+स्यति ............ अयान्+सी ...........

हन्+सि ............. तेजान्+सि ..........

गुरुम्+वन्दे ........... त्वम्+ हससि .............

पुरस्कारम्+लभते ............. अयम्+हर्षितः ................

पत्रम् + हरितम् ............ युवाभ्याम् + स्वस्ति ............

**(ख)**

सं + ख्या ............. सं + चयः ...........

सं + दर्भः ............... सं + भवः ..............

त्वं + गच्छसि ................ अहं + चिनोमि .............

वनं + दहति ....................... गगनं + डयसे .................

फलं + फलति ...............

३. सन्धिविच्छेदं कुरुत

(क)

वासांसि .............

यंस्यति ................

श्रेयांसि ..............

मातरं वन्दे ................

कार्यं साधय .................

भ्रंशः ................

अनंसीत् ..............

इयं हसति ................

संस्कृतं वदामि ................

(ख)

सङ्कल्पः ............

सन्धानम् ...............

वनङ्गच्छ ...............

इयण्टीकते ............

पुस्तकम्पठ ..........

सञ्जयः ..............

सम्मानम् ............

अयञ्जयति ................

नदीन्तर ..........

४. तालिकायाः रूपाणि पठत

| लोट्लकारः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| भू-धातुः | | | |
| प्रथमः पुरुषः | भवतु | भवताम् | भवन्तु |
| मध्यमः पुरुषः | भव | भवतम् | भवत |
| उत्तमः पुरुषः | भवानि | भवाव | भवाम |

| गम्-धातुः | | | |
|---|---|---|---|
| प्रथमः पुरुषः | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यमः पुरुषः | गच्छ | गच्छतम् | गच्छत |
| उत्तमः पुरुषः | गच्छानि | गच्छाव | गच्छाम |

| पूज्-धातुः | | | |
|---|---|---|---|
| प्रथमः पुरुषः | पूजयतु | पूजयताम् | पूजयन्तु |
| मध्यमः पुरुषः | पूजय | पूजयतम् | पूजयत |
| उत्तमः पुरुषः | पूजयानि | पूजयाव | पूजयाम |

५. **निर्देशानुसारेण लोट्लकारे क्रियारूपाणि पूरयत**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पश्यतु | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | चलन्तु |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | ........ |
| मध्यमः पुरुषः | ........ | खेलतम् | ........ |
| उत्तमः पुरुषः | ........ | ........ | ........ |
| प्रथमः पुरुषः | ........ | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ | वदाम |
| प्रथमः पुरुषः | रचयतु | ........ | ........ |
| मध्यमः पुरुषः | ........ | ........ | ........ |
| उत्तमः पुरुषः | ........ | ........ ........ | |

६. **कोष्ठकाधारेण लट्लकारस्य रूपैः रिक्तस्थानं पूरयत**

(क) त्वं दीर्घजीवी .............. । (भू-मध्यमपुरुषे)

(ख) आवां भोजनं ................. । (खाद्-उत्तमपुरुषे)

(ग) छात्रौ श्लोकान् .............. । (पठ्-प्रथमपुरुषे)

(घ) महिलाः नगरं .................... । (गम्-प्रथमपुरुषे)

(ङ) अहं शिवं ............... । (पूज्-प्रथमपुरुषे)

## कोषानुशीलनम्

### सूर्यस्य नामानि

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ॥१॥
भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥२॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ॥३॥
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥४॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ॥५॥
विभावसुर्ग्रहपतिस्त्विषां पतिरहर्पतिः ॥६॥
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ॥७॥
पद्माक्षस्तेजसां राशिश्छायानाथस्तमिस्रहा ॥८॥
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥९॥
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः ॥१०॥
इनो भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः ॥११॥

## पदानुशीलनी

**सूर्यस्य चतुः पञ्चाशद् नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) सूरः, सूर्यः, अर्यमा, आदित्यः, द्वादशात्मा, दिवाकरः, भास्करः, अहस्करः, ब्रध्नः, प्रभाकरः, विभाकरः, भास्वत्, विवस्वत्, सप्ताश्वः, हरिदश्वः, उष्णरश्मिः, विकर्तनः, अर्कः, मार्तण्डः, मिहिरः, अरुणः, पूषा, द्युमणिः, तरणिः, मित्रः, चित्रभानुः, विरोचनः, विभावसुः, ग्रहपतिः, त्विषांपतिः, अहर्पतिः, भानुः, हंसः, सहस्रांशुः, तपनः, सविता, रविः, पद्माक्षः, तेजसां राशिः, छायानाथः, तमिस्रहा, कर्मसाक्षी, जगच्चक्षुः, लोकबन्धुः, त्रयीतनुः, प्रद्योतनः, दिनमणिः, खद्योतः, लोकबान्धवः, इनः, भगः, धामनिधिः, अंशुमाली, अब्जिनीपतिः ।

## अभ्यासः

१. **अधस्तनात् पद्यात् सूर्यस्य एकादश नामानि पृथक् कृत्वा लिखत**

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
भास्कराहस्करव्रध्नप्रभाकरविभाकराः ॥

२. **अधस्तनयोः पद्ययोः रिक्तस्थानं पूरयत**

पद्माक्षस्तेजसांराशिश्-..........-स्तमिस्रहा ।
............... जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥
प्रद्योतनो ........... खद्योतो ................ ।
.... भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः ॥

३. **उदाहरणानुसारेण अर्यमन्-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अर्यमा | अर्यमणौ | अर्यमणः |
| द्वितीया | अर्यमणम् | ........ | अर्यम्णः |
| तृतीया | अर्यम्णा | अर्यमभ्याम् | अर्यमभिः |
| चतुर्थी | अर्यम्णे | ........ | अर्यमभ्यः |
| पञ्चमी | अर्यम्णः | ........ | ........ |
| षष्ठी | ........ | अर्यम्णोः | अर्यम्णाम् |
| सप्तमी | अर्यम्णि, अर्यमणि | ........ | ........ |
| सम्बोधनम् | हे अर्यमन् ! | ........ | ........ |

४. **द्वादशात्मन्-शब्दस्य रूपावलीं लिखत ।**

५. **प्रदत्तैः पदैः वाक्यानि रचयत**

**भानुः, सवितरि, रवेः, कर्मसाक्षिणः, जगच्चक्षुः ।**

### प्रतिभाप्रदर्शनाभ्यासः

आधुनिकं विमानं कामगविमानात् कथं भिन्नम् अस्ति इति विलिख्य कक्षायां श्रावयत ।

# एकादशः पाठः

## सूक्तिपद्यानि

१. प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ॥ १/५९

२. इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥ २/५५

३. इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात् ।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ॥ ५/५

४. अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥ ५/३३

५. दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥ ५/४५

(कुमारसम्भवमहाकाव्यात्)

१.

**पदच्छेदः** - प्रत्यर्थिभूताम्, अपि, ताम्, समाधेः, शुश्रूषमाणाम्, गिरिशः, अनुमेने, विकारहेतौ, सति, विक्रियन्ते, येषाम्, न, चेतांसि, ते, एव, धीराः ।

**अन्वयः** - गिरिशः समाधेः प्रत्यर्थिभूताम् अपि शुश्रूषमाणां ताम् अनुमेने, विकारहेतौ सति येषां चेतांसि न विक्रियन्ते ते एव धीराः (पुरुषाः सन्ति) ।

**सरलार्थः** - गिरिशः शिवः तपस्यार्थं प्रतिकूलां परिस्थितिं ज्ञात्वा अपि तपस्यानिरतायै पार्वत्यै अनुमतिं दत्तवान् । यतो हि विकारकारणे सति अपि येषां मनांसि विकृतिं न यान्ति, ते एव धीराः कथ्यन्ते ।

२.

**पदच्छेदः** - इतः, सः, दैत्यः, प्राप्तश्रीः, न, इतः, एव, अर्हति, क्षयम्, विषवृक्षः, अपि, संवर्ध्य, स्वयम्, छेत्तुम्, असाम्प्रतम् ।

**अन्वयः** - इतः प्राप्तश्रीः सः दैत्यः इतः एव क्षयं न अर्हति । विषवृक्षः अपि संवर्ध्य स्वयं छेत्तुम् असाम्प्रतम् ।

**सरलार्थः** - ब्रह्मा तारकासुरं हन्तुं प्रार्थयतः देवान् प्रति कथयति, "मत्तः वरं प्राप्य दैत्यः तारकासुरः ऐश्वर्यं प्राप्तवान् । अतः तारकासुरः मत्तः एव विनाशाय योग्यः न भवति । स्वयमेव वर्धितस्य विषवृक्षस्य अपि छेदनम् अनुचितं भवति ।"

३.

**पदच्छेदः** - इति, ध्रुवेच्छाम्, अनुशासती, सुताम्, शशाक, मेना, न, नियन्तुम्, उद्यमात्, कः, ईप्सितार्थस्थिरनिश्चयम्, मनः, पयः, च, निम्नाभिमुखम्, प्रतीपयेत् ।

**अन्वयः** - इति अनुशासती मेना ध्रुवेच्छां सुतां निवारयितुं न शशाक । हि ईप्सितार्थस्थिरनिश्चयं मनः निम्नाभिमुखं पयश्च कः प्रतीपयेत् ।

**सरलार्थः** - एवं प्रकारेण मेनकया उपदिष्टा अपि पार्वती तपस्यायां दृढसङ्कल्पा आसीत् । अतः माता मेनका पुत्रीं पार्वतीं तपस्यायाः निवारयितुं समर्था न अभवत् । अभीष्टार्थे दृढनिश्चयं मनः, निम्नाभिमुखं वहत् जलं च कः अपि मनुष्यः अवरोद्धुं निवारयितुं वा समर्थः न भवेत् ।

४.

**पदच्छेदः** - अपि, क्रियार्थम्, सुलभम्, समित्कुशम्, जलानि, अपि, स्नानविधिक्षमाणि, ते, अपि, स्वशक्त्या, तपसि, प्रवर्तसे, शरीरम्, आद्यम्, खलु, धर्मसाधनम् ।

**अन्वयः** - अपि क्रियार्थं समित्कुशं सुलभम् ? अपि जलानि ते स्नानविधिक्षमाणि ? अपि स्वशक्त्या तपसि प्रवर्तसे ? खलु शरीरम् आद्यं धर्मसाधनम् अस्ति ।

**सरलार्थः** - विप्रवेषधारी शङ्कर पार्वतीं कथयति - अनुष्ठानादिकं कर्म कर्तुं समित्कुशम् आवश्यकं भवति । किं समित्कुशं सुलभम् अस्ति ? जलं स्नानयोग्यं भवितुम् अर्हति । किं तद् जलं स्नानयोग्यम् अस्ति ? मनुष्यः स्वसामर्थ्येन आत्मबलेन वा तपस्यायां प्रवृत्तः भवति । किं त्वं स्वशक्त्या एव तपस्यायां प्रवृत्ता असि ? यतः शरीरम् एव प्रथमं धर्मसाधनं वर्तते । अतः शरीरस्य रक्षणं कर्तव्यम्, शरीरस्य माध्यमेन एव धर्मः साध्यः ।

५.

**पदच्छेदः -** दिवम्, यदि, प्रार्थयसे, वृथा, श्रमः, पितुः, प्रदेशाः, तव, देवभूमयः, अथ, उपयन्तारम्, अलम्, समाधिना, न, रत्नम्, अन्विष्यति, मृग्यते, हि, तत् ।

**अन्वयः -** यदि दिवं प्रार्थयसे तर्हि श्रमः वृथा, तव पितुः प्रदेशाः देवभूमयः (सन्ति) । अथ उपयन्तारं प्रार्थयसे (तर्हि) समाधिना अलम्, रत्नं न अन्विष्यति, हि तत् मृग्यते ।

**सरलार्थः -** विप्रवेषधारी शङ्करः पार्वतीं प्रति कथयति, "भो पार्वति ! यदि स्वर्गं कामयसे तर्हि तपस्यां कृत्वा त्वया श्रमः न कर्तव्यः । तव श्रमः वृथा भवति, यतः तव पितुः हिमालयस्य स्थानानि एव देवस्थलानि सन्ति । अतः वरं कामयसे चेत् तपसा अलं, तपः न कर्तव्यम् । यतो हि रत्नं स्वयं ग्रहीतारं न अन्विष्यति, अपि तु ग्रहीता रत्नम् अन्विष्यति ।"

## अभ्यासः

### श्रवणं भाषणं च

१. **अधो लिखितस्य श्लोकस्य अनुवाचनं कुरुत**

**प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ।**

**विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ॥**

२. **पाठस्य अन्तिमं श्लोकं श्रुत्वा तस्य आशयं कथयत ।**

३. **अधो लिखितानि पदानि श्रुत्वा विभक्तिं निर्दिशत**

तव, पितुः, देवभूमयः, सुताम्, स्वशक्त्या, तपसि, चेतांसि ।

४. **शिक्षकाद् अधोलिखितं पद्यं श्रुत्वा पण्डितलक्षणं निगदत**

**मातृवत्परदारेषु परद्रव्येषु लोष्ठवत् ।**

**आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥**

५. **अधो लिखितं पद्यं श्रुत्वा उत्तराणि कथयत**

**तक्षकस्य विषं दन्ते मक्षिकायास्तु मस्तके ।**

**वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जने विषम् ॥**

(क) दन्ते कस्य विषं भवति ?

(ख) वृश्चिकस्य विषं कुत्र भवति ?

(ग) मक्षिकायाः विषं कुत्र भवति ?

(घ) कस्मिन् सर्वाङ्गे विषं भवति ?

## पठनम्

**१. यथालयं पाठस्य श्लोकान् वाचयत ।**

**२. हरिशब्दस्य रूपाणि पठित्वा शाक्यमुनिशब्दस्य रूपाणि कथयत**

**हरिशब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधनम् | हे हरि ! | हे हरी ! | हे हरयः ! |

**३. अधस्तनं पद्यं पठित्वा रिक्तस्थानं पूरयत**

**रामो राजमणिः सदा विजयते रामं रमेशं भजे**

**रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।**

**रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्**

**रामे चित्तलयः सदा भवतु मे हे राम ! मामुद्धर ॥**

अन्वयः - राजमणिः रामः .......... विजयते । (अहम्) .......... रामं भजे । ........... निशाचरचमूः अभिहता । तस्मै रामाय ......... । रामात् ........... परायणं नास्ति । अहं रामस्य ............. अस्मि । रामे सदा मे चित्तलयः ........... भवतु । हे राम ! माम् ........... ।

४. **अधो लिखितं श्लोकं पठित्वा तदनुवर्तिनः प्रश्नान् सङ्क्षेपेण उत्तरयत**

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।**

**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥**

(क) कथं क्रियां न विदधीत ?

(ख) परमापदां पदं किम् अस्ति ?

(ग) सम्पदः कीदृश्यः सन्ति ?

(घ) सम्पदः कं वृणते ?

(ङ) 'क्रियाम्' इति पदस्य विभक्तिः का ?

५. **पाठस्य चतुर्थं श्लोकं पठित्वा तद्गतान् प्रश्नान् चिनुत**

(क) क्रियार्थं समित्कुशं सुलभम् अस्ति ?

(ख) माता तुभ्यम् अनुमतिं दत्तवती ?

(ग) किम् अत्रत्यं जलं स्नानयोग्यं वर्तते ?

(घ) त्वं स्वशक्त्या एव तपसि प्रवृत्ता असि ?

(ङ) किं त्वं कुशलिनी वर्तसे ?

## लेखनम्

१. **पाठस्य प्रथमस्य श्लोकस्य श्रुतिलेखनं कुरुत ।**

२. **अधो लिखितानां पदानां वाक्येषु प्रयोगं कुरुत**

**प्रार्थयसे, अन्विष्यति, प्रवर्तसे, मृग्यते, अर्हति ।**

३. **उदाहरणानुसारं सारिणीं पूरयत**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| प्रदेशाः | प्रथमा | बहुवचनम् |
| समाधिना | | |
| सुताम् | | |

| | | |
|---|---|---|
| समाधेः | | |
| विकारहेतौ | | |
| विषवृक्षः | | |
| तपसि | | |

४. **एकेन वाक्येन उत्तरयत**

(क) किं मनुष्यं न अन्विष्यति ?

(ख) मनुष्यः कीदृशं पयः न प्रतीपयेत् ?

(ग) आद्यं धर्मसाधनं किम् ?

(घ) के धीराः कथ्यन्ते ?

(ङ) किम् असाम्प्रतं भवति ?

५. **पाठात् प्रथमाविभक्तेः पदानि सङ्कलय्य लिखत ।**

६. **श्लोकं प्रपूर्य लिखत**

प्रत्यर्थिभूतामपि तां ............ शुश्रूषमाणां .................. ।

................. सति विक्रियन्ते येषां न .......... त एव धीराः ॥

## व्याकरणानुशीलनम्

१. **सोदाहरणं चर्त्वसन्धिनियमान्, अनुनासिकसन्धिनियमान्, जश्त्वसन्धिनियमान् च पठत**

**चर्त्वसन्धिः**

ख/ग/घ + खर् = क्

छ/ज/झ + खर् = च्

ठ/ड/ढ + खर् = ट्

थ/द/ध + खर् = त्

फ/ब/भ + खर् = प्

सद्+कारः = सत्कारः, सद्+पुत्रः = सत्पुत्रः, विपद्+कालः = विपत्कालः, दिग्+प्रान्तः = दिक्प्रान्तः, लभ्+स्यते = लप्स्यते, भेद्+ता = भेत्ता, भेद्+स्यति = भेत्स्यति

**अनुनासिकसन्धिः**

क/ख/ग/घ + अनुनासिकः = ङ्

च/छ/ज/झ + अनुनासिकः = ञ्

ट/ठ/ड/ढ + अनुनासिकः = ण्

त/थ/द/ध + अनुनासिकः = न्

प/फ/ब/भ + अनुनासिकः = म्

एतद्+मुरारिः = एतन्मुरारिः, जगत्+नाथः = जगन्नाथः, प्राक्+मुखः = प्राङ्मुखः, तद्+मात्रम् = तन्मात्रम्, तद्+मयम् = तन्मयम्, चित्+मात्रम् = चिन्मात्रम्

**जश्त्वसन्धिः**

क/ख/घ + अण् (परः)/झश् = ग्

च/छ/झ + अण् (परः)/झश् = ज्

ट/ठ/ढ + अण् (परः)/झश् = ड्

त/थ/ध + अण् (परः)/झश् = द्

प/फ/भ + अण् (परः)/झश् = ब्

जगत् +ईशः = जगदीशः, अच्+अन्तः = अजन्तः, सत्+आचारः = सदाचारः, बुध्+धिः = बुद्धिः, ऋध्+धिः = ऋद्धिः, युध्+धः = युद्धः, लभ्+धः = लब्धः, दघ्+धः = दग्धः, क्षुभ्+धः = क्षुब्धः

२. **सन्धिगतं रूपं लिखत**

| | |
|---|---|
| भेद्+तुम् ........... | प्रावृड्+सु .............. |
| वाग्+कला ............... | लिभ्+सा ............... |
| वृक्षाद्+पतति ............ | अब्+सु ................. |
| षड्+मासाः .............. | अब्+मयम् ............. |
| किञ्चिद्+न ............ | त्वक्+मलम् ............... |
| ग्रामाद्+नयति ............. | तत्+दिव्यम् ................. |
| वषट्+अस्तु ............ | अच्+आदिः .................. |
| वाक्+ईशः ............... | विद्युत्+गता ..................... |

३. **सन्धिविच्छेदं कुरुत**

भेत्तव्यम् .....................

छेत्तुम् .....................

महत्पापम् .....................

अपतत्तत् .....................

सत्कर्म .....................

तन्मे .....................

धिङ्मूर्खम् .....................

अम्मात्रम् .....................

तन्नेत्रयोः .....................

प्रावृण्ण .....................

दिग्बन्धनम् .....................

प्रावृडेषा .....................

तद्धाम .....................

तुगागमः .....................

अब्जः .....................

४. **क्त्वाप्रत्ययान्तानां पदानां सारिणीं पठत**

| धातुः | क्त्वाप्रत्ययान्तानि पदानि |
|---|---|
| पठ् | पठित्वा |
| लिख् | लिखित्वा |
| हस् | हसित्वा |
| खाद् | खादित्वा |
| भू | भूत्वा |
| कृ | कृत्वा |
| पा | पीत्वा |
| दृश् | दृष्ट्वा |
| स्था | स्थित्वा |
| गम् | गत्वा |

५. **शिक्षकस्य साहाय्येन अधस्तनानां धातूनां क्त्वाप्रत्ययान्तानि पदानि अन्विष्य लिखत**

पत्, जीव्, गर्ज्, चल्, गै, जि, मन्, त्यज्, दह्, वस्, वद्, रक्ष्, खेल्, नम् ।

६. कोष्ठस्थानां धातूनां क्त्वाप्रत्ययान्तानि पदानि निर्माय रिक्तस्थानं पूरयत

(क) अहं पाठं .............. वदामि । (स्मृ)

(ख) बालिका शिक्षकं ................ आगच्छति । (प्रच्छ)

(ग) यूयं मञ्चे ............. पुरस्कारं प्राप्नुथ । (नृत्)

(घ) पुत्रः चित्रं ........... दर्शयति । (रच्)

(ङ) भक्तः विष्णुं ............. वरं याचति । (पूज्)

## कोषानुशीलनम्

### अथ कालवर्गः

**कालस्य नामानि**

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ॥१॥

**दिनस्य नामानि**

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ॥१॥

**रात्रेः नामानि**

.... अर्थ शर्वरी ॥१॥
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ॥२॥
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥३॥

**वर्षस्य नामानि**

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ॥१॥

## पदानुशीलनी

**लिङ्गव्यवस्था -** अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे च (ङ) इति सङ्केतः प्रदत्तो वर्तते ।

**कालस्य चत्वारि नामानि -** (अत्र सर्वाणि नामानि पुंलिङ्गे) कालः, दिष्टः, अनेहा, समयः ।

**दिनस्य पञ्च नामानि -** घस्रः (क), दिनम् (ग), अहः (ग), दिवसः (ङ), वासरः (ङ) ।

**रात्रेः द्वादश नामानि -** (अत्र सर्वाणि नामानि स्त्रीलिङ्गे) शर्वरी, निशा, निशीथिनी, रात्रिः, त्रियामा, क्षणदा, क्षपा, विभावरी, तमस्विनी, रजनी, यामिनी, तमी ।

**वर्षस्य षड् नामानि -** संवत्सरः (क), वत्सरः (क), अब्दः (क), हायनः (ङ), शरत् (ख), समाः (स्त्रीलिङ्गे नित्यं बहुवचनान्तप्रयोगः) ।

## अभ्यासः

१. **अधस्तनात् पद्यात् निशायाः द्वादश नामानि पृथक् कृत्वा लिखत**

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥

२. **कालस्य नाम्नां पङ्क्तिं लिखत ।**

३. **'विभावरी' इति कस्याः नाम ?**

४. **अधस्तने पद्ये रिक्तस्थानं पूरयत**

...... दिनाहनी वा तु ...... दिवसवासरौ ।
संवत्सरो ............ हायनोऽस्त्री ......... ॥

५. **पर्यायान् परस्परं मेलयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| अनेहा | त्रियामा |
| दिवसः | अब्दः |
| रात्रिः | समयः |
| वत्सरः | वासरः |

६. **उदाहरणानुसारेण शरत्-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | शरत् | शरदौ | शरदः |
| द्वितीया | शरदम् | ........ | शरदः |
| तृतीया | शरदा | शरद्भ्याम् | शरद्भिः |
| चतुर्थी | शरदे | ........ | शरद्भ्यः |
| पञ्चमी | शरदः | ........ | ........ |
| षष्ठी | ........ | शरदोः | शरदाम् |
| सप्तमी | शरदि | ........ | ........ |
| सम्बोधनम् | हे शरत् ! | ........ | ........ |

७. **अनेहस्-शब्दस्य रूपावलीं लिखत ।**

८. **प्रदत्तैः पदैः वाक्यानि रचयत**

समयः, दिनम्, रजनी, वत्सरः ।

**प्रतिभाप्रदर्शनाभ्यासः**

काञ्चन सूक्तिम् अन्विष्य आशयम् अपि कक्षायां श्रावयत ।

# अविचारितं कर्म अनुचितम्

सत्ययुगे विदर्भनगर्यां सुमतिनामकः धार्मिकः कृषकः वसति स्म । स शास्त्रीय-मर्यादां पालयति स्म, सर्वेषु प्राणिषु दयाञ्च करोति स्म । सुमतेः गृहे एका शुनी, एकः बलीवर्दः च आस्ताम् । सः शुन्यां बलीवर्दे च सदा स्निह्यति स्म । पितुः श्राद्धदिने स भोजनार्थं ब्राह्मणान् निमन्त्रितवान् । तस्य पत्नी चन्द्रावती बहुविधानि पक्वान्नानि विधातुं व्यस्ता आसीत् । तस्मिन् एव समये अपरं कार्यं कर्तुं क्षणाय सा महानसाद् बहिः अगच्छत् । तत्क्षणे एव एकः सर्पः महानसे प्राविशत् । सः पायसभाण्डे विषवमनं कृत्वा बहिः निरगच्छत् । तद् दृष्ट्वा शुनी चन्द्रावत्याः पुरतः पायसम् उच्छिष्टम् अकरोत् । क्रोधाकुला चन्द्रावती ज्वलता उल्मुकेन शुनीं प्राहरत् । पीडिता सा क्रोशन्ती इतस्ततः अधावत् । चन्द्रावती महानसे निर्मितं सर्वम् अपि पक्वान्नं बहिः निःक्षिप्तवती । पुनः खाद्यवस्तूनि पक्त्वा सा ब्राह्मणभोजनम् अकारयत् । सन्तुष्टाः ब्राह्मणाः सुमति-दम्पतिभ्याम् आशीर्वादम् अयच्छन् । कोपेन चन्द्रावती तस्मिन् दिने शुन्यै भोजनं न अददात् । कार्यव्यस्ततया सुमतिः वृषभाय घासं दातुं च विस्मृतवान् ।

तौ शुनी-बलीवर्दौ पूर्वजन्मनि तस्यैव सुमतेः मातापितरौ आस्ताम् । रात्रौ क्षुधया तृषया च व्याकुला शुनी बलीवर्दस्य समीपं गत्वा विलापम् अकरोत्, “हे स्वामिन् ! अद्य पायसे सर्पः विषवमनम् अकरोत् । अतः अहम् पायसम् उच्छिष्टं कृतवती । परं यथार्थम् अज्ञात्वा एव वधूः माम् उल्मुकेन अताडयत् । तेन मम कटिः भग्ना अस्ति । पुत्रः प्रतिदिनं मह्यं भोजनं ददाति स्म । परम् अद्य स मम स्मरणम् अपि न अकरोत् । अतः अहम् अत्यन्तं बुभुक्षिता अस्मि ।” तत् श्रुत्वा बलीवर्दः अवदत्, “हे भद्रे ! अद्य अहमपि भारान् वाहं वाहं श्रान्तः अस्मि । अधिक-भारवहनात् मम पृष्ठभागः भग्नप्रायः अस्ति । आदिवसम् अहं मुखं बद्ध्वा हलाकर्षणे च नियोजितः । वारं वारं ताडितः च अहम् । तत्र अपि भक्षणार्थम् मह्यं घासः नैव दत्तः । किमर्थम् इति अहं न जानामि । सुमतिः धर्मात्मा अस्ति परम् आवां न जानाति । तेन

आवयोः कृते विहितं श्राद्धम् अपि अद्य आवयोः अपकारात् निष्फलम् अभवत् ।"

सुमतिः पशुवाक्यं जानाति स्म । स शुनीबलीवर्दयोः सर्वं वार्तालापम् अशृणोत् । तदनन्तरं स पश्चात्तापं कृत्वा तयोः पुरः क्षमाम् अयाचत । ताभ्यां यथेष्टं भोजनं च अददात् । अपरस्मिन् दिने पित्रोः दुःखनिवारणस्य उपायम् अन्वेष्टुं सः वनम् अगच्छत् । सर्वं वृत्तान्तं श्रावयित्वा स ऋषीन् अपृच्छत्, "भो ऋषयः ! मम पितरौ पशुजीवनात् कथं मुक्तिं प्राप्स्यतः ?" ऋषयः अवदन्, "हे भद्र ! त्वं पित्रोः मुक्तये पत्नीसहितः सन् ऋषिपञ्चम्याः व्रतम् कुरु । तस्य फलं पितृभ्याम् अर्पय ।" ऋषीणाम् आज्ञां शिरसि निधाय सुमतिः गृहं प्रत्यागच्छत् । भाद्रशुक्ल-पञ्चम्याः दिने पत्नीसहितः स अरुन्धतीसहितान् सप्तर्षीन् अपूजयत् । सः व्रतपारणां च अकरोत् । पूजायाः पुण्यं पितृभ्याम् आर्पयत् । तस्य पुण्यस्य प्रभावेण पितरौ च मुक्तौ अभवताम् ।

**शब्दार्थाः**

| | | |
|---|---|---|
| शुनी | = | कुक्कुरी, कुकुर्नी |
| बलीवर्दः | = | वृषः, गोरु |
| महानसः | = | भोजनालयः, भान्सा |
| उच्छिष्टम् | = | भुक्तावशिष्टम्, जुठो |
| क्रोशन्ती | = | विलपन्ती, चिच्याउँदै |
| क्षुधा | = | बुभुक्षा, भोक |
| उल्मुकः | = | ज्वलदङ्गारः, अगुल्टो |
| अपकारः | = | अपमानम्, अपमान |
| निधाय | = | स्थापयित्वा, राखेर |

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकात् श्रुत्वा उच्चारयत**

विदर्भनगर्याम्, निमन्त्रितवान्, पक्वान्नानि, उल्मुकेन, निःक्षिप्तवती, कार्यव्यस्ततया, बुभुक्षिता, भग्नप्रायः, भक्षणार्थम्, अन्वेष्टुम् ।

**२. पाठस्य प्रथमानुच्छेदं श्रुत्वा शुनी किमर्थं पायसम् उच्छिष्टं कृतवती, कारणं वदत ।**

**३. सतीर्थ्याद् अधोलिखितानि पदानि श्रुत्वा तेषां पाठस्थानि पर्यायपदानि कथयत**

कृषाणः, जीवः, वृषः, कर्तुम्, प्रसन्नाः, संलापः, संवादः, आदेशः, मस्तकम् ।

**४. शिक्षकाद् अधोलिखितं गद्यखण्डं श्रुत्वा प्राणिषु कीदृशः व्यवहारः कर्तव्यः इति कथयत**

पशवः अपि अस्माकं पितृवत् स्नेहस्य, आदरस्य, श्रद्धायाः च पात्राणि भवन्ति । वयं न जानीमः यत् कः पशुः पूर्वजन्मनि अस्माकं कः आसीत् । अधुना पशुरूपेण दृष्टः कः अपि प्राणी पूर्वजन्मनि अस्माकं माता, पिता, भ्राता, भगिनी च भवितुं शक्नोति । अधुना मनुष्यरूपेण विद्यमानाः वयम् अपि दुष्कर्मणा पशुयोनौ प्राप्तुं शक्नुमः । अतः प्राप्त-मनुष्यजीवनैः विवेकिभिः अस्माभिः सदैव सत्कर्म एव कार्यम् । सर्वेषु प्राणिषु दयाभावः दर्शनीयः । कस्मै अपि जीवाय पीडा न देया । परपीडनं पापाय भवति । परोपकारः च पुण्याय भवति । अतः अस्माभिः पशून् प्रति आदरपूर्णः, स्नेहपूर्णः च व्यवहारः करणीयः । स्वस्य उपकाराय, लोकमङ्गलाय, विश्व-कल्याणाय च शास्त्रस्य निर्देशनानि परिपालनीयानि । सज्जनैः, सत्-शास्त्रैः निर्दिष्टाः मार्गाः अनुसरणीयाः ।

## पठनम्

**१. परस्परं सहकार्येण पाठस्य अनुच्छेदानां अनुवाचनं कुरुत ।**

**२. उदाहरणम् अनुसृत्य पाठस्य प्रथमानुच्छेदाद् विशेषणपदानि, विशेष्यपदानि च पृथक् पृथक् लिखत**

**उदाहरणम्**

| विशेषणपदम् | विशेष्यपदम् |
|---|---|
| धार्मिकः | कृषकः |
| सर्वेषु | प्राणिषु |

**३. अधो लिखितम् अनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नान् सङ्क्षेपेण उत्तरयत**

**मर्यादा**

सीतास्वयंवरस्य अवसरः आसीत् । हस्ते वरमाल्यं गृहीत्वा सीता रामस्य कण्ठे सज्जीकर्तुं तत्परा अभवत् । रामात् सीता ईषद् वामनी आसीत् । विवाहोत्सवे रामस्य

पितरौ उपस्थितौ नास्ताम् । विवाहाय रामस्य पितुः आज्ञा च अवशिष्टा आसीत् । यतो हि पितृवर्गस्य आज्ञया एव कर्मणां सम्पादनं रघुकुलस्य मर्यादा आसीत् । एतत् सर्वं विचार्य रामः वरमाल्यं स्वीकर्तुं संशयम् अकरोत् । स वरमाल्यं ग्रहीतुं न अवानमत् । सीता रामस्य कण्ठे वरमाल्यं सज्जीकर्तुं न अशक्नोत् । पार्श्वे एव लक्ष्मणः आसीत् । स रामस्य मनोदशां जानाति स्म । स सहसा शिरसा रामस्य चरणौ अनमत् । लक्ष्मणः नमनात् चिराय न उदतिष्ठत् । रामः अवदत्, "लक्ष्मण ! उत्तिष्ठ, उत्तिष्ठ, नमनेन अलम् ।" रामेण वारं वारम् उक्तः अपि लक्ष्मणः नमनं न अत्यजत् । रामः लक्ष्मणम् उत्थापयितुम् ईषद् अवानमत् । तदैव सीता रामस्य कण्ठे वरमाल्यं न्यधापयत् । लक्ष्मणस्य भक्त्या चातुर्येण च सीतास्वयंवरः सम्पन्नः, रघुकुलस्य मर्यादा च सुरक्षिता अभवत् ।

**प्रश्नाः**

(क) रामात् सीता कीदृशी आसीत् ?

(ख) रघुकुलस्य मर्यादा का ?

(ग) लक्ष्मणः किं जानाति स्म ?

(घ) सीता रामस्य कण्ठे वरमाल्यं कदा न्यधापयत् ?

(ङ) कथं रघुकुलस्य मर्यादा सुरक्षिता अभवत् ?

**४. पाठस्य द्वितीयम् अनुच्छेदं पठित्वा एकपदेन उत्तरयत**

(क) उच्छिष्टम् किम् ?

(ख) भग्ना का ?

(ग) श्रान्तः कः ?

(घ) व्याकुला का ?

(ङ) निष्फलं किम् ?

**५. अधस्तनं गद्यांशं पठित्वा पर्यावरणस्य महत्त्वविषये विमृशत**

जनाः यत्र निवसन्ति, भ्रमन्ति, कार्यं कुर्वन्ति तत्रत्यं पर्यावरणं शुद्धं भवतु इति इच्छन्ति । जनानां स्वास्थ्यरक्षणाय पर्यावरणे शुद्धता आवश्यकी भवति । शुद्धे पर्यावरणे

शुद्धः वायुः वहति, शुद्धं जलं मिलति, उत्पादितानि अन्नफलादीनि च स्वस्थकराणि भवन्ति ।

ये जनाः शुद्धेन वायुना श्वास- प्रश्वासक्रियां कुर्वन्ति, शुद्धेन जलेन स्नान्ति, वस्त्राणि प्रक्षालयन्ति, भोजनं रचयन्ति, शुद्धं जलं पिबन्ति, शुद्धे पर्यावरणे उत्पादितानि अन्नानि फलानि व्यञ्जनशाकादीनि च खादन्ति ते अवश्यमेव स्वस्थाः भवन्ति ।

स्वस्थाः जनाः अलसाः न भवन्ति । ते स्वकार्ये सदैव उद्यमशीलाः भवन्ति । अतः सफलतां च प्राप्नुवन्ति । स्वस्य निवासं परितः पर्यावरणं शुद्धं कर्तुं जनाः अवकरान् निश्चितस्थानेषु क्षिपन्ति । ते मार्गे दूषितं जलं न वाहयन्ति । जनाः परितः रिक्तस्थानेषु वृक्षकान् वपन्ति । ते समये समये समाजसभाम् आहूय पर्यावरणस्य शुद्धतायै योजनां निर्मान्ति । योजनानुसारेण तदर्थं कार्यं च कुर्वन्ति । यत्र पर्यावरणं शुद्धं भवति तत्र सर्वविधा उन्नतिः सम्भवति । यदा प्रत्येकं समाजस्य उन्नतिः भवति तदा समग्रं राष्ट्रमेव उन्नतिपथं समारोहति । अतः सर्वे अपि नागरिकाः पर्यावरणस्य शुद्धतायै ध्यानं यच्छेयुः ।

## लेखनम्

१. **पाठस्य तृतीयानुच्छेदस्य श्रुतिलेखनं कुरुत ।**

२. **अधो लिखितानां पदानां वाक्येषु प्रयोगं कुरुत**

कृषकः, शुनी, भोजनार्थम्, इतस्ततः, अज्ञात्वा, आदिवसम्, यथेष्टम्, आर्पयत् ।

३. **उदाहरणानुसारं सारिणीं पूरयत**

| पदावली | विशेषणपदम् | विशेष्यपदम् |
|---|---|---|
| सर्वं वार्तालापम् | सर्वम् | वार्तालापम् |
| यथेष्टं भोजनम् | | |
| पत्नीसहितः सः | | |
| अरुन्धतीसहितान् सप्तर्षीन् | | |
| सर्वं वृत्तान्तम् | | |
| मुक्तौ पितरौ | | |

४. **एकेन वाक्येन उत्तरयत**

(क) सुमतिः कस्मिन् दिने ब्राह्मणान् निमन्त्रितवान् ?

(ख) पायसभाण्डे का विषवमनम् अकरोत् ?

(ग) शुनीबलीवर्दौ पूर्वजन्मनि कौ आस्ताम् ?

(घ) किमर्थं श्राद्धं निष्फलम् अभवत् ?

(ङ) सुमतिः किमर्थं वनम् अगच्छत् ?

५. **विशेषणपदस्य विशेष्यपदस्य च लिङ्ग-विभक्ति-वचननिर्देशं कुरुत**

उदाहरणम्

| विशेषणपदम् | विशेष्यपदम् |
|---|---|
| एका | शुनी |
| स्त्रीलिङ्गम्, प्रथमा विभक्तिः, एकवचनम् | स्त्रीलिङ्गम्, प्रथमा विभक्तिः, एकवचनम् |
| बहुविधानि | पक्वान्नानि |
| ज्वलता | उल्मुकेन |
| अपरस्मिन् | दिने |
| विवेकिभिः | अस्माभिः |
| सर्वम् | वृत्तान्तम् |
| पीडिता | सा |

६. **मञ्जूषासाहाय्येन रिक्तस्थानं पूरयत**

पुरा ........ नगरी आसीत् । तस्याः ......... अयोध्या आसीत् । तत्र एकः ........ राज्यं करोति स्म । नृपस्य नाम ......... आसीत् । तस्य .......... पुत्राः आसन् । रामः, भरतः, ........., शत्रुघ्नः च । एकदा दशरथः ........... राज्याभिषेकं कर्तुम् ऐच्छत् । तदर्थं सैनिकाः नगरवासिनः च नगरस्य ............. भव्यतया अकुर्वन् । ......... वसिष्ठः च रामस्य राज्याभिषेकार्थं तत्र आगच्छत् । परन्तु तदानीम् एव मध्यमा ........ कैकेयी दशरथं प्रति पूर्वप्रतिज्ञातं वरद्वयं प्रार्थयत् - भरतस्य राज्याभिषेकः, रामस्य कृते च ........... पर्यन्तं वनवासः, इति ।

लक्ष्मणः, चतुर्दशवर्षाणि, गुरुः, नृपः, एका, सज्जीकरणम्, नाम, राज्ञी, दशरथः, रामस्य, चत्वारः

## व्याकरणानुशीलनम्

१. **सोदाहरणं सत्वसन्धिनियमान् पठत**

**सत्वसन्धिः**

विसर्गः+खर् = स्

विसर्गः+शर् = ः/स्

विष्णुः+त्राता = विष्णुस्+त्राता = विष्णुस्त्राता, शोभनः+चन्द्रः = शोभनस्+चन्द्रः = शोभनश्चन्द्रः, रामः+चलति = रामस्+चलति = रामश्चलति, हरिः + शेते =हरिः शेते/हरिश्शेते

२. **सन्धिगतं रूपं लिखत**

पशुः + चलति ....................

मुनिः + चिन्तयेत् ..................

गुरोः + थुत्कारः ...................

पटुः + छात्रः .................

गौः + च .................

तनयः + षष्ठः ..................

शिशवः + शेरते .................

पुत्रः + तव ...............

श्यामः + टीकते ................

हरेः + चिन्ता ..............

शत्रोः + टङ्कारः .............

भानुः + तपति ..................

पुत्र्यः + सप्त ................

नमः + शिवाय .................

३. **सन्धिविच्छेदं कुरुत**

गुरुश्चिन्तयति ...................

युवानस्तत्पराः ...................

पूज्यष्ठक्कुरः ...................

अनुजस्स्वपिति ...................

पुत्रश्शयानः ...................

बालाश्चपलाः ...................

कर्मचारिणष्टङ्कन्ते ...................

कपयस्ते ...................

अश्वाष्षट् ...................

४. तुमुन्प्रत्ययान्तानां पदानां सारिणीं पठत

| धातुः | तुमुन्प्रत्ययान्तानि पदानि |
|---|---|
| पठ् | पठितुम् |
| लिख् | लिखितुम् |
| हस् | हसितुम् |
| खाद् | खादितुम् |
| भू | भवितुम् |
| कृ | कर्तुम् |
| पा | पातुम् |
| दृश् | द्रष्टुम् |
| स्था | स्थातुम् |
| गम् | गन्तुम् |

५. **शिक्षकस्य साहाय्येन अधस्तनानां धातूनां तुमुन्प्रत्ययान्तानि पदानि अन्विष्य लिखत**

पत्, जीव्, गर्ज्, चल्, गै, जि, मन्, त्यज्, दह्, वस्, वद्, रक्ष्, खेल्, नम् ।

६. **कोष्ठस्थानां धातूनां क्त्वाप्रत्ययान्तानि पदानि निर्माय रिक्तस्थानं पूरयत ।**

(क) वयं .............. चत्वरं गच्छामः । (क्रीड्)

(ख) युवां गुरुं ............... अग्रे गच्छथः । (प्रच्छ)

(ग) गोविन्दः पुरस्कारं ............. कवितां लिखति । (लभ्)

(घ) रमा पितरौ ........... इच्छति । (सेव्)

(ङ) अहं रूप्यकाणि ............. पितरम् उपगच्छामि । (याच्)

## कोषानुशीलनम्

**पापस्य नामानि**

अस्त्री पङ्कं पुमान्पाप्मा पापं किल्विषकल्मषम् ॥१॥
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ॥२॥

### धर्मस्य नामानि

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ॥१॥

### सुखस्य नामानि

मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ॥१॥
स्यादानन्दथुरानन्दः शर्मशातसुखानि च ॥२॥

## पदानुशीलनी

**लिङ्गव्यवस्था** - अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे च (ङ) इति सङ्केतः प्रदत्तो वर्तते ।

**पापस्य द्वादश नामानि** - पङ्कम् (ङ), पाप्मा (क), पापम् (ग), किल्विषम् (ग), कल्मषम् (ग), कलुषम् (ग), वृजिनम् (ग), एनः (ग), अघम् (ग), अंहः (ग), दुरितम् (ग), दुष्कृतम् (ग) ।

**धर्मस्य पञ्च नामानि** - धर्मम् (ङ), पुण्यम् (ग), श्रेयः (ग), सुकृतम् (ग), वृषः (क) ।

**सुखस्य द्वादश नामानि** - मुत् (ख), प्रीतिः (ख), प्रमदः (क), हर्षः (क), प्रमोदः (क), आमोदः (क), सम्मदः (क), आनन्दथुः (क), आनन्दः (क), शर्म (ग), शातम् (ग), सुखम् (ग) ।

## अभ्यासः

१. **अधस्तनात् पद्यात् पापस्य द्वादश नामानि पृथक् कृत्वा लिखत**

अस्त्री पङ्कं पुमान्पाप्मा पापं किल्विषकल्मषम् ।
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ॥

२. **धर्मस्य नाम्नां पङ्क्तिं लिखत ।**

३. **'सुकृतम्' इति कस्य नाम ?**

४. **अधस्तने पद्ये रिक्तस्थानं पूरयत**

मुत्प्रीतिः ........ हर्षः प्रमोदामोदसम्मदाः ।
स्यादानन्दथुरानन्दः .................... च ॥

५. **पर्यायान् परस्परं मेलयत**

| ‘अ’ खण्ड | ‘आ’ खण्ड |
|---|---|
| कल्मषम् | सुकृतम् |
| धर्मम् | शर्म |
| श्रेयः | कलुषम् |
| आनन्दः | पुण्यम् |

६. **उदाहरणानुसारेण दुरित-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | दुरितम् | दुरिते | दुरितानि |
| द्वितीया | दुरितम् | ........ | दुरितानि |
| तृतीया | दुरितेन | दुरिताभ्याम् | दुरितैः |
| चतुर्थी | दुरिताय | ........ | दुरितेभ्यः |
| पञ्चमी | दुरितात् | ........ | ........ |
| षष्ठी | ........ | दुरितयोः | दुरितानाम् |
| सप्तमी | दुरिते | ........ | ........ |
| सम्बोधनम् | हे दुरित ! | ........ | ........ |

७. **सुकृत-शब्दस्य रूपावलीं लिखत ।**

८. **प्रदत्तैः पदैः वाक्यानि रचयत**

पुण्यम्, दुष्कृतम्, आनन्दः, हर्षः ।

**प्रतिभाप्रदर्शनाभ्यासः**

**सन्देशप्रधानां काञ्चित् कथां लिखित्वा कक्षायां श्रावयत ।**

## सामाजिकसञ्जालं साधकं बाधकं वा ?

(बर्दियामण्डलस्य जनचेतनामाध्यमिकविद्यालये अद्य वादविवादप्रतियोगिता वर्तते । विद्यालयस्य प्राङ्गणे सर्वे छात्राः अध्यापकाश्च उपस्थिताः वर्तन्ते । कार्यक्रमस्य सभापतिः प्रधानाध्यापकः वर्तते । त्रयः शिक्षकाः निर्णायकाः सन्ति । षष्ठ्याः कक्षायाः शकुन्तलाचौधरी कार्यक्रमस्य सञ्चालिका अस्ति । सा कार्यक्रमम् आरभते ।)



**कार्यक्रमस्य उद्घोषिका शकुन्तलाचौधरी**

आदरणीय सभापतिमहोदय ! अतिथिपदे विराजमानाः महानुभावाः, निर्णायकमण्डले स्थिताः नीरक्षीरविवेकिनः गुरवः, मम प्रियमित्राणि च !

अद्य सञ्चाल्यमानायाः वादविवादप्रतियोगितायाः शीर्षकमस्ति - 'छात्राणां कृते सामाजिकसञ्जालं साधकं बाधकं वा ?' प्रतियोगितायां सहभागिभिः विद्यार्थिभिः विद्यालयस्य सूचनापट्टिकायां पूर्वसूचिताः नियमाः पालनीयाः भवन्ति ।

अतः परम् अहं विषयस्य पक्षे स्वकीयतर्कानाम् प्रस्तुतये अब्दुलरहमानं मञ्चे आमन्त्रयामि ।

(अब्दुलरहमानः मञ्चे गच्छति, वक्तुं च प्रारभते)

**अब्दुलरहमानः**

आदरणीय सभापतिमहोदय ! अतिथिमहानुभावाः, निर्णायकमण्डले स्थिताः गुरवः मम सहपाठिनः सखायश्च !

अद्यतन्याः वादविवादप्रतियोगितायाः शीर्षकमस्ति - 'छात्राणां कृते सामाजिकसञ्जालं साधकं बाधकं वा ?' अहम् अस्य विषयस्य पक्षे भाषमाणः अस्मि । सामाजिकसञ्जालपदेन अन्तर्जालम् (इन्टरनेट इति नामाख्यम्), मुखपुस्तिका (फेसबुक इति नामाख्यम्), सन्देशकः (मेसेन्जर इति नामाख्यम्), विचारप्रवाहिका (ट्विटर इति नामाख्यम्), श्रव्यदृश्यहारिणी (युट्युब इति नामाख्यम्), संवादिनी (च्याट इति नामाख्यम्), चित्रसंयोजिका (पिन्टरेस्ट इति नामाख्यम्), विश्वगवेषिका (गुगलसर्च इति नामाख्यम्) च इत्यादीनां ज्ञानं भवति । सभापतिमहोदय ! इदं विज्ञानस्य प्रविधेश्च युगं वर्तते । अपि च इदं सुसाङ्ख्यस्य युगं वर्तते । सामाजिकसञ्जालस्य अन्तर्जालस्य चलभाषस्य (मोबाइलयन्त्रस्य) च प्रयोगं विना वयं किमपि कार्यं कर्तुं न शक्नुमः । वयं क्षणे क्षणे सर्वविधाः सूचनाः समाचारान् च सामाजिकसञ्जालात् प्राप्तुं प्रेषयितुञ्च शक्नुमः । अन्तर्जालस्य माध्यमेन वैश्विकसूचनां प्राप्तुं शक्नुमः । मुखपुस्तिकायाः माध्यमेन चित्रादिकं संयोज्य सन्देशं प्रेषयितुं शक्नुमः । सन्देशकस्य माध्यमेन परस्परं सन्देशस्य आदानं प्रदानं च कर्तुं शक्नुमः । विचारप्रवाहिकायाः माध्यमेन देशस्य, समाजस्य च सम्बन्धे स्वस्य महत्त्वपूर्णं विचारं प्रस्तोतुं शक्नुमः । श्रव्यदृश्यहारिण्याः माध्यमेन विविधानि श्रव्यानि, दृश्यानि च वस्तूनि श्रोतुं द्रष्टुं च शक्नुमः । संवादिन्याः माध्यमेन मित्रेण सह परस्परं वार्तालापं कर्तुं प्रभवामः । चित्रसंयोजिकायाः माध्यमेन चित्रं संयोज्य स्वविचारं प्रकटयितुं शक्नुमः । विश्वगवेषिकायाः प्रयोगेण संसारस्य यत् किमपि वस्तु अन्वेष्टुं शक्नुमः । अधुना अन्तर्जाले सर्वं विश्वम् एव स्थापितम् अस्ति । सामाजिकसञ्जालं मनोरञ्जनस्य तु मनोहरा वाटिका एव मन्यते । हस्ते स्थितं चलभाषयन्त्रम् उद्घाट्य वयं कस्यापि जनस्य कस्यापि समयस्य किमपि गीतं, सङ्गीतं च तत्कालम् एव श्रोतुं शक्नुमः, नृत्यं च द्रष्टुं पारयामः । अधुना प्रायः सर्वेषु देशेषु सञ्जालप्रयोगेण एव अध्यापनं विधीयते । अस्माकं जनचेतना-माध्यमिकविद्यालयः अपि

प्रविधिमूलः विद्यालयः अस्ति । अतः मम मते सामाजिकसञ्जालं छात्राणां कृते पूर्णतः साधकम् अस्ति । (पूर्वसूचनायै घण्टिका वाद्यते) ।

मञ्चासीनाः महानुभावाः ! यदि छात्रः सामाजिकसञ्जालस्य प्रयोगे कुशलः अस्ति तदा अधुना खले कपोतन्यायेन सर्वमपि ज्ञानं तस्य हस्तगतं भवति । यदि हस्ते चलभाषयन्त्रम् अस्ति समग्रं विश्वम् एव तस्य हस्ते आयाति । यदि तादृशम् उपकरणं नास्ति चेत् सः अस्य युगस्य अन्धः मन्यते । अतः एव अहं कथयामि सामाजिकसञ्जालं छात्राणां कृते साधकम् अस्ति इति । धन्यवादः । (सर्वे श्रोतारः विद्यार्थिनः करतालिकां वादयन्ति)

**उद्घोषिका**

धन्यवादाः । अतः परं विषयस्य विपक्षे स्वस्य विचारान् प्रस्तोतुम् अहं नरेन्द्रचौधरीमहोदयं मञ्चे आह्वयामि ।

**नरेन्द्रचौधरी**

समादरणीय सभापतिमहोदय ! आदरणीयाः अतिथिमहानुभावाः, निर्णायकमण्डले विराजमानाः गुरवः, प्रतियोगिनः उपस्थिताः मम सखायः विद्यार्थिनश्च !

अद्यतन्यां वादविवादप्रतियोगितायाम् अहं विषयस्य विपक्षे भाषमाणः अस्मि । सामाजिकसञ्जालं छात्राणां कृते जालम् इव पीडादायकम् अनर्थकरं च जातम् अस्ति । तन्तुनिर्मितं जालं यथा समुद्रेषु, नदीषु, तडागेषु स्वच्छन्दरूपेण विहरतां मत्स्यानां कृते विपत्तिकरं भवति तथा छात्राणां कृते सामाजिकसञ्जालम् अपि अनिष्टकरम् अस्ति । धीवरः जलेषु जालं प्रसार्य मत्स्यान् तत्र निपात्य पश्चात् कुवेण्यां स्थापयति । सामाजिकसञ्जालस्य वणिक् तु सामाजिकसञ्जाले जनान् निपात्य तेषां धनम्, स्वास्थ्यम्, यौवनं च अपहरति । विज्ञानस्य दृष्ट्या, मनोविज्ञानस्य दृष्ट्या, शास्त्राणां मर्यादायाः च छात्राणां कृते सामाजिकसञ्जालस्य प्रयोगः हानिकारकः अस्ति । मम पूर्ववक्ता मित्रम् अकथयत् यत् - इदं विज्ञानस्य युगं वर्तते, सामाजिकसञ्जालं विना वयं किमपि कर्तुं न शक्नुमः इति । कीदृशं हास्यास्पदम् इदम् कथनम् ? पुराकाले सामाजिकसञ्जालं नासीत् परं तस्य अभावे अपि अस्माकं पूर्वजैः सर्वाणि कार्याणि विहितानि आसन् । शिक्षायाः क्षेत्रे तु अस्माकं पूर्वजाः बहूनि कार्याणि कृतवन्तः ।

तानि कार्याणि इदं सामाजिकसञ्जालस्य युगं वर्षाणां दशसहस्रेण अपि कर्तुं न शक्नोति । वर्तमानं विज्ञानं पूर्वजानाम् अपेक्षया स्वल्पमेव कार्यं कृतवत् अस्ति । इदानीं विश्वस्य एव बालकाः सामाजिकसञ्जालस्य रोगेण पीडिताः सन्ति । अधुना अस्य एव कारणेन परिवारे सामञ्जस्यं नास्ति । पुत्रः पितरम् न अभिवादयति, पिता च पुत्रे न स्निह्यति, पुत्री च मात्रा सह कलहायते । परिश्रमे तेषां विश्वासः नास्ति । एतेनैव कारणेन बाल्यकाले एव अनेके शारीरकरोगाः मानसिकरोगाः च उत्पन्नाः सन्ति । (पूर्वसूचनायाः घण्टिका वाद्यते)

**नीरक्षीरविवेकिनः निर्णायकाः !**

इदं सामाजिकसञ्जालं छात्रान् परिश्रमं कर्तुं न ददाति । परिश्रमस्य अभावे शरीरम् दुर्बलं भवति, मनोबलं च क्षीयते । सञ्जालप्रयोगस्य व्यसनेन मानवस्य मौलिकस्वभावः एव विकसितः न भवति । मौलिकस्वभावस्य विकासाभावे मानवस्य जीवने अनेकाः समस्याः समायान्ति । ततः कथम् अस्माकं कल्याणं स्यात् । अतः सामाजिकसञ्जालं छात्राणां कृते नितान्तं बाधकम् अस्ति ।

(सर्वे श्रोतारः करतालिकां वादयन्ति)

**उद्घोषिका**

महत्त्वपूर्णान् तर्कान् उपस्थापयन्तं प्रतियोगिनं नरेन्द्रचौधरीमहोदयं प्रति हार्दं धन्यवादम् अर्पयामि । अथ च अहम् अपरं प्रतियोगिनं चन्द्रबहादुरश्रेष्ठं प्रतियोगितायां स्वकीयान् तर्कान् प्रस्तोतुम् आह्वयामि ।

**चन्द्रबहादुरश्रेष्ठः**

श्रद्धेय सभापतिमहोदय ! आदरणीयाः अतिथिमहाभागाः, निर्णायकाः गुरवः, प्रतियोगीनि मित्राणि, श्रोतारः सखायः च !

अद्य सञ्चाल्यमानायां वादविवादप्रतियोगितायां सामाजिकसञ्जालं छात्राणां कृते साधकम् अस्ति इति विषयस्य पक्षे विचारान् उपस्थापयन् अस्मि । अहं तु मन्ये सामाजिकसञ्जालं न केवलं छात्राणाम्, अपि तु सर्वेषां कृते साधकम् एव भवति । क्षणे क्षणे समाजस्य, राष्ट्रस्य, विश्वस्य च आवश्यकसूचनां प्राप्य विभिन्नेषु क्षेत्रेषु कार्यरताः मानवाः लाभं प्राप्नुवन्ति । ततः

ते अनुचितेभ्यः कार्येभ्यः सावधानाः भवन्ति चेत् उचितेषु कार्येषु निःशङ्कतया संलग्नाः भवन्ति । विश्वस्य प्रायः सर्वेषु देशेषु अन्तर्जालमाध्यमेन एव व्यवहाराः सञ्चलन्ति । नेपाले अपि अधुना जनाः गृहे एव स्थित्वा विद्युच्छुल्कं, दूर-सञ्चारशुल्कम्, क्रीतानाम् वस्तूनाम् शुल्कं च शोधयन्ति । अन्तर्जालस्य एव प्रयोगेण बसयानानां वायुयानानां च यात्राचिटिकां च क्रीणन्ति । वित्तसंस्थासु धननिक्षेपः, तेभ्यः धननिःसारणं च अधुना अन्तर्जालस्य प्रयोगेण कुर्वन्ति । एकेन मम पूर्ववक्त्रा मित्रेण कथितम् - अस्माकं पूर्वजाः च सामाजिकसञ्जालस्य प्रयोगं विना एव सर्वाणि कार्याणि कृतवन्तः आसन् इति । तत्र आंशिकी सत्यता अस्ति । परं ते पाषाणयुगे आसन् इति कृत्वा किम् अत्याधुनिकम् इदम् युगम् विहाय वयम् अपि पाषाणयुगे गन्तुं शक्नुमः ? यदि अस्माकं पूर्वजानाम् अग्रे कार्यसम्पादनस्य साधनानि अभविष्यन् अवश्यम् एव ते अपि तेषाम् प्रयोगम् अकरिष्यन् । प्राचीनकाले बह्वीषु नदीषु सेतवः अपि नासन् । अधुना सन्ति । किं वयं सेतून् विहाय अधुना नदीं तर्तुम् उत्प्लवनं करवाम ? (पूर्वसूचनायाः घण्टिका वाद्यते)

वस्तुतः सामाजिकसञ्जालानां सदुपयोगः कर्तव्यः, न तु दुरुपयोगः । अस्माभिः तस्य सदुपयोगे कृते सदैव साधकम् एव भवति । अवश्यम् एव सामाजिकसञ्जालस्य कारणेन समाजे कतिपयाः विकृतयः प्रविष्टाः स्युः । वयं तासाम् उन्मूलने प्रवृत्ताः भवेम । ततः उपयोगीनि वस्तूनि गृह्णीयाम । धन्यवादः ।

(सर्वे श्रोतारः विद्यार्थिनः करतालिकां वादयन्ति)

**उद्घोषिका**

धन्यवादाः ।अन्ते च विषयस्य विपक्षे तर्कान् प्रस्तोतुम् अहम् प्रतियोगिनीम् शर्मिलाखत्रीमहोदयाम् आकारयामि ।

**शर्मिलाखत्री**

श्रीमन् सभापतिमहोदय ! गुणविज्ञाः अतिथयः, विवेकिनः निर्णायकाः, प्रतियोगिनः सखायः, श्रोतारः विद्यार्थिनः च !

अद्यतन्यां वादविवादप्रतियोगितायाम् अहं सामाजिकसञ्जालं छात्राणां कृते बाधकम् अस्ति

इति विषये भाषमाणा अस्मि । मम दृष्टौ सामाजिकसञ्जालं छात्राणां कृते तु शापः एव अस्ति । मम पूर्ववक्ता कथयन् आसीत् यत् - 'सामाजिकसञ्जालं सर्वेषां क्षेत्राणां सर्वेषां वर्गाणां कृते अत्यधिकं लाभदायकम् अस्ति' इति । तत्र अहं कथयामि - भो मित्र ! स्वकीये पिहिते नेत्रे उन्मील्य विलोक्यताम् । सामाजिकसञ्जालस्य कारणेन एव सर्वाणि क्षेत्राणि अव्यवस्थितानि सन्ति । प्रतिदिनम् सामाजिकसञ्जालस्य सञ्चालने व्यस्ततया चिकित्सालयेषु चिकित्सकानां ध्यानं रोगिणाम् उपचारस्य तुलनायां सामाजिकसञ्जाले गच्छति । तेन कारणेन कतिपयेषु चिकित्सालयेषु सामान्याः रोगिणः अपि समुचितस्य उपचारस्य अभावाद् मृताः इति समाचाराः आगताः सन्ति । विमानचालकाः यदि सामाजिकसञ्जालेषु व्यस्ताः भवन्ति चेत् शताधिकानां मनुष्याणां जीवनं क्षणेन एव गन्तुं शक्नोति । चालकानां चलभाषयन्त्राणि राजमार्गेषु दुर्घटनां निमन्त्रयन्ति । कार्यालयेषु सामाजिकसञ्जाले व्यस्ताः अधिकृताः जनकर्तव्यम् उपेक्षन्ते । विपणिषु व्यापारकर्मणि संलग्नाः व्यापारिणः अपि सामाजिकसञ्जाले व्यस्ततया व्यापारम् एव विस्मरन्ति । सामाजिकसञ्जालस्य प्रयोगव्यसनेन गृहिणीनां पार्श्वे अतिथिना सह वार्तां विधातुं समयः नास्ति । कीदृशः आसीत् अस्माकं संस्कारः ? मित्र ! अधुना वयं कीदृशाः जाताः ? मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव एतादृशाः अस्माकम् आदर्शमयाः व्यवहाराः कुत्र गताः ? इति चलभाषयन्त्रेण सह पृच्छतु भवान् । प्रबुद्धसमाजस्य कृते अपि सामाजिकसञ्जालं घातकं सिद्धम् अस्ति । अतः बालानां किशोराणां छात्राणां च कृते एतत् कथं साधकं भवति ? मम मते तु एतत् सर्वथा बाधकम् एव अस्ति ? (पूर्वसूचनायाः घण्टिका वाद्यते)

**मान्य सभापतिमहोदय !**

छात्राः वस्तुतः शुद्धमृत्तिका इव भवन्ति । यथा शुद्धायै मृत्तिकायै यं कमपि आकारं दातुं शक्यते तथैव छात्रेभ्यः च तथाविधम् एव व्यक्तित्वस्य आकारं दातुं शक्यते । यथा वनस्पतीनां वृद्धौ समुचितं वातावरणम् अपेक्ष्यते तथैव छात्राणां कृते अपि उचितं वातावरणम् आवश्यकं भवति । बहुभिः परीक्षणैः, वैज्ञानिकैः अनुसन्धानैः च प्रमाणितम् अस्ति यत् - सामाजिकसञ्जालं छात्राणां कृते अथवा बालबालिकानां कृते हानिकारकम् अस्ति । वस्तुतः सामाजिकसञ्जालं सञ्जालं नास्ति, दुर्जालम् अस्ति । छात्राणां व्यक्तित्वस्य विकासाय सुसंस्कृतस्य वातावरणस्य आवश्यकता भवति । अतः इदं सामाजिकसञ्जालं छात्राणां कृते साधकं न भवति, अपि तु

बाधकम् एव सिद्ध्यति । धन्यवादः ।

(सर्वे श्रोतारः विद्यार्थिनः करतालिकां वादयन्ति)

### उद्घोषिका

अद्य सम्पन्नायां वादविवादप्रतियोगितायां शर्मिलाखत्री महत्त्वपूर्णान् तर्कान् प्रस्तुतवती । तस्यै अहं हार्दं धन्यवादं प्रयच्छामि । धन्यवादः ।

### शब्दार्थाः

पारयामः = शक्नुमः, सक्छौं
करतालिका = करतलध्वनिः, थपडी
धीवरः = मत्स्यजीवी, माझी
कुवेण्याम् = मत्स्यधान्याम्, पेरुङ्गोमा
पिधाय = निमील्य, बन्द गरेर/चिम्लेर
अभियन्तृणाम् = स्थपतीनाम्, इन्जिनियरहरूको
यात्राचिटिका = यात्राभिलेखपत्रम्, यात्राको टिकट
उत्प्लवनम् = उत्पतनम्, उफ्राइ
दुर्जालम् = दुष्पाशः, पासो
प्रयच्छामि = ददामि, दिन्छु

## अभ्यासः

### श्रवणं भाषणं च

१. **अधो लिखितानि पदानि उच्चारयत**

वादविवादप्रतियोगिता, श्रव्यदृश्यहारिणी, विश्वगवेषिका, चालकानाम्, प्रयोगव्यसनेन, सामाजिकसञ्जालम् ।

२. **अधस्थानां पदानां वचनं वदत**

यथा - नीरक्षीरविवेकिनः (बहुवचनम्)

स्थापयिष्यतः, विद्यार्थिभिः, नियमाः, साधकम्, कपोतन्यायेन, कुवेण्याम्, तस्यै ।

३. **मित्रात् श्रुत्वा सन्धिं विच्छिद्य निगदत**

यथा - अध्यापनम् (अधि+आपनम्), नासीत्, हास्यास्पदम्, विद्युच्छुल्कम्, भावातीतम्, वातावरणम् ।

४. **पाठस्य चतुर्थवक्तुः भाषणाद् अव्ययपदानि विचित्य सखीन् श्रावयत ।**

## पठनम्

१. **धीवरव्यापारिणोः समानकार्यविषयकं गद्यांशम् अन्विष्य पठत ।**

२. **अधो लिखितम् अनुच्छेदं पठत**

शास्त्रार्थस्य त्रीणि रूपाणि भेदाः वा भवन्ति – जल्पः, वितण्डा, वादश्च । उचितानुचितयोर्विचारेण विना स्वपक्षं सत्यं परपक्षम् असत्यं दर्शयितुं यो विमृश्यते स जल्पः ।परपक्षम् उपेक्ष्य हठेन केवलं स्वपक्षस्य स्थापनं वितण्डा ।तार्किकनिर्णयस्य उद्देश्येन शुद्धविचारेण विहितः शास्त्रार्थो वादः । एतत् सत्यं तथ्यं वा निश्चेतुं तर्कसङ्गत्या विहितं विमर्शनम् । वादे उत्तरम् अपि अपेक्ष्यते । एतेषु विवादः कः इति प्रश्न उदेति । यस्य विषये द्वौ ततोऽधिका वा विरोधिनः पक्षा भवन्ति, सत्यता च निर्णीयते स विवादो भवति । यदा वादे विवादो विधीयते तदा वादविवादो जायते । वादविवादेन सत्यं तथ्यं सारं चावगम्यते ।

३. **औचित्येन वाक्यसंयोजनं विधाय पठत**

| | |
|---|---|
| सामाजिकसञ्जालम् | मत्स्यान् मारयति । |
| धीवरः | कार्यं सम्पादयितुं सहयोगं करोति । |
| विमानचालकाः | रुग्णान् उपचरन्ति । |
| चिकित्सकाः | विमानं चालयन्ति । |
| विद्यार्थिनः | भूमिं कर्षन्ति । |
| कृषकाः | सहभागिनः भवन्ति । |
| | किमपि न कुर्वन्ति । |

५. **'व्यावसायिक्याः शिक्षायाः अपेक्षया नैतिकी शिक्षा गरीयसी' इति विषये पक्षतः प्रस्तुतं वादविवादं पठित्वा नैतिक्याः शिक्षायाः महत्त्वविषये कक्षायां विमृशत**

सभापतिमहोदयाः ! प्रमुखातिथयः ! गुरुवर्ग ! निर्णायकसमूह ! आत्मीयमित्राणि च !

अस्यां वादविवादस्य प्रतियोगितायाम् अहं 'व्यावसायिक्याः शिक्षायाः अपेक्षया नैतिकी शिक्षा गरीयसी' इति पक्षतः स्वकीयान् तर्कान् प्रस्तौमि । क्व अत्युत्कृष्टा नैतिकी शिक्षा, क्व च वित्तमूला व्यावसायिकी । नैतिकी शिक्षा सभ्यस्य सामाजिकस्य जीवनस्य कृते प्रथमा आवश्यकता वर्तते । नैतिकरूपेण सबलः जनः एव सर्वेषां विश्वासपात्रं भवति ।

व्यावसायिकी शिक्षा तु केवलं धनार्जनस्य उपायान् कलाः च शिक्षयति । नैतिकशिक्षायाः अभावे व्यवसायी अपि भ्रष्टाचारी भवितुं शक्नोति । भ्रष्टाचाररतानां व्यवसायिनां कारगारवासस्य विषये तु यदाकदा समाचारपत्रेषु भवन्तः अपि पठन्ति एव । भ्रष्टाचारी न सर्वकाराय राजस्वं यच्छति, न च समाजस्य सम्यक् सेवां करोति । तेन अर्जितं धनम् अपि चिरस्थायि न भवति । नीतिशास्त्रे उल्लिखितं वर्तते यद् -

**अन्यायोपार्जितं द्रव्यं दश वर्षाणि तिष्ठति ।**
**प्राप्ते चैकादशे वर्षे समूलञ्च विनश्यति ॥**

(अत्र साङ्केतिकः घण्टानादः) व्यावसायिकी शिक्षा प्रथमा आवश्यकता नास्ति । प्रथमा आवश्यकता तु नैतिकी शिक्षा अस्ति । अतः व्यावसायिक्याः शिक्षायाः अपेक्षया नैतिकी शिक्षा गरीयसी ।

(अत्र समाप्तिसूचकः घण्टानादः) धन्यवादः । (करतलध्वनिः गुञ्जति ।)

## लेखनम्

१. **अभ्यासपुस्तिकायां लिखत**

नीरक्षीरविवेकिनः, चित्रसंयोजिका, मत्स्यधानी, बह्वीषु, क्रीणन्ति, निमन्त्रयन्ति, अभियन्तॄणाम्, आह्वयामि ।

२. **सत्यकथने (√), असत्यकथने च (×) चिह्नं दत्त**

(क) सामाजिकसञ्जालस्य सदुपयोगः कर्तव्यः । ( )

(ख) अध्ययनं त्यक्त्वा सदैव चलभाषोपकरणं चालनीयम् । ( )

(ग) पूर्वजाः अपि सामाजिकसञ्जाले व्यस्ताः भवन्ति स्म । ( )

(घ) चालकः विश्वगवेषिकां पश्यन् यानं चालयितुं शक्नोति । ( )

(ङ) सामाजिकसञ्जालम् अस्मभ्यम् उपयोगिनीं सूचनां ददाति । ( )

**३. उपसर्गैः निर्मितान् शब्दान् प्रयुज्य एकैकं वाक्यं रचयत**

अपवादः, प्रवादः, प्रतिवादः, विवादः, संवादः ।

**४. एकवाक्येन उत्तरयत**

(क) का प्रतियोगिता आयोजिता अस्ति ?

(ख) वादविवादस्य विषयः कः ?

(ग) निर्णायकमण्डलस्य कार्यं किम् ?

(घ) प्रतियोगितायां कति विद्यार्थिनः सहभागिनः सन्ति ?

(ङ) प्रतियोगितायां कस्मै किमर्थं प्रथमपुरस्कारः प्रदातव्यः ?

**५. 'व्यावसायिक्याः शिक्षायाः अपेक्षया नैतिकी शिक्षा गरीयसी' इति विषये विपक्षतः प्रस्तुतं वादविवादं पठित्वा किमर्थं व्यावसायिकी शिक्षा आवश्यकी भवति ? इति लिखत ।**

आदरणीयाः सभापतिमहोदयाः, प्रमुखातिथयः, निर्णायकाः, सम्मान्याः गुरवः तथा उपस्थितानि मित्राणि ! पक्षस्य मतं खण्डयित्वा स्वमतस्य स्थापनाय अत्र भवतां पुरतः समुपस्थितः अस्मि । मम प्रतिस्पर्धी पूर्ववक्ता कथितवान् यद् - नैतिकी शिक्षा जीवनस्य प्रथमा आवश्यकता अस्ति, इति । परन्तु एतत् अनुचितं कथनं वर्तते । यतो हि आधुनिके संसारे धनं विना किमपि कार्यं न सिध्यति । जीवनस्य आधारः एव धनं वर्तते । धनार्जनाय शिक्षा एव व्यावसायिकी शिक्षा वर्तते । इदानीं नैतिकी शिक्षा तु केवलं पुस्तके आकुञ्चिता वर्तते । नैतिकशिक्षायाः अनुगन्तारं वक्तारं च न कः अपि पृच्छति । (अत्र साङ्केतिकः घण्टानादः)

सभापतिमहोदयाः ! अद्यतने समाजे नीतिशिक्षां पठिताः सरलाः जनाः समुन्नतिं कर्तुं न शक्नुवन्ति । नीतिशास्त्रम् एव एतद्विषये कथयति यद् -

**नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्थलीम् ।**

**छिद्यन्ते सरलास्तत्र कुब्जास्तिष्ठन्ति पादपाः ॥**

अतः सम्प्रति यः व्यावसायिकीं शिक्षाम् अधीत्य कार्ये लगति स एव उन्नतिशिखरं समारोहति । व्यावसायिकी शिक्षा एव नीतिशिक्षायाः गरीयसी वर्तते । (अत्र समयसमाप्तिसूचकः घण्टानादः) धन्यवादः । (करतलध्वनिः)

## व्याकरणानुशीलनम्

१. **सोदाहरणम् उत्वसन्धिनियमान् विसर्गलोपसन्धिनियमान् च पठत**

अः+अ = ओऽ

अः+हश् = ओ

रमेशः + अस्ति = रमेशोऽस्ति, बालः + अयम् = बालोऽयम्, रामः+गच्छति = रामो गच्छति, देवदत्तः+गायति = देवदत्तो गायति, सेवकः+वदति = सेवको वदति, दिलीपः+जगाद = दिलीपो जगाद

**विसर्गलोपसन्धिः**

सः/एषः + हल् = विसर्गलोपः

सः+गच्छति=स गच्छति, सः+धावति= स धावति, एषः+गच्छति = एष गच्छति, एषः+ वदति = एष वदति

२. **सन्धिगतं रूपं लिखत**

| | |
|---|---|
| कः + अपि .............. | शान्तः + अग्निः .................. |
| शिवः + अहम् .................. | छात्रः + अपठत् ............... |
| पुत्रः + अभीष्टः ................ | ज्ञातः + असि .................. |
| प्रथमः + अध्यायः ............ | प्रियः + बन्धुः ............... |
| बलिनः + वयम् .............. | गुरवः + मोदन्ते ................ |
| नमः + भगवते ............... | नद्यः + वहन्ति ................ |
| यः + मनुः ................. | सः + नमति .............. |
| एषः + हसति ................... | सः + छात्रः ................. |
| एषः + वानरः .................. | |

३. **सन्धिविच्छेदं कुरुत**

| | |
|---|---|
| सोऽपि ........................ | विषयोऽचिन्त्यः ........................ |
| नरोऽहम् ................. | वानरोऽयम् ........................ |
| क्रुद्धोऽसि ........................ | द्वितीयोऽध्यायः ........................ |

नमो नमः .......................

निन्द्यो मूर्खः .......................

मान्यो वृद्धः .......................

रामो बलवान् .......................

एष महात्मा .......................

एष पठति .......................

सूर्यो ज्वलति .......................

मान्यो गुरुः .......................

शिशवो वर्धन्ते .......................

स गणेशः .......................

स नरः .......................

स धावति .......................

४. **अधस्तनीं सारिणीं सम्यक् पठत**

**गम्-धातुः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| पुंलिङ्गम् | गच्छन् | गच्छन्तौ | गच्छन्तः |
| स्त्रीलिङ्गम् | गच्छन्ती | गच्छन्त्यौ | गच्छन्त्यः |
| नपुंसकलिङ्गम् | गच्छत् | गच्छती | गच्छन्ति |

५. **सारिणीं पूरयत**

**पठ्-धातुः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| पुंलिङ्गम् | पठन् | | |
| स्त्रीलिङ्गम् | | | |
| नपुंसकलिङ्गम् | | | |

**दृश्-धातुः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| पुंलिङ्गम् | | | |
| स्त्रीलिङ्गम् | | | पश्यन्त्यः |
| नपुंसकलिङ्गम् | | | |

कृ-धातुः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गम् | | | |
| स्त्रीलिङ्गम् | | | |
| नपुंसकलिङ्गम् | | कुर्वती | |

पा-धातुः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गम् | | पिबन्तौ | |
| स्त्रीलिङ्गम् | | | |
| नपुंसकलिङ्गम् | | | |

६. **कोष्ठस्थधातूनां शतृप्रत्ययान्तानि पदानि प्रयुज्य रिक्तस्थानं पूरयत**

(क) नदी .............. अस्ति । (वह्)

(ख) फले ................. स्तः । (पत्)

(ग) वयं ................. स्मः । (लिख्)

(घ) युवां ............... स्थः । (धाव्)

(ङ) बालिके .............. स्तः । (खेल्)

## कोषानुशीलनम्

**कल्याणस्य नामानि**

श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥१॥
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥२॥
शस्तं चाथ... ॥३॥

**भाग्यस्य नामानि**

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥१॥

**जननस्य नामानि**

जनुर्जनन-जन्मानि जनिरुत्पत्तिरुद्भवः ॥१॥

**प्राणिनः नामानि**

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥१॥

**मनसः नामानि**

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥१॥

## पदानुशीलनी

**लिङ्गव्यवस्था** - अत्र शब्दस्य पुंलिङ्गत्वे (क), स्त्रीलिङ्गत्वे (ख), नपुंसकलिङ्गत्वे (ग), अव्ययत्वे (घ), पुंनपुंसकलिङ्गत्वे च (ङ) इति सङ्केतः प्रदत्तो वर्तते ।

**कल्याणस्य द्वादश नामानि** - श्वःश्रेयसम् (ग), शिवम् (ग), भद्रम् (ग), कल्याणम् (ग), मङ्गलम् (ग), शुभम् (ग), भावुकम् (ग), भविकम् (ग), भव्यम् (ग), कुशलम् (ग), क्षेमम् (ङ), शस्तम् (ग) ।

**भाग्यस्य षड् नामानि** - दैवम् (ग), दिष्टम् (ग), भागधेयम् (ग), भाग्यम् (ग), नियतिः (ख), विधिः (क) ।

**जननस्य षड् नामानि** - जनुः (ग), जननम् (ग), जन्म (ग), जनिः (ख), उत्पत्तिः (ख), उद्भवः (क) ।

**प्राणिनः षड् नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे) प्राणी, चेतनः, जन्मी, जन्तुः, जन्युः, शरीरी ।

**मनसः सप्त नामानि** - (अत्र सर्वाणि नामानि नपुंसलिङ्गे) चित्तम्, चेतः, हृदयम्, स्वान्तम्, हृत्, मानसम्, मनः ।

## अभ्यासः

१. **अधस्तन्याः पङ्क्तेः मनसः सप्त नामानि पृथक् कृत्वा लिखत**
   चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।

२. **कल्याणस्य नाम्नां पङ्क्तिद्वयं लिखत ।**

३. **'स्वान्तम्' इति कस्य नाम ?**

४. **अधस्तने पद्ये रिक्तस्थानं पूरयत**
   जनुर्जनन-............ जनिरुत्पत्तिरुद्भवः ।
   ..... तु चेतनो ....... जन्तुजन्युशरीरिणः ॥

५. **पर्यायान् परस्परं मेलयत**

| ‘अ’ खण्डः | ‘आ’ खण्डः |
|---|---|
| शिवम् | जन्मी |
| जन्म | हृदयम् |
| चेतनः | भद्रम् |
| चेतः | जनिः |

६. **उदाहरणानुसारेण प्राणिन्-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | प्राणी | प्राणिनौ | प्राणिनः |
| द्वितीया | प्राणिनम् | ........ | प्राणिनः |
| तृतीया | प्राणिना | प्राणिभ्याम् | प्राणिभिः |
| चतुर्थी | प्राणिने | ........ | प्राणिभ्यः |
| पञ्चमी | प्राणिनः | ........ | ........ |
| षष्ठी | ........ | प्राणिनोः | प्राणिनाम् |
| सप्तमी | प्राणिनि | ........ | ........ |
| सम्बोधनम् | हे प्राणिन् ! | ........ | ........ |

७. **शरीरिन्-शब्दस्य रूपावलीं लिखत ।**

८. **प्रदत्तैः पदैः वाक्यानि रचयत**

भद्रम्, भाग्यम्, जननम्, जन्तुः, मानसम् ।

**प्रतिभाप्रदर्शनाभ्यासः**

ग्रामनगरजीवनयोः कतरत् सुखकरम् इति विषये स्वपक्षं समर्थ्य एकस्मिन् अनुच्छेदे तर्कान् उपस्थापयत ।

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| शिवम् | जन्मी |
| जन्म | हृदयम् |
| चेतनः | भद्रम् |
| चेतः | जनिः |

६. **उदाहरणानुसारेण प्राणिन्-शब्दस्य रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | प्राणी | प्राणिनौ | प्राणिनः |
| द्वितीया | प्राणिनम् | ........ | प्राणिनः |
| तृतीया | प्राणिना | प्राणिभ्याम् | प्राणिभिः |
| चतुर्थी | प्राणिने | ........ | प्राणिभ्यः |
| पञ्चमी | प्राणिनः | ........ | ........ |
| षष्ठी | ........ | प्राणिनोः | प्राणिनाम् |
| सप्तमी | प्राणिनि | ........ | ........ |
| सम्बोधनम् | हे प्राणिन् ! | ........ | ........ |

७. **शरीरिन्-शब्दस्य रूपावलीं लिखत ।**

८. **प्रदत्तैः पदैः वाक्यानि रचयत**

भद्रम्, भाग्यम्, जननम्, जन्तुः, मानसम् ।

**प्रतिभाप्रदर्शनाभ्यासः**

ग्रामनगरजीवनयोः कतरत् सुखकरम् इति विषये स्वपक्षं समर्थ्य एकस्मिन् अनुच्छेदे तर्कान् उपस्थापयत ।